CC0. In Public Domain. Digitized by Sarayu Trust. eGangotri

सर्वदर्शन प्रवेशकः

षड्दर्शनसमुच्चय
प्रमाणनयतत्त्वालोक
तर्कभाषा
सांख्यकारिका
योगसारसंग्रह
मीमांसापरिभाषा
वेदांतपरिभाषा
तर्कसंग्रह

मुनिश्री वैराग्यरतिविजयजी

Ganesh Varni Digambar Jain Institute, Nana

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

S118

श्रीविजयमहोदयसूरिग्रन्थमाला-२२

सर्वदर्शनप्रवेशकः

(मूलग्रन्थसङ्ग्रहः)

❀ संपादकः ❀
तपागच्छाधिराजपूज्यपादाचार्यवर्य
श्रीमद्विजयरामचन्द्रसूरीश्वराणां विनेयः
मुनिः वैराग्यरतिविजयः

प्रवचन प्रकाशन
४८८, रविवार पेठ
पूना-२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीविजयमहोदयसूरिग्रन्थमाला-२२

ग्रन्थनाम : सर्वदर्शनप्रवेशकः

संपादकः : मुनिवैराग्यरतिविजयः

प्रकाशकः : प्रवचन प्रकाशन-पूना

आवृत्तिः : प्रथमा

मूल्यम् : रु. १००-००

© : PRAVACHAN PRAKASHAN, 2009

प्राप्तिस्थान

पूना : प्रवचन प्रकाशन
४८८, रविवार पेठ, पूना-४११००२
फोन : ०२०-६६२०८३४३, मो. ९८९००५५३१०
Email : pravachanprakashan@gmail.com
website : www.pravachanprakashan.org

अहमदाबाद : सरस्वती पुस्तक भंडार
हाथीखाना, रतनपोल, अहमदाबाद-३८०००१
फोन : २५३५६६९२

अशोकभाई घेलाभाई शाह
२०१, ओएसीस, अंकुर स्कूल सामे,
पालडी, अहमदाबाद-३८०००७
फोन : ०७९-२६६३३०८५, मो. ९३२७००७५७९

अक्षरांकन : विरति ग्राफिक्स, अहमदाबाद
फोन : ०७९-२२६८४०३२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रकाशकीयम्

वैश्विके विचारसाहित्ये भारतीयं दर्शनशास्त्रं प्रवरं सर्वसमावेशकं च विद्यते । सङ्गणक(Computer)युगेऽस्मिन् माहितीविस्फोटे जातः । तन्त्रीजालेन(Internet) व्याप्तं सर्वमपि क्षेत्रम् । विद्याकीयक्षेत्रेऽपि तस्य प्रभावोऽतितरां दृश्यते । भारतीयं विचारसाहित्यं भाषासाहित्यं चाधुनिकयुगे अतितमं प्रस्तुतं सञ्जातमस्ति । अस्मदीया वादशैली युक्तिजालरचनापद्धतिश्च सङ्गणकयन्त्रीयतन्त्रज्ञानेऽतीवोपयुक्ताभाति तज्ज्ञानामिति हैद्राबादे भाषाशास्त्रीयविभागे (Linguistics Department) प्रचलितानां नव्यन्यायसॉफ्टवेयरनिर्माणप्रकल्पानां प्रयोगेण ज्ञायते ।

आगामिनि काले संस्कृतं संस्कृते प्रस्तुतं विचारसाहित्यं च प्रमुखं भविष्यतीत्यत्र न कापि शङ्का । तदा अस्माकमयं प्रयासोऽनतितममानन्दं जनिष्यतीति विश्वासो नः ।

प्रवचनप्रकाशनम्

पुण्यनगरी

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुरोवाक्

सञ्चयेऽस्मिन् भारतीयदर्शनसाहित्ये प्रचलितानां जैन-बौद्ध-साङ्ख्य-योग-मीमांसा-वेदान्त-न्याय(वैशेषिक)दर्शनानां प्रवेशक मूलग्रन्थाः सङ्गृहीताः सन्ति। सर्वाणि दर्शनशास्त्राणि सूत्ररूपेण ग्रथितानि सन्ति। भाष्यवृत्त्यादिसहितानि तानि प्रथमत एव मन्द-मध्यममतीनां दुरधिगमानि। तेषु अल्पेन आयासेन प्रवेशः सुकरो भवेदित्येदर्थं प्रकरणशास्त्राणि रचनाभूमिमायातानि। प्रकरणे शास्त्रैकदेशस्य चर्चा प्राधान्येन वर्तते। तदर्थं सङ्क्षेपतोऽपि तत्तद्दर्शनस्य तत्त्वप्रणालीरध्येतव्या भवति। प्रवेशकग्रन्थे सा प्रतिपादिता भवतीति आदौ सैवोपकारिकास्ति मन्दमध्यमोत्तमबुद्धीनां सर्वेषामिति।

दर्शनशास्त्रस्याभ्यासः त्रिषु स्तरेषु क्रियते। तत्र प्रथमं **पदार्थज्ञानम्**। सर्वेषां दर्शनानां स्वीया विभिन्ना स्वतन्त्रा च तत्त्वस्थापनास्ति। एषा तत्त्वनिरूपणा दर्शनस्य स्वकीयं मूलभूतं केन्द्रवर्तिविचारमनुसृत्य प्रवृत्तास्ति। तस्याधिगम आवश्यकः। स च मूलग्रन्थानां ऋते न सम्भवति। अत एव विद्यार्थिनः प्रथमं मूलग्रन्थानेव कण्ठस्थीकुर्वन्ति। द्वितीयं **प्रस्थानभेदज्ञानम्**। यं केन्द्रवर्तिविचारमधिकृत्य दर्शनस्य तत्त्वनिरूपणा प्रचलितास्ति स विचार एव दर्शनान्तरेभ्यः प्रस्तुतदर्शनं विभाजयति। विभिन्नदर्शनेषु दृश्यमानानां समानानां विचाराणां मध्ये एका सूक्ष्मा भेदरेखावश्यं वर्तते। प्रस्थानज्ञानेन तदवगमः कार्यः। तृतीयं **प्रश्न-प्रयुक्तिज्ञानम्**। सर्वाणि दर्शनानि इतरमाक्षिपन्ति, युक्त्याक्षेपान् समादधते च। तदर्थं ते प्रश्नानां प्रयुक्तीनां चोपयोगं कुर्वन्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ते प्रश्नाः ताः युक्तयश्च दर्शनशास्त्रस्य कुञ्चीभूताः सन्ति । तज्ज्ञानेन दर्शनशास्त्रस्य तलस्पर्शिज्ञानं भवति । ज्ञाताधिकृतश्च भवति दर्शने ।

एवंरूपेण सुज्ञातं दर्शनशास्त्रं जीवनस्य प्रत्येकक्षेत्रे उपकारावहं भवति । एतद्विषयेऽस्मद्विद्यागुरवः प्राज्ञवर्यश्रीबलिरामशुक्लवर्याः प्रसङ्गमेकमाख्यातवन्त एकदा । वाराणस्यां प्राज्ञवर्यश्रीहरिरामशुक्लसमीपे हरगोविंदपराञ्जपेनामकः विद्यार्थी सामान्यनिरुक्तिं यावन्न्यायमधीत्य दिल्लीं गतः । तत्र च लोकसभासचिवालये नियुक्तिमाप्तवान् । कदाचित् मिलितः पुनरपि सविशेषं दर्शनशास्त्रमध्येतुमिच्छां प्रकटितवान् । प्राज्ञवर्येण स पृष्टः 'किमद्यापि ते न्यायादिदर्शनेन प्रयोजनं ? अनेन आजीविकादिषु कः उपकार अनुभूतो भवता ?' स आह-'न्यायाध्यनेनैव सचिवालयेऽहं शीघ्रं मानं पदोन्नतिं च आप्तवान् । यतः प्रमाणं विना विचारो न स्वीकरणीयः इत्यहं न्यायशास्त्रेण शिक्षितः । तेनाहं विचारं परीक्षितमेव स्वीकरोमीति विचारशैथिल्यं मयि मया प्रस्तुतेषु पत्रेषु च न प्रभवति, अपरं च न्यायप्रभावात् मम प्रस्तावलेखनमपि (Drafting) स्पष्टं, सुयुक्तियुक्तं, संक्षिप्तं च भवति स्वीकृतं प्रियमपि च जायते उपर्यधिकारिणाम् । तेनाहमुत्सुकोऽद्यापि दर्शनशास्त्रमध्येतुमिति' इति ।

ये केचन मूलग्रन्थानां कण्ठस्थीकरणे उद्युक्तास्तेषामयं सङ्ग्रहोऽतीवोपकारको भविष्यति । सम्पादनेऽस्मिन् प्रेरितवन्तं पूज्यपादाचार्यदेवश्रीमद्विजयकीर्तियशसूरीश्वराणां शिष्यरत्नं मुनिवरं श्रीकृतियशविजयनामधेयं साधुवादान् समर्प्य समापयति तपागच्छाधिराजाचार्यवर्यश्रीमद्विजयरामचन्द्रसूरीश्वराणां विनेयः

—वैराग्यरतिविजयः

धर्मवीराराधनाभवनम्
फातिमानगरम्, पूणे
भाद्रपदशुक्ला त्रयोदशी
वि०सं० २०६५

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुक्रमः

षड्दर्शनसमुच्चयः	श्रीहरिभद्रसूरिः	१
प्रमाणनयतत्त्वालोकः	श्रीवादीदेवसूरिः	११
तर्कभाषा	श्रीमोक्षाकरगुप्तः	३८
साङ्ख्यकारिकाः	श्रीईश्वरकृष्णः	८३
योगसारसंग्रहः	श्रीविज्ञानभिक्षुः	९१
मीमांसापरिभाषा	श्रीकृष्णयज्वः	१४३
वेदान्तसारः	श्रीधर्मराजाध्वरीन्द्रः	१७५
तर्कसंग्रहः	श्रीअन्नंभट्टः	१९३
कारिकावली	श्रीविश्वनाथन्यायपञ्चानन	२०६
परिशिष्टम्	नियमप्रकरणम्	२२४

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

षड्दर्शनसमुच्चयः

सद्दर्शनं जिनं नत्वा वीरं स्याद्वाददेशकम् ।
सर्व-दर्शन-वाच्योऽर्थः संक्षेपेण निगद्यते ॥१॥

दर्शनानि षडेवात्र मूल-भेद-व्यपेक्षया ।
देवता-तत्त्व-भेदेन ज्ञातव्यानि मनीषिभिः ॥२॥

बौद्धं नैयायिकं सांख्यं जैनं वैशेषिकं तथा ।
जैमिनीयं च नामानि दर्शनानाममून्यहो ! ॥३॥

बौद्धदर्शनम्

तत्र बौद्धमते तावद् देवता सुगतः किल ।
चतुर्णामार्यसत्यानां दुःखादीनां प्ररूपकः ॥४॥

दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्तिताः ।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥५॥

समुदेति यतो लोके रागादीनां गणोऽखिलः ।
आत्मात्मीयभावाख्यः समुदयः स उदाहृतः ॥६॥

क्षणिकाः सर्वसंस्कारा इत्येवं वासना यका ।
स मार्ग इह विज्ञेयो निरोधो मोक्ष उच्यते ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम् ।
धर्मायतनमेतानि द्वादशायतनानि च ॥८॥

प्रमाणे द्वे च विज्ञेये तथा सौगतदर्शने ।
प्रत्यक्षमनुमानं च सम्यग्ज्ञानं द्विधा यतः ॥९॥

प्रत्यक्षं कल्पनापोढमभ्रान्तं तत्र बुध्यताम् ।
त्रिरुपाल्लिङ्गतो लिङ्गिज्ञानं त्वनुमानसञ्ज्ञितम् ॥१०॥

रूपाणि पक्षधर्मत्वं सपक्षे विद्यमानता ।
विपक्षे नास्तिता हेतोरेवं त्रीणि विभाव्यताम् ॥११॥

न्यायदर्शनम्

बौद्धराद्धान्त-वाच्यस्य संक्षेपोऽयं निवेदितः ।
नैयायिकमतस्येतः कथ्यमानो निशम्यताम् ॥१२॥

आक्षपादमते देवः सृष्टि-संहारकृच्छिवः ।
विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः ॥१३॥

तत्त्वानि षोडशामुत्र प्रमाणादीनि तद्यथा ।
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ॥१४॥

दृष्टान्तोऽप्यथ सिद्धान्तोऽवयवास्तर्कनिर्णयौ ।
वादो जल्पो वितण्डा च हेत्वाभासाश्छलानि च ॥१५॥

जातयो निग्रहस्थानान्येषामेवं प्ररूपणा ।
अर्थोपलब्धिहेतुः स्यात् प्रमाणं तच्चतुर्विधम् ॥१६॥

प्रत्यक्षमनुमानं चोपमानं शाब्दिकं तथा ।
तत्रेन्द्रियार्थसंपर्कोत्पन्नमव्यभिचारि च ॥१७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवसायात्मकं ज्ञानं व्यपदेशविवर्जितम् ।
प्रत्यक्षमनुमानं तु तत्पूर्वं त्रिविधं भवेत् ॥१८॥

पूर्ववच्छेषवच्चैव दृष्टं सामान्यतस्तथा ।
तत्राद्यं कारणात् कार्यानुमानमिह गीयते ॥१९॥

रोलंब-गवल-व्याल-तमाल-मलिनत्विषः ।
वृष्टिं व्यभिचरन्तीह नैवंप्रायाः पयोमुचः ॥२०॥

कार्यात्कारणानुमानं यच्च तत् शेषवन्मतम् ।
तथाविधनदीपूराद् देवो वृष्टो यथोपरि ॥२१॥

यच्च सामान्यतोदृष्टं तदेवं गतिपूर्विका ।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा ॥२२॥

प्रसिद्धवस्तुसाधर्म्यादप्रसिद्धस्य साधनम् ।
उपमानं समाख्यातं यथा गौर्गवयस्तथा ॥२३॥

शाब्दमाप्तोपदेशस्तु मानमेवं चतुर्विधम् ।
प्रमेयं त्वात्मदेहाद्यं बुद्धीन्द्रियसुखादि च ॥२४॥

किमेतदिति सन्दिग्धः प्रत्ययः संशयो मतः ।
प्रवर्तते यदर्थित्वात् तत्तु साध्यं प्रयोजनम् ॥२५॥

दृष्टान्तस्तु भवेदेष विवादविषयो न यः ।
सिद्धान्तस्तु चतुर्भेदः सर्वतन्त्रादिभेदतः ॥२६॥

प्रतिज्ञा-हेतु-दृष्टान्तोपनया निगमस्तथा ।
अवयवाः पञ्च तर्कः संदेहोपरमो भवेत् ॥२७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा काकादिसंपातात्स्थाणुना भाव्यमत्र हि ।
ऊर्ध्वं संदेह-तर्काभ्यां प्रत्ययो निर्णयो मतः ॥२८॥

आचार्यशिष्ययोः पक्ष-प्रतिपक्ष-परिग्रहात् ।
या कथाभ्यासहेतुः स्यादसौ वाद उदाहृतः ॥२९॥

विजिगीषुकथा या तु छलजात्यादिदूषणा ।
स जल्पः वितण्डा तु या प्रतिपक्षवर्जिता ॥३०॥

हेत्वाभासा असिद्धाद्याश्छलः कूपो नवोदकः ।
जातयो दूषणाभासाः पक्षादिर्दूष्यते न यैः ॥३१॥

निग्रहस्थानमाख्यातं परो येन निगृह्यते ।
प्रतिज्ञाहानि-संन्यास-विरोधादिविभेदतः ॥३२॥

सांख्यदर्शनम्

नैयायिकमतस्यैष समासः कथितो ह्यसौ ।
सांख्याभिमतभावानामिदानीमयमुच्यते ॥३३॥

सांख्या निरीश्वराः केचित् केचिदीश्वर-देवताः ।
सर्वेषामपि तेषां स्यात् तत्त्वानां पंचविंशतिः ॥३४॥

सत्त्वं रजस्तमश्चेति ज्ञेयं तावद् गुणत्रयम् ।
प्रसाद-ताप-दैन्यादि-कार्यलिङ्गं क्रमेण तत् ॥३५॥

एतेषां या समावस्था सा प्रकृतिः किलोच्यते ।
प्रधानाव्यक्तशब्दाभ्यां वाच्या नित्यस्वरूपिका ॥३६॥

ततः सञ्जायते बुद्धिर्महानिति यकोच्यते ।
अहंकारस्ततोऽपि स्यात् तस्मात्षोडशको गणः ॥३७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्पर्शनं रसनं घ्राणं चक्षुः श्रोत्रं च पञ्चमम् ।
पञ्च बुद्धीन्द्रियाण्यत्र तथा कर्मेन्द्रियाणि च ॥३८॥

पायूपस्थवचःपाणिपादाख्यानि मनस्तथा ।
अन्यानि पञ्च रूपादितन्मात्राणीति षोडश ॥३९॥

रूपात्तेजो रसादापो गन्धाद् भूमिः स्वरान्नभः ।
स्पर्शाद् वायुस्तथैवं च पञ्चभ्यो भूतपञ्चकम् ॥४०॥

एवं चतुर्विंशतितत्त्वरुपं निवेदितं सांख्यमते प्रधानम् ।
अन्यस्त्वकर्ता विगुणश्च भोक्ता तत्त्वं पुमान्नित्यचिदभ्युपेतः ॥४१॥

पञ्चविंशतितत्त्वानि संख्ययैवं भवन्ति च ।
प्रधाननरयोश्चात्र वृत्तिः पङ्ग्वन्धयोरिव ॥४२॥

प्रकृति-वियोगो मोक्षः पुरुषस्य बतैतदन्तरज्ञानात् ।
मानत्रितयं चात्र प्रत्यक्षं लैङ्गिकं शाब्दम् ॥४३॥

जैनदर्शनम्

एवं सांख्यमतस्यापि समासो गदितोऽधुना ।
जैनदर्शनसंक्षेपः कथ्यते सुविचारवान् ॥४४॥

जिनेन्द्रो देवता तत्र रागद्वेषविवर्जितः ।
हत-मोह-महामल्लः केवल-ज्ञान-दर्शनः ॥४५॥

सुरासुरेन्द्रसंपूज्यः सद्भूतार्थ-प्रकाशकः ।
कृत्स्न-कर्म-क्षयं कृत्वा संप्राप्तः परमं पदम् ॥४६॥

जीवाजीवौ तथा पुण्यं पापमास्रवसंवरौ ।
बन्धो विनिर्जरामोक्षौ नव तत्त्वानि तन्मते ॥४७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र ज्ञानादिधर्मेभ्यो भिन्नाभिन्नो विवृत्तिमान् ।
शुभाशुभकर्मकर्ता भोक्ता कर्मफलस्य च ॥४८॥

चैतन्यलक्षणो जीवः यश्चैतद्विपरीतवान् ।
अजीवः स समाख्यातः पुण्यं सत्कर्मपुद्गलाः ॥४९॥

पापं तद्विपरीतं तु मिथ्यात्वाद्यास्तु हेतवः ।
ये बन्धस्य स विज्ञेय आस्रवो जिनशासने ॥५०॥

संवरस्तन्निरोधस्तु बन्धो जीवस्य कर्मणः ।
अन्योऽन्यानुगमात्मा तु यः सम्बन्धो द्वयोरपि ॥५१॥

बद्धस्य कर्मणः साटो यस्तु सा निर्जरा मता ।
आत्यन्तिको वियोगस्तु देहादेर्मोक्ष उच्यते ॥५२॥

एतानि नव तत्त्वानि यः श्रद्धाते स्थिराशयः ।
सम्यक्त्वज्ञानयोगेन तस्य चारित्रयोग्यता ॥५३॥

तथाभव्यत्वपाकेन यस्यैतत्त्रितयं भवेत् ।
सम्यग्ज्ञान-क्रियायोगाज्जायते मोक्षभाजनम् ॥५४॥

प्रत्यक्षं च परोक्षं च द्वे प्रमाणे तथा मते ।
अनन्तधर्मकं वस्तु प्रमाणविषयस्त्विह ॥५५॥

अपरोक्षतयार्थस्य ग्राहकं ज्ञानमीदृशम् ।
प्रत्यक्षमितरज्ज्ञेयं परोक्षं ग्रहणेक्षया ॥५६॥

येनोत्पाद-व्यय-ध्रौव्ययुक्तं यत् तत् सदिष्यते ।
अनन्तधर्मकं वस्तु तेनोक्तं मानगोचरः ॥५७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जैनदर्शनसंक्षेप इत्येष गदितोऽनघः ।
पूर्वापरपराघातो यत्र क्वापि न विद्यते ॥५८॥

वैशेषिकदर्शनम्

देवताविषयो भेदो नास्ति नैयायिकैः समम् ।
वैशेषिकाणां तत्त्वे तु विद्यतेऽसौ निदिश्यते ॥५९॥

द्रव्यं गुणस्तथा कर्म सामान्यं च चतुर्थकम् ।
विशेषसमवायौ च तत्त्वषट्कं तु तन्मते ॥६०॥

तत्र द्रव्यं नवधा भूजलतेजोऽनिलान्तरिक्षाणि ।
कालंदिगात्ममनांसि च गुणाः पुनः पञ्चविंशतिधा ॥६१॥

स्पर्श-रस-रुप-गन्धाः शब्दः संख्या विभाग-संयोगे ।
परिमाणं च पृथक्त्वं तथा परत्वापरत्वे च ॥६२॥

बुद्धिः सुखदुःखेच्छाधर्माधर्मप्रयत्नसंस्काराः ।
द्वेषः स्नेहगुरुत्वे द्रवत्ववेगौ गुणा एते ॥६३॥

उत्क्षेपावक्षेपावाकुञ्चनकं प्रसारणं गमनम् ।
पञ्चविधं कर्मैतत् परापरे द्वे तु सामान्ये ॥६४॥

तत्र परं सत्ताख्यं द्रव्यत्वाद्यपरमथ विशेषस्तु ।
निश्चयतो नित्यद्रव्यवृत्तिरन्त्यो विनिर्दिष्टः ॥६५॥

य इहायुतसिद्धानामाधाराधेयभूतभावानाम् ।
सम्बन्ध इह प्रत्ययहेतुः स हि भवति समवायः ॥६६॥

प्रमाणं च द्विधामीषां प्रत्यक्षं लैङ्गिकं तथा ।
वैशेषिकमतस्यैष संक्षेपः परिकीर्तितः ॥६७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मीमांसादर्शनम्

जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविशेषणः ।
देवो न विद्यते कोऽपि यस्य मानं वचो भवेत् ॥६८॥

तस्मादतीन्द्रियार्थानां साक्षाद्द्रष्टुरभावतः ।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः ॥६९॥

अत एव पुरा कार्यो वेदपाठः प्रयत्नतः ।
ततो धर्मस्य जिज्ञासा कर्तव्या धर्मसाधनी ॥७०॥

नोदनालक्षणो धर्मो नोदना तु क्रियां प्रति ।
प्रवर्तकं वचः प्राहुः स्वःकामोऽग्निं यथा यजेद् ॥७१॥

प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥७२॥

तत्र प्रत्यक्षमक्षाणां संप्रयोगे सतां सति ।
आत्मनो बुद्धिजन्मेत्यनुमानं लैङ्गिकं पुनः ॥७३॥

शाब्दं शाश्वतवेदोत्थमुपमानं तु कीर्तितिम् ।
प्रसिद्धार्थस्य साधर्म्यादप्रसिद्धस्य साधनम् ॥७४॥

दृष्टार्थानुपपत्या तु कस्याप्यर्थस्य कल्पना ।
क्रियते यद्बलेनासावर्थापत्तिरुदाहृता ॥७५॥

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता ॥७६॥

जैमिनीयमतस्यापि संक्षेपोऽयं निवेदितः ।
एवमास्तिकवादानां कृतं संक्षेपकीर्तनम् ॥७७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नैयायिकमतादन्ये भेदं वैशेषिकैः सह ।
न मन्यन्ते मते तेषां पञ्चैवास्तिकवादिनः ॥७८॥

षड्दर्शनसंख्या तु पूर्यते तन्मते किल ।
लोकायतमतक्षेपे कथ्यते तेन तन्मतम् ॥७९॥

चार्वाकदर्शनम्

लोकायता वदन्त्येवं नास्ति जीवो न निवृतिः ।
धर्माधर्मो न विद्येते न फलं पुण्यपापयोः ॥८०॥

एतावानेव लोकोऽयं यावानिन्द्रियगोचरः ।
भद्रे ! वृकपदं पश्य यद् वदन्यत्यबहुश्रुताः ॥८१॥

पिब खाद च चारुलोचने ! यदतीतं वरगात्रि ! तन्न ते ।
न हि भीरु ! गतं निवर्तते समुदयमात्रमिदं कलेवरम् ॥८२॥

पृथ्वी जलं तथा तेजो वायुर्भूतचतुष्टयम् ।
आधारो भूमिरेतेषां मानं त्वक्षजमेव हि ॥८३॥

पृथ्व्यादिभूतसंहत्या तथादेहपरिणतेः ।
मदशक्तिः सुराङ्गेभ्यो यद्वत् तद्वच्चिदात्मनि ॥८४॥

तस्माद् दृष्टपरित्यागाद् यददृष्टे प्रवर्तनम् ।
लोकस्य तद् विमूढत्वं चार्वाकाः प्रतिपेदिरे ॥८५॥

साध्यवृत्तिनिवृत्तिभ्यां या प्रीतिर्जायते जने ।
निरर्था सा मते तेषां धर्मः कामात् परो नहि ॥८६॥

लोकायतमतेऽप्येवं संक्षेपोऽयं निवेदितः ।
अभिधेयतात्पर्यार्थः पर्यालोच्यः सुबुद्धिभिः ॥८७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदांतमतम्

लोकायतमतेऽप्येवं संक्षेपोऽयं निवेदितः ।
वेदान्तिनां मतस्यासौ कथ्यमानो निशम्यताम् ॥१॥

वेदान्तिनः पुनः प्राहुरद्वैतमतवादिनः ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥२॥

अनिर्वाच्या हि मायात्र या विवर्तविधायिनी ।
विक्षेपावारशक्तिभ्यां सहिताध्यासकारणम् ॥३॥

आवारशक्तिर्मायायाः प्रोक्ता कर्तृत्वकारणम् ।
शक्तिर्विक्षेपरूपा च प्रपञ्चजननी मता ॥४॥

सर्वसत्त्वानुस्यूतं च ब्रह्मैवैकं च निर्गुणम् ।
सदाशुद्धं स्वतःसिद्धं तद्भिन्नं विद्यते न सत् ॥५॥

श्रवणान्मननाच्चैव निदिध्यासान्निरंतरम् ।
समाधेरप्यनुष्ठानात् प्राप्यते ब्रह्म निश्चयम् ॥६॥

प्रमाणादिव्यवस्था च मीमांसासंमता मता ।
अभिधेयार्थतात्पर्यं पर्यालोच्यं सबुद्धिभिः ॥७॥

वैराग्यरतिनाज्ञेन वेदान्तमतप्रक्रिया ।
संक्षिप्ता पूरिता ह्यत्र बोधाय स्वाल्पमेधसाम् ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणनयतत्त्वालोकः

प्रथमः परिच्छेदः

प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते ॥१॥

स्वपरव्यवसायि ज्ञानं प्रमाणम् ॥२॥

अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं हि प्रमाणम्,
अतो ज्ञानमेवेदम् ॥३॥

न वै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नम्, तस्यार्थान्तरस्येव स्वार्थ-व्यवसितौ साधकतमत्वानुपपत्तेः ॥४॥

न खल्वस्य स्वनिर्णीतौ करणत्वम् स्तम्भादेरिवाचेतनत्वात् ॥५॥

नाप्यर्थनिश्चितौ, स्वनिश्चितावकरणस्य कुम्भादेरिव तत्राप्यकरणत्वात् ॥६॥

तद् व्यवसायस्वभावम्, समारोपपरिपन्थित्वात् प्रमाणत्वाद् वा ॥७॥

अतस्मिंस्तदध्यवसायः समारोपः ॥८॥

स विपर्ययसंशयानध्यवसायभेदात् त्रेधा ॥९॥

विपरीतैककोटिनिष्टङ्कनं विपर्ययः ॥१०॥

यथा शुक्तिकायामिदं रजतमिति ॥११॥

साधकबाधकप्रमाणाभावादनवस्थितानेककोटिसंस्पर्शं ज्ञानं संशयः ॥१२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथाऽयं स्थाणुर्वा पुरुषो वा ॥१३॥

किमित्यालोचनमात्रमनध्यवसायः ॥१४॥

यथा गच्छत्तृणस्पर्शज्ञानम् ॥१५॥

ज्ञानादन्योऽर्थः परः ॥१६॥

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनम्, बाह्यस्येव तदाभिमुख्येन, करिकलभकमहमात्मना जानामि ॥१७॥

कः खलु ज्ञानस्यालम्बनं बाह्यं प्रतिभातमभिमन्यमानस्तदपि तत्प्रकारं नाभिमन्येत ? मिहिरालोकवत् ॥१८॥

ज्ञानस्य प्रमेयाऽव्यभिचारित्वं प्रामाण्यम् ॥१९॥

तदितरत्त्वप्रामाण्यम् ॥२०॥

तदुभयमुत्पत्तौ परत एव, ज्ञप्तौ तु स्वतः परतश्च ॥२१॥

द्वितीयः परिच्छेदः

तद् द्विभेदं प्रत्यक्षं च परोक्षं च ॥१॥

स्पष्टं प्रत्यक्षम् ॥२॥

अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वम् ॥३॥

तद् द्विप्रकारं-सांव्यवहारिकं पारमार्थिकं च ॥४॥

तत्राद्यं द्विविधमिन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च ॥५॥

एतद् द्वितयमवग्रहेहावायधारणाभेदादेकशश्चतुर्विकल्पकम् ॥६॥

विषयविषयिसंनिपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अवगृहीतार्थविशेषाऽऽकाङ्क्षणमीहा ॥८॥

ईहितविशेषनिर्णयोऽवायः ॥९॥

स एव दृढतमावस्थाऽऽपन्नो धारणा ॥१०॥

संशयपूर्वकत्वादीहायाः संशयाद् भेदः ॥११॥

कथञ्चिदभेदेऽपि परिणामविशेषादेषां व्यपदेशभेदः ॥१२॥

असामस्त्येनाप्युत्पद्यमानत्वेनासङ्कीर्णस्वभावतयाऽनुभूयमानत्वात् अपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात् क्रमभावित्वाच्चैते व्यतिरिच्यन्ते ॥१३॥

क्रमोऽप्यमीषामयमेव, तथैव संवेदनात्; एवंक्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्च ॥१४॥

अन्यथा प्रमेयानवगतिप्रसङ्गः ॥१५॥

न खल्वदृष्टमवगृह्यते, न चानवगृहीतं संदिह्यते, न चासंदिग्धमीह्यते, न चानीहितमवेयते, नाप्यनवेतं धार्यते ॥१६॥

क्वचित् क्रमस्यानुपलक्षणमेषामाशूत्पादात्, उत्पलपत्रशतव्यतिभेदक्रमवत् ॥१७॥

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् ॥१८॥

तद् विकलं सकलं च ॥१९॥

तत्र विकलमवधिमनःपर्यायज्ञानरूपतया द्वेधा ॥२०॥

अवधिज्ञानावरणविलयविशेषसमुद्भवं भवगुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम् ॥२१॥

संयमविशुद्धिनिबन्धनाद् विशिष्टावरणविच्छेदाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्यायज्ञानम् ॥२२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सकलं तु सामग्रीविशेषतः समुद्भूतसमस्तावरणक्षयापेक्षं निखिल-द्रव्यपर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् ॥२३॥

तद्वान् अर्हन् निर्दोषत्वात् ॥२४॥

निर्दोषोऽसौ, प्रमाणाविरोधिवाक्त्वात् ॥२५॥

तदिष्टस्य प्रमाणेनाऽबाध्यत्वात् तद्वाचस्तेनाविरोधसिद्धिः ॥२६॥

न च कवलाहारवत्त्वेन तस्याऽसर्वज्ञत्वम्, कवलाहारसर्वज्ञत्वयोर-विरोधात् ॥२७॥

तृतीयः परिच्छेदः

अस्पष्टं परोक्षम् ॥१॥

स्मरण-प्रत्यभिज्ञान-तर्कानुमानागमभेदतस्तत् पञ्चप्रकारम् ॥२॥

तत्र संस्काराप्रबोधसम्भूतमनुभूतार्थविषयं तदित्याकारं वेदनं स्मरणम् ॥३॥

'तत्तीर्थकरबिम्बम्' इति यथा ॥४॥

अनुभवस्मृतिहेतुकं तिर्यगूर्ध्वतासामान्यादिगोचरं, संकलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ॥५॥

'तज्जातीय एवायं गोपिण्डः', 'गोसदृशो गवयः', 'स एवायं जिनदत्तः' इत्यादि ॥६॥

उपलम्भानुपलम्भसम्भवं, त्रिकालीकलितसाध्यसाधनसम्बन्धालम्बनं, 'इदमस्मिन् सत्येव भवति' इत्याद्याकारं संवेदनमूहापरनामा तर्कः ॥७॥

यथा यावान् कश्चिद् धूमः, स सर्वो वह्नौ सत्येव भवतीति तस्मिन्नसति असौ न भवत्येव ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुमानं द्विप्रकारं स्वार्थं परार्थं च ॥९॥

तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्यविज्ञानं स्वार्थम् ॥१०॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ॥११॥

न तु त्रिलक्षणकादिः ॥१२॥

तस्य हेत्वाभासस्यापि सम्भवात् ॥१३॥

अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥१४॥

शङ्कितविपरीतानध्यवसितवस्तूनां साध्यताप्रतिपत्त्यर्थमप्रतीतवचनम् ॥१५॥

प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसज्यतामित्यनिराकृतग्रहणम् ॥१६॥

अनभिमतस्यासाध्यत्वप्रतिपत्तयेऽभीप्सितपदोपादानम् ॥१७॥

व्याप्तिग्रहणसमयाऽपेक्षया साध्यं धर्म एव अन्यथा तदनुपपत्तेः ॥१८॥

न हि यत्र यत्र धूमस्तत्र तत्र चित्रभानोरिव धरित्रीधरस्याप्यनुवृत्तिरस्ति ॥१९॥

आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी ॥२०॥

धर्मिणः प्रसिद्धिः क्वचिद्विकल्पतः, कुत्रचित्प्रमाणतः, क्वापि विकल्प-प्रमाणाभ्याम् ॥२१॥

यथा समस्ति समस्तवस्तुवेदी, क्षितिधरकन्धरेयं धूमध्वजवती, ध्वनिः परिणतिमान् ॥२२॥

पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात् ॥२३॥

साध्यस्य प्रतिनियतधर्मिसम्बन्धिताप्रसिद्धये हेतोरुपसंहारवचनवत् पक्ष-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रयोगोऽप्यवश्यमाश्रयितव्यः ॥२४॥

त्रिविधं साधनमभिधायैव तत्समर्थनं विदधानः कः खलु न पक्षप्रयोग-मङ्गीकुरुते ? ॥२५॥

प्रत्यक्षपरिच्छिन्नार्थाभिधायि वचनं परार्थं प्रत्यक्षं परप्रत्यक्षहेतुत्वात् ॥२६॥

यथा पश्य पुरः स्फुरत्किरणमणिखण्डमण्डिताभरणभारिणीं जिनपति-प्रतिमाम् ॥२७॥

पक्षहेतुवचनलक्षणमवयवद्वयमेव परप्रतिपत्तेरङ्गं न दृष्टान्तादिवचनम् ॥२८॥

हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः ॥२९॥

सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः, असति साध्ये हेतोरनुप-पत्तिरेवान्यथानुपपत्तिः ॥३०॥

यथा कृशानुमानयं पाकप्रदेशः, सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेः, असत्यनुपपत्तेर्वा ॥३१॥

अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्रानुपयोगः ॥३२॥

न दृष्टान्तवचनं परप्रतिपत्तये प्रभवति, तस्यां पक्षहेतुवचनयोरेव व्यापारोप-लब्धेः ॥३३॥

न च हेतोरन्यथानुपपत्तिनिर्णीतये, यथोक्तर्कप्रमाणादेव तदुपपत्तेः ॥३४॥

नियतैकविशेषस्वभावे च दृष्टान्ते साकल्येन व्याप्तेरयोगतो विप्रतिपत्तौ तदन्तरापेक्षायामनवस्थितेर्दुर्निवारः समवतारः ॥३५॥

नाप्यविनाभावस्मृतये, प्रतिपन्नप्रतिबन्धस्य व्युत्पन्नमतेः पक्षहेतुप्रदर्शनेनैव तत्प्रसिद्धेः ॥३६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्तर्व्याप्त्या हेतोः साध्यप्रत्यायने शक्तावशक्तौ च बहिर्व्याप्तेरुद्भावनं व्यर्थम् ॥३७॥

पक्षीकृत एव विषये साधनस्य साध्येन व्याप्तिरन्तर्व्याप्तिः, अन्यत्र तु बहिर्व्याप्तिः ॥३८॥

यथाऽनेकान्तात्मकं वस्तु, सत्त्वस्य तथैवोपपत्तेरिति, अग्निमानयं देशः धूमवत्त्वात्, य एवं स एवं, यथा पाकस्थानमिति च ॥३९॥

नोपनयनिगमनयोरपि परप्रतिपत्तौ सामर्थ्यं पक्षहेतुप्रयोगादेव तस्याः-सद्भावात् ॥४०॥

समर्थनमेव परप्रतिपत्त्यङ्गमास्तां, तदन्तरेण दृष्टान्तादिप्रयोगेऽपि तद-सम्भवात् ॥४१॥

मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनयनिगमनान्यपि प्रयोज्यानि ॥४२॥

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः ॥४३॥

स द्वेधा साधर्म्यतो वैधर्म्यतश्च ॥४४॥

यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते, स साधर्म्यदृष्टान्तः ॥४५॥

यथा यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसः ॥४६॥

यत्र तु साध्याभावे साधनस्यावश्यमभावः प्रदर्श्यते स वैधर्म्यदृष्टान्तः ॥४७॥

यथा-अग्न्यभावे न भवत्येव धूमः, यथा जलाशये ॥४८॥

हेतोः साध्यधर्मिण्युपसंहरणमुपनयः ॥४९॥

यथा धूमश्चात्र प्रदेशे ॥५०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साध्यधर्मस्य पुनर्निगमनम् ॥५१॥

यथा-तस्मादग्निरत्र ॥५२॥

एते पक्षप्रयोगादयः पञ्चाप्यवयवसंज्ञया कीर्त्यन्ते ॥५३॥

उक्तलक्षणो हेतुर्द्विप्रकारः-उपलब्ध्यनुपलब्धिभ्यां भिद्यमानत्वात् ॥५४॥

उपलब्धिर्विधिनिषेधयोः सिद्धिनिबन्धनमनुपलब्धिश्च ॥५५॥

विधिः सदंशः ॥५६॥

प्रतिषेधोऽसदंशः ॥५७॥

स चतुर्धा-प्रागभावः, प्रध्वंसाभाव, इतरेतराभावोऽत्यन्ताभावश्च ॥५८॥

यन्निवृत्तावेव कार्यस्य समुत्पत्तिः, सोऽस्य प्रागभावः ॥५९॥

यथा मृत्पिण्डनिवृत्तावेव समुत्पद्यमानस्य घटस्य मृत्पिण्डः ॥६०॥

यदुत्पत्तौ कार्यस्यावश्यं विपत्तिः, सोऽस्य प्रध्वंसाभावः ॥६१॥

यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्यमानस्य कलशस्य कपाल-कदम्बकम् ॥६२॥

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः ॥६३॥

यथा स्तम्भस्वभावात् कुम्भस्वभावव्यावृत्तिः ॥६४॥

कालत्रयाऽपेक्षिणी हि तादात्म्यपरिणामनिवृत्तिरत्यन्ताभावः ॥६५॥

यथा चेतनाचेतनयोः ॥६६॥

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरुद्धोपलब्धिश्च ॥६७॥

तत्राविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ॥६८॥

साध्येनाविरुद्धानां व्याप्यकार्यकारणपूर्वचरोत्तरचरसहचराणामुपलब्धिः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

॥६९॥

तमस्विन्यामास्वाद्यमानादाम्रादिफलरसादेकसामग्र्यनुमित्या रूपाद्यनुमितिमभिमन्यमानैरभिमतमेव किमपि कारणं हेतुतया यत्र शक्तेरप्रतिस्खलनमपरकारणसाकल्यं च ॥७०॥

पूर्वचरोत्तरचरयोर्न स्वभावकार्यकारणभावौ, तयोः कालव्यवहितावनुपलम्भात् ॥७१॥

न चातिक्रान्तानागतयोर्जाग्रद्दशासंवेदनमरणयोः प्रबोधोत्पातौ प्रति कारणत्वं, व्यवहितत्वेन निर्व्यापारत्वात् ॥७२॥

स्वव्यापारापेक्षिणी हि कार्यं प्रति पदार्थस्य कारणत्वव्यवस्था, कुलालस्येव कलशं प्रति ॥७३॥

न च व्यवहितयोस्तयोर्व्यापारपरिकल्पनं न्याय्यमतिप्रसक्तेः ॥७४॥

परम्पराव्यवहितानां परेषामपि तत्कल्पनस्य निवारयितुमशक्यत्वात् ॥७५॥

सहचारिणोः परस्परस्वरूपपरित्यागेन तादात्म्यानुपपत्तेः, सहोत्पादेन तदुत्पत्तिविपत्तेश्च सहचरहेतोरपि प्रोक्तेषु नानुप्रवेशः ॥७६॥

ध्वनिः परिणतिमान् प्रयत्नानन्तरीयकत्वात्, यः प्रयत्नानन्तरीयकः, स परिणतिमान्, यथा स्तम्भः । यो वा न परिणतिमान्, स न प्रयत्नान्तरीयकः यथा वान्ध्येयः । प्रयत्नानन्तरीयकश्च ध्वनिः, तस्मात् परिणतिमानिति व्याप्यस्य साध्येनाविरुद्धस्योपलब्धिः साधर्म्येण वैधर्म्येण च ॥७७॥

अस्त्यत्र गिरिनिकुञ्जे धनञ्जयो धूमसमुपलम्भादिति कार्यस्य ॥७८॥

भविष्यति वर्षं तथाविधवारिवाहविलोकनादिति कारणस्य ॥७९॥

उदेष्यति मुहूर्तान्ते तिष्यतारकाः, पुनर्वसूदयदर्शनादिति पूर्वचरस्य ॥८०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदगुर्मुहूर्त्तात्पूर्वं पूर्वफल्गुन्य उत्तरफल्गुनीनामुद्गमोपलब्धेरित्युत्तरचरस्य ॥८१॥

अस्तीह सहकारफले रूपविशेषः, समास्वाद्यमानरसविशेषादिति सहचरस्य ॥८२॥

विरुद्धोपलब्धिस्तु प्रतिषेधप्रतिपत्तौ सप्तप्रकारा ॥८३॥

तत्राद्या स्वभावविरुद्धोपलब्धिः ॥८४॥

यथा नास्त्येव सर्वथैकान्तोऽनेकान्तोपलम्भात् ॥८५॥

प्रतिषेध्यविरुद्धव्याप्तादीनामुपलब्ध्यः षट् ॥८६॥

विरुद्धव्याप्तोपलब्धिर्यथा नास्ति अस्य पुंसस्तत्त्वेषु निश्चयस्तत्र सन्देहात् ॥८७॥

विरुद्धकार्योपलब्धिर्यथा—न विद्यतेऽस्य क्रोधाद्युपशान्तिर्वदनविकारादेः (दर्शनात्) ॥८८॥

विरुद्धकारणोपलब्धिर्यथा—नास्य महर्षेरसत्यं वचः समस्ति, रागद्वेष-कालुष्याऽकलङ्कितज्ञानसंपन्नत्वात् ॥८९॥

विरुद्धपूर्वचरोपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते पुष्यतारा, रोहिण्युद्-गमात् ॥९०॥

विरुद्धोतरचरोपलब्धिर्यथा—नोदगान्मुहूर्तात्पूर्वं मृगशिरः, पूर्वफल्गुन्यु-दयात् ॥९१॥

विरुद्धसहचरोपलब्धिर्यथा—नास्त्यस्य मिथ्याज्ञानं, सम्यग्दर्शनात् ॥९२॥

अनुपलब्धेरपि द्वैरुप्यम्, अविरुद्धानुपलब्धिर्विरुद्धानुपलब्धिश्च ॥९३॥

तत्राविरुद्धानुपलब्धिः प्रतिषेधावबोधे सप्तप्रकारा ॥९४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिषेध्येनाविरुद्धानां स्वभावव्यापककार्यकारणपूर्वचरोत्तरचरसहचराणा-मनुपलब्धिः ॥९५॥

स्वभावानुपलब्धिर्यथा—नास्त्यत्र भूतले कुम्भ उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्यानुपलम्भात् ॥९६॥

व्यापकानुपलब्धिर्यथा—नास्त्यत्र प्रदेशे पनसः पादपानुपलब्धेः ॥९७॥

कार्यानुपलब्धिर्यथा—नास्त्यत्राप्रतिहतशक्तिकं बीजमङ्कुरानवलोकनात् ॥९८॥

कारणानुपलब्धिर्यथा—न सन्त्यस्य प्रशमप्रभृतयो भावास्तत्त्वार्थश्रद्धाना-भावात् ॥९९॥

पूर्वचरानुपलब्धिर्यथा—नोद्गमिष्यति मुहूर्तान्ते स्वातिनक्षत्रं चित्रोदया-दयाऽदर्शनात् ॥१००॥

उत्तरचरानुपलब्धिर्यथा—नोदगमत् पूर्वभद्रपदा मुहूर्तात्पूर्वमुत्तरभद्रपदोद्-गमानवगमात् ॥१०१॥

सहचरानुपलब्धिर्यथा—नास्त्यस्य सम्यग्ज्ञानं, सम्यग्दर्शनानुपलब्धेः ॥१०२॥

विरुद्धानुपलब्धिस्तु विधिप्रतीतौ पञ्चधा ॥१०३॥

विरुद्धकार्यकारणस्वभावव्यापकसहचरानुपलम्भभेदात् ॥१०४॥

विरुद्धकार्यानुपलब्धिर्यथा-अत्र शरीरिणि रोगातिशयः समस्ति, नीरोग-व्यापारानुपलब्धेः ॥१०५॥

विरुद्धकारणानुपलब्धिर्यथा—विद्यतेऽत्र प्राणिनि कष्टम्, इष्टसंयोगा-ऽभावात् ॥१०६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विरुद्धस्वभावानुपलब्धिर्यथा—वस्तुजातमनेकान्तात्मकम्, एकान्तस्व-भावानुपलम्भात् ॥१०७॥

विरुद्धव्यापकानुपलब्धिर्यथा—अस्त्यत्र छाया, औष्ण्यानुपलब्धेः ॥१०८॥

विरुद्धसहचरानुपलब्धिर्यथा—अस्त्यस्य मिथ्याज्ञानम्, सम्यग्दर्शना-नुपलब्धेः ॥१०९॥

चतुर्थः परिच्छेदः

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ॥१॥

उपाचारादाप्तवचनं च ॥२॥

समस्त्यत्र प्रदेशे रत्ननिधानम्, सन्ति रत्नसानुप्रभूतयः ॥३॥

अभिधेयं वस्तु यथावस्थितं यो जानीते, यथाज्ञानं चाभिधत्ते, स आप्तः ॥४॥

तस्य हि वचनमविसंवादि भवति ॥५॥

स च द्वेधा, लौकिको लोकोत्तरश्च ॥६॥

लौकिको जनकादिर्लोकोत्तरस्तु तीर्थङ्करादिः ॥७॥

वर्णपदवाक्यात्मकं वचनम् ॥८॥

अकारादिः पौद्गलिको वर्णः ॥९॥

वर्णानामन्योन्यापेक्षाणां निरपेक्षा संहतिः पदम्, पदानां तु वाक्यम् ॥१०॥

स्वाभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः ॥११॥

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवद् यथार्थायथार्थत्वे पुनः पुरुषगुणदोषावनुसरतः ॥१२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सर्वत्रायं ध्वनिर्विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति ॥१३॥

एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोः समस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितः सप्तधा वाक्यप्रयोगः सप्तभङ्गी ॥१४॥

तद्यथा-स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमो भङ्गः ॥१५॥

स्यान्नास्त्येव सर्वमिति निषेधकल्पनया द्वितीयः ॥१६॥

स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेधकल्पनया तृतीयः ॥१७॥

स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः ॥१८॥

स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः ॥१९॥

स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेध-कल्पनया च षष्ठः ॥२०॥

स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तम इति ॥२१॥

विधिप्रधान एव ध्वनिरिति न साधु ॥२२॥

निषेधस्य तस्मादप्रतिपत्तिप्रसक्तेः ॥२३॥

अप्राधान्येनैव ध्वनिस्तमभिधत्ते इत्यप्यसारम् ॥२४॥

क्वचित् कदाचित् कथञ्चित् प्राधान्येनाप्रतिपन्नस्य तस्याप्राधान्यानुपपत्तेः ॥२५॥

निषेधप्रधान एव शब्द इत्यापि प्रागुक्तन्यायादपास्तम् ॥२६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रमादुभयप्रधान एवायमित्यपि न साधीयः ॥२७॥

अस्य विधिनिषेधान्यतरप्रधानत्वानुभवस्याप्यबाध्यमानत्वात् ॥२८॥

युगपद्विधिनिषेधात्मनोऽर्थस्यावाचक एवासाविति च न चतुरस्रम् ॥२९॥

तस्यावक्तव्यशब्देनाप्यवाच्यत्वप्रसङ्गात् ॥३०॥

विध्यात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एव स इत्येकान्तोऽपि न कान्तः ॥३१॥

निषेधात्मनः सह द्वयात्मनश्चार्थस्य वाचकत्वावाचकत्वाभ्यामपि शब्दस्य प्रतीयमानत्वात् ॥३२॥

निषेधात्मनोऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एवायमित्यप्य-वधारणं न रमणीयम् ॥३३॥

इतरथापि संवेदनात् ॥३४॥

क्रमाक्रमाभ्यामुभयस्वभावस्य भावस्य वाचकश्चावाचकश्च ध्वनिर्नान्य-थेत्यपि मिथ्या ॥३५॥

विधिमात्रादिप्रधानतयाऽपि तस्य प्रसिद्धेः ॥३६॥

एकत्र वस्तुनि विधीयमाननिषिध्यमानानन्तधर्माभ्युपगमेनानन्तभङ्गी-प्रसङ्गादसङ्गतैव सप्तभङ्गीति न चेतसि निधेयम् ॥३७॥

विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तुन्यनन्तानामपि सप्तभङ्गीनामेव सम्भवात् ॥३८॥

प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्तानामेव सम्भवात् ॥३९॥

तेषामपि सप्तत्वं सप्तविधतज्जिज्ञासानियमात् ॥४०॥

तस्या अपि सप्तविधत्वं सप्तधैव तत्सन्देहसमुत्पादात् ॥४१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्यापि सप्तप्रकारत्वनियमः स्वगोचरवस्तुधर्माणां सप्तविधत्व-स्यैवोपपत्तेः ॥४२॥

इयं सप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च ॥४३॥

प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनः कालादिभिरभेदवृत्तिप्राधान्याद-भेदोपचाराद् वा यौगपद्येन प्रतिपादकं वचः सकलादेशः ॥४४॥

तद्विपरीतस्तु विकलादेशः ॥४५॥

तद् द्विभेदमपि प्रमाणमात्मीयप्रतिबन्धकापगमविशेषस्वरुपसामर्थ्यतः प्रतिनियतमर्थमवद्योतयति ॥४६॥

न तदुत्पत्तितदाकाराभ्याम्, तयोः पार्थक्येन सामस्त्येन च व्यभिचारोप-लम्भात् ॥४७॥

पञ्चमः परिच्छेदः

तस्य विषयः सामान्यविशेषाद्यनेकान्तात्मकं वस्तु ॥१॥

अनुगतविशिष्टाकारप्रतीतिविषयत्वात् प्राचीनोत्तराकारपरित्यागोपा-दानावस्थानस्वरूपपरिणत्याऽर्थक्रियासामर्थ्यघटनाच्च ॥२॥

सामान्यं द्विप्रकारं तिर्यक्सामान्यमूर्ध्वतासामान्यं च ॥३॥

प्रतिव्यक्ति तुल्या परिणतिस्तिर्यक्सामान्यम्, शबलशाबलेयादिपिण्डेषु गोत्वं यथा ॥४॥

पूर्वापरपरिणामसाधारणं द्रव्यमूर्ध्वतासामान्यं कटककङ्कणाद्यनुगामि-काञ्चनवत् ॥५॥

विशेषोऽपि द्विरूपो गुणः पर्यायश्च ॥६॥

गुणः सहभावी धर्मो यथाऽऽत्मनि विज्ञानव्यक्तिशक्त्यादिः ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पर्यायस्तु क्रमभावी यथा तत्रैव सुखदुःखादिः ॥८॥

षष्ठः परिच्छेदः

यत्प्रमाणेन प्रसाध्यते तदस्य फलम् ॥१॥

तद् द्विविधमानन्तर्येण पारम्पर्येण च ॥२॥

तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् ॥३॥

पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यम् ॥४॥

शेषप्रमाणानां पुनरुपादानहानोपेक्षाबुद्धयः ॥५॥

तत्प्रमाणतः स्याद् भिन्नमभिन्नं च प्रमाणफलत्वान्यथानुपपत्तेः ॥६॥

उपादानबुद्ध्यादिना प्रमाणाद् भिन्नेन व्यवहितफलेन हेतोर्व्यभिचार इति न विभावनीयम् ॥७॥

तस्यैकप्रमातृतादात्म्येन प्रमाणादभेदव्यवस्थितेः ॥८॥

प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेः ॥९॥

यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्षते चेति सर्वसंव्यवहारिभिरस्खलितमनुभवात् ॥१०॥

इतरथा स्वपरयोः प्रमाणफलव्यवस्थाविप्लवः प्रसज्येत ॥११॥

अज्ञाननिवृत्तिस्वरूपेण प्रमाणादभिन्नेन साक्षात्फलेन साधनस्यानेकान्त इति नाशङ्कनीयम् ॥१२॥

कथञ्चित्तस्यापि प्रमाणाद् भेदेन व्यवस्थानात् ॥१३॥

साध्यसाधनभावेन प्रमाणफलयोः प्रतीयमानत्वात् ॥१४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणं हि करणाख्यं साधनम् स्वपरव्यवसितौ साधकतमत्वात् ॥१५॥

स्वपरव्यवसितिक्रियारूपाज्ञाननिवृत्त्याख्यं फलं तु साध्यम् प्रमाण-निष्पाद्यत्वात् ॥१६॥

प्रमातुरपि स्वपरव्यवसितिक्रियायाः कथञ्चिद् भेदः ॥१७॥

कर्तृक्रिययोः साध्य-साधकभावेनोपलम्भात् ॥१८॥

कर्ता हि साधकः, स्वतन्त्रत्वात्; क्रिया तु साध्या, कर्तृनिर्वर्त्यत्वात् ॥१९॥

न च क्रिया क्रियावतः सकाशादभिन्नैव, भिन्नैव वा, प्रतिनियतक्रिया-क्रियावद्भावभङ्गप्रसङ्गात् ॥२०॥

संवृत्या प्रमाणफलव्यवहार इत्यप्रामाणिकप्रलापः, परमार्थतः स्वाभि-मतसिद्धिविरोधात् ॥२१॥

ततः पारमार्थिक एव प्रमाणफलव्यवहारः सकलपुरुषार्थसिद्धिहेतुः स्वीकर्तव्यः ॥२२॥

प्रमाणस्य स्वरूपादिचतुष्टयाद्विपरीतं तदाभासम् ॥२३॥

अज्ञानात्मकानात्मप्रकाशकस्वमात्रावभासनिर्विकल्पकसमारोपाः प्रमाणस्य स्वरूपाभासाः ॥२४॥

यथा सन्निकर्षाद्यस्वसंविदितपरानवभासक-ज्ञान-दर्शन-विपर्यय-संशयानध्यवसायाः ॥२५॥

तेभ्यः स्वपरव्यवसायस्यानुपपत्तेः ॥२६॥

सांव्यवहारिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥२७॥

यथाऽम्बुधरेषु गन्धर्वनगरज्ञानं, दुःखे सुखज्ञानं च ॥२८॥

पारमार्थिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥२९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यथा शिवाख्यस्य राजर्षेरसंख्यातद्वीपसमुद्रेषु, सप्तद्वीपसमुद्रज्ञानम् ॥३०॥

अननुभूते वस्तुनि तदितिज्ञानं स्मरणाभासम् ॥३१॥

अननुभूते मुनिमण्डले तन्मुनिमण्डलमिति यथा ॥३२॥

तुल्ये पदार्थे स एवायमिति, एकस्मिंश्च तेन तुल्य इत्यादिज्ञानं प्रत्यभिज्ञानाभासम् ॥३३॥

यमलकजातवत् ॥३४॥

असत्यामपि व्याप्तौ तदवभासस्तर्काभासः ॥३५॥

स श्यामो मैत्रतनयत्वादित्यत्र यावान्मैत्रतनयः स श्याम इति यथा ॥३६॥

पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमवसेयम् ॥३७॥

तत्र प्रतीतनिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाभासाः ॥३८॥

प्रतीतसाध्यधर्मविशेषणो यथाऽऽर्हतान् प्रत्यवधारणवर्जं परेण प्रयुज्यमानः समस्ति जीव इत्यादिः ॥३९॥

निराकृतसाध्यधर्मविशेषणः प्रत्यक्षानुमानागमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादनेकप्रकारः ॥४०॥

प्रत्यक्षनिराकृतसाध्यधर्मविशेषणो यथा नास्ति भूतविलक्षण आत्मा ॥४१॥

अनुमाननिराकृतसाध्यधर्मविशेषणो यथा नास्ति सर्वज्ञो वीतरागो वा ॥४२॥

आगमनिराकृतसाध्यधर्मविशेषणो यथा जैनेन रजनीभोजनं भजनीयम् ॥४३॥

लोकनिराकृतसाध्यधर्मविशेषणो यथा न पारमार्थिकः प्रमाण-प्रमेयव्यवहारः ॥४४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्ववचननिराकृतसाध्यधर्मविशेषणो यथा नास्ति प्रमेयपरिच्छेदकं प्रमाणम् ॥४५॥

अनभीप्सितसाध्यधर्मविशेषणो यथा स्याद्वादिनः शाश्वतिक एव कलशादिरशाश्वतिक एव वेति वदतः ॥४६॥

असिद्धविरुद्धानैकान्तिकास्त्रयो हेत्वाभासाः ॥४७॥

यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयते सोऽसिद्धः ॥४८॥

स द्विविध उभयासिद्धोऽन्यतरासिद्धश्च ॥४९॥

उभयासिद्धो-यथा परिणामी शब्दश्चाक्षुषत्वात् ॥५०॥

अन्यतरासिद्धो यथा अचेतनास्तरवो विज्ञानेन्द्रियायुर्निरोधलक्षणमरण-रहितत्वात् ॥५१॥

साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यवसीयते स विरुद्धः ॥५२॥

यथा नित्य एव पुरुषोऽनित्य एव वा, प्रत्यभिज्ञानादिसत्त्वात् ॥५३॥

यस्यान्यथानुपपत्तिः सन्दिह्यते सोऽनैकान्तिकः ॥५४॥

स द्वेधा-निर्णीतविपक्षवृत्तिकः, सन्दिग्धविपक्षवृत्तिकश्च ॥५५॥

निर्णीतविपक्षवृत्तिको यथा-नित्यः शब्दः प्रमेयत्वात् ॥५६॥

सन्दिग्धविपक्षवृत्तिको यथा-विवादपदापन्नः पुरुषः सर्वज्ञो न भवति वक्तृत्वात् ॥५७॥

साधर्म्येण दृष्टान्ताभासो नवप्रकारः ॥५८॥

साध्यधर्मविकलः साधनधर्मविकलः उभयधर्मविकलः सन्दिग्ध-साध्यधर्मा सन्दिग्धसाधनधर्मा सन्दिग्धोभयधर्मा अनन्वयोऽप्रदर्शितान्वयो विपरीतान्वयश्चेति ॥५९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्रापौरुषेयः शब्दोऽमूर्तत्वात् दुःखवदिति साध्यधर्मविकलः ॥६०॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्मविकलः ॥६१॥

कलशवदित्युभयधर्मविकलः ॥६२॥

रागादिमानयं वक्तृत्वात् देवदत्तवदिति सन्दिग्धसाध्यधर्मा ॥६३॥

मरणधर्माऽयं रागादिमत्त्वात् मैत्रवदिति सन्दिग्धसाधनधर्मा ॥६४॥

नायं सर्वदर्शी रागादिमत्त्वात् मुनिविशेषवदिति सन्दिग्धोभयधर्मा ॥६५॥

रागादिमान् विवक्षितपुरुषो वक्तृत्वादिष्टपुरुषवदित्यनन्वयः ॥६६॥

अनित्यः शब्दः कृतकत्वात् पटवदित्यप्रदर्शितान्वयः ॥६७॥

अनित्यः शब्दः कृतकत्वात्, यदनित्यं तत् कृतकं घटवदिति विपरीतान्वयः ॥६८॥

वैधर्म्येणापि दृष्टान्ताभासो नवधा ॥६९॥

असिद्धसाध्यव्यतिरेकोऽसिद्धसाधनव्यतिरेकोऽसिद्धोभयव्यतिरेकः, सन्दिग्धसाध्यव्यतिरेकः, सन्दिग्धसाधनव्यतिरेकः, सन्दिग्धोभयव्यतिरेकोऽव्यतिरेकोऽप्रदर्शितव्यतिरेको विपरीतव्यतिरेकश्च ॥७०॥

तेषु भ्रान्तमनुमानं प्रमाणत्वात्, यत्पुनर्भ्रान्तं न भवति न तत्प्रमाणं, यथा स्वप्नज्ञानमिति असिद्धसाध्यव्यतिरेकः स्वप्नज्ञानात् भ्रान्तत्वस्यानिवृत्तेः ॥७१॥

निर्विकल्पकं प्रत्यक्षं प्रमाणत्वाद्, यत् तु सविकल्पकं न तत्प्रमाणं, यथा लैङ्गिकमित्यसिद्धसाधनव्यतिरेको लैङ्गिकात् प्रमाणत्वस्यानिवृत्तेः ॥७२॥

नित्यानित्यः शब्दः सत्त्वात्, यस्तु न नित्यानित्यः स न संस्तद्यथा स्तम्भ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यसिद्धोभयव्यतिरेकः स्तम्भान्नित्यानित्यत्वस्य सत्त्वस्य चाव्यावृत्तेः ॥७३॥

असर्वज्ञोऽनाप्तो वा कपिलोऽक्षणिकैकान्तवादित्वाद्, यः सर्वज्ञ आप्तो वा स क्षणिकैकान्तवादी यथा सुगत इति सन्दिग्धसाध्यव्यतिरेकः सुगतेऽसर्वज्ञतानाप्तत्वयोः साध्यधर्मयोर्व्यावृत्तेः सन्देहात् ॥७४॥

अनादेयवचनः कश्चिद् विवक्षितपुरुषो रागादिमत्त्वाद्, यः पुनरादेयवचनः स वीतरागस्तद्यथा शौद्धोदनिरिति सन्दिग्धसाधनव्यतिरेकः, शौद्धोदनौ रागादिमत्त्वस्य निवृत्तेः संशयात् ॥७५॥

न वीतरागः कपिलः करुणास्पदेष्वपि परमकृपयाऽनर्पितनिजपिशित-शकलत्वात्, यस्तु वीतरागः स करुणास्पदेषु परमकृपया समर्पितनिजपि-शितशकलस्तद्यथा तपनबन्धुरिति सन्दिग्धोभयव्यतिरेक इति तपनबन्धौ वीतरागात्वाभावस्य करुणास्पदेष्वपि परमकृपयाऽनर्पितनिजपिशित-शकलत्वस्य च व्यावृत्तेः सन्देहात् ॥७६॥

न वीतरागः कश्चिद् विवक्षितः पुरुषो वक्तृत्वात्, यः पुनर्वीतरागो न स वक्ता यथोपलखण्ड इत्यव्यतिरेकः ॥७७॥

अनित्यः शब्दः कृतकत्वादाकाशवदित्यप्रदर्शितव्यतिरेकः ॥७८॥

अनित्यः शब्दः कृतकत्वाद्यदकृतकं तन्नित्यं यथाऽऽकाशमिति विपरीत-व्यतिरेकः ॥७९॥

उक्तलक्षणोल्लङ्घनेनोपनयनिगमनयोर्वचने तदाभासौ ॥८०॥

यता परिणामी शब्दः कृतकत्वाद्, यः कृतकः स परिणामी, यथा कुम्भ इत्यत्र परिणामी च शब्द इति कृतकश्च कुम्भ इति च ॥८१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मिन्नेव प्रयोगे तस्मात् कृतकः शब्द इति, तस्मात् परिणामी कुम्भ इति च ॥८२॥

अनाप्तवचनप्रभवं ज्ञानामागमाभासम् ॥८३॥

यथा मेलककन्यकायाः कूले तालहिन्तालयोर्मूले सुलभाः पिण्डखर्जुराः सन्ति, त्वरितं गच्छत गच्छत शावकाः ॥८४॥

प्रत्यक्षमेवैकं प्रमाणमित्यादिसंख्यानं तस्य संख्याभासम् ॥८५॥

सामान्यमेव, विशेष एव, तद्द्वयं वा स्वतन्त्रमित्यादिस्तस्य विषयाभासः ॥८६॥

अभिन्नमेव, भिन्नमेव, वा प्रमाणात् फलं तस्य तदाभासम् ॥८७॥

सप्तमः परिच्छेदः

नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः ॥७॥

स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः ॥२॥

स व्याससमासाभ्यां द्विप्रकारः ॥३॥

व्यासतोऽनेकविकल्पः ॥४॥

समासतस्तु द्विभेदो द्रव्यार्थिकः पर्यायार्थिकश्च ॥५॥

आद्यो नैगमसङ्ग्रहव्यवहारभेदात् त्रेधा ॥६॥

धर्मयोर्धर्मिणोर्धर्मधर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सच्चैतन्यमात्मनीति धर्मयोः ॥८॥

वस्तुपर्यायवद् द्रव्यमिति धर्मिणोः ॥९॥

क्षणमेकं सुखी विषयासक्तजीव इति धर्मधर्मिणोः ॥१०॥

धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः ॥११॥

यथात्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादिः ॥१२॥

सामान्यमात्रग्राही परामर्शः सङ्ग्रहः ॥१३॥

अयमुभयविकल्पः परोऽपरश्च ॥१४॥

अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसङ्ग्रहः ॥१५॥

विश्वमेकं सदविशेषादिति यथा ॥१६॥

सत्ताऽद्वैतं स्वीकुर्वाणः सकलविशेषान्निराचक्षाणस्तदाभासः ॥१७॥

यथा सत्तैव तत्त्वं, ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥१८॥

द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसङ्ग्रहः ॥१९॥

धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिर्यथा ॥२०॥

द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः ॥२१॥

यथा द्रव्यत्वमेव तत्त्वं, ततोऽर्थान्तरभूतानां द्रव्याणामनुपलब्धेरित्यादिः ॥२२॥

सङ्ग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रियते स व्यवहारः ॥२३॥

यथा यत् सत्, तद् द्रव्यं पर्यायो वेत्यादिः ॥२४॥

यः पुनरपारमार्थिकद्रव्यपर्यायविभागमभिप्रैति स व्यवहाराभासः ॥२५॥

यथा चार्वाकदर्शनम् ॥२६॥

पर्यायार्थिकश्चतुर्धा ऋजुसूत्रः शब्दः समभिरूढ एवम्भूतश्च ॥२७॥

ऋजु वर्तमानक्षणस्थायि पर्यायमात्रं प्राधान्यतः सूत्रयन्नभिप्राय ऋजुसूत्रः ॥२८॥

यथा सुखविवर्तः सम्प्रत्यस्तीत्यादिः ॥२९॥

सर्वथा द्रव्यापलापी तदाभासः ॥३०॥

यथा तथागतमतम् ॥३१॥

कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥३२॥

यथा-बभूव भवति भविष्यति सुमेरित्यादिः ॥३३॥

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः ॥३४॥

यथा बभूव भवति भविष्यति सुमेरुरित्यादयो भिन्नकालाः शब्दा भिन्नममेवार्थमभिदधति भिन्नकालशब्दत्वात् तादृक्सिद्धान्यशब्दवदित्यादिः ॥३५॥

पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं समभिरोहन् समभिरूढः ॥३६॥

इन्दनादिन्द्रः, शकनाच्छक्रः पूर्दारणात् पुरन्दर इत्यादिषु यथा ॥३७॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकुर्वाणस्तदाभासः ॥३८॥

यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दाः भिन्नाभिधेया एव, भिन्न-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दत्वाद् करिकुरङ्गतुरङ्गशब्दवदित्यादिः ॥३९॥

शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवम्भूतः ॥४०॥

यथेन्दनमनुभवन्निन्द्रः, शकनक्रियापरिणतः शक्रः, पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते ॥४१॥

क्रियाऽनाविष्टं वस्तु शब्दवाच्यतया प्रतिक्षिपंस्तु तदाभासः ॥४२॥

यथा विशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं, घटशब्दप्रवृत्ति-निमित्तभूतक्रियाशून्यत्वात् पटवदित्यादिः ॥४३॥

एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः ॥४४॥

शेषास्तु त्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥४५॥

पूर्वः पूर्वो नयः प्रचुरगोचरः, परः परस्तु परिमितविषयः ॥४६॥

सन्मात्रगोचरात् सङ्ग्रहान्नैगमो भावाभावभूमिकत्वाद् भूमविषयः ॥४७॥

सद्विशेषप्रकाशकाद् व्यवहारतः सङ्ग्रहः समस्तसत्समूहोपदर्शकत्वाद् बहुविषयः ॥८॥

वर्तमानविषयादृजुसूत्राद् व्यवहारस्त्रिकालविषयावलम्बित्वादनल्पार्थः ॥४९॥

कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृऋजुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः ॥५०॥

प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभिरूढाच्छब्दस्तद्विपर्ययानुयायित्वात् प्रभूतविषयः ॥५१॥

प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवम्भूतात् समभिरूढस्तदन्यथाऽर्थ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थापकत्वान्महागोचरः ॥५२॥

नयवाक्यमपि स्वविषये प्रवर्तमानं विधिप्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति ॥५३॥

प्रमाणवदस्य फलं व्यवस्थापनीयम् ॥५४॥

प्रमाता प्रत्यक्षादिप्रसिद्ध आत्मा ॥५५॥

चैतन्यस्वरूपः परिणामी कर्ता साक्षाद्भोक्ता स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलिकादृष्टवांश्चायम् ॥५६॥

तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञानक्रियाभ्यां कृत्स्नकर्मक्षयस्वरूपा सिद्धिः ॥५७॥

अष्टमः परिच्छेदः

विरुद्धयोर्धर्मयोरेकधर्मव्यवच्छेदेन स्वीकृततदन्यधर्मव्यवस्थापनार्थं साधनदूषणवचनं वादः ॥१॥

प्रारम्भकश्चात्र जिगीषुः, तत्त्वनिर्णिनीषुश्च ॥२॥

स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां परं पराजेतुमिच्छुर्जिगीषुः ॥३॥

तथैव तत्त्वं प्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः ॥४॥

अयं च द्वेधा स्वात्मनि परत्र च ॥५॥

आद्यः शिष्यादिः ॥६॥

द्वितीयो गुर्वादिः ॥७॥

अयं द्विविधः क्षायोपशमिकज्ञानशाली केवली च ॥८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतेन प्रत्यारम्भकोऽपि व्याख्यातः ॥९॥

तत्र प्रथमे प्रथमतृतीयतुरीयाणां चतुरङ्ग एव, अन्यतमस्याऽप्यङ्गस्यापाये जयपराजयव्यवस्थादिदौःस्थ्यापत्तेः ॥१०॥

द्वितीये तृतीयस्य कदाचिद् द्व्यङ्गः, कदाचित् त्र्यङ्गः ॥११॥

तत्रैव द्व्यङ्गस्तुरीयस्य ॥१२॥

तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥१३॥

तुरीये प्रथमादीनामेवम् ॥१४॥

वादिप्रतिवादिसभ्यसभापतयश्चत्वार्यङ्गानि ॥१५॥

प्रारम्भकप्रत्यारम्भकावेव मल्लप्रतिमल्लन्यायेन वादिप्रतिवादिनौ ॥१६॥

प्रमाणतः स्वपक्षस्थापनप्रतिपक्षप्रतिक्षेपावनयोः कर्म ॥१७॥

वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वधारणाबाहुश्रुत्यप्रतिभाक्षान्तिमाध्यस्थ्यैरुभयाभिमताः सभ्याः ॥१८॥

वादिप्रतिवादिनोर्यथायोगं वादस्थानककथाविशेषाङ्गीकारणाऽग्रवादोत्तरवादनिर्देशः, साधकबाधकोक्तिगुणदोषावधारणम्, यथावसरं तत्त्वप्रकाशनेन कथाविरमणम्, यथासम्भवं सभायां कथाफलकथनं चैषां कर्माणि ॥१९॥

प्रज्ञाऽऽज्ञैश्वर्यक्षमामाध्यस्थ्यसंपन्नः सभापतिः ॥२०॥

वादिसभ्याभिहितावधारणं कलहव्यपोहादिकं चास्य कर्म ॥२१॥

सजिगीषुकेऽस्मिन् यावत्सभ्यापेक्षं स्फूर्तौ वक्तव्यम् ॥२२॥

उभयोस्तत्त्वनिर्णिनीषुत्वे यावत् तत्त्वनिर्णयं, यावत् स्फूर्ति च वाच्यम् ॥२३॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तर्कभाषा

गुरुं लोकेश्वरं नत्वा बालानां धर्मकीर्त्तिना ।
शीलनायाल्पचित्तानां तर्कभाषा प्रकाश्यते ॥१॥

इह प्रेक्षा (परायणार्थिभिः सत्त्वैः सर्वपुरुषार्थसिद्धिनिमित्तं प्रमाणमनुसरद्भिरादौ प्रमाणं निर्णेतव्यम्) प्रमाणं सम्यग्ज्ञानमपूर्वगोचरम् । प्र(मिते तेनार्थे प्रामाण्ये सति [तद्धि] सम्यग्ज्ञानमस्ति, संशयविपर्यय-दोषरहितत्वात् अविसं)वादकं ज्ञानं लोके सम्यग्ज्ञान(मुच्यते । संशय-विपर्ययज्ञानस्य त्वविसंवादित्वं नास्ति । यथा शुष्कमिन्धनं न वेति) ज्ञानस्य मरीचिकायामुदका(कारज्ञानस्य च । तद्गोचरापूर्वत्वादपूर्व-गोचरम् । गोच[रे तु] तत्स्थाने घटादौ सति तदुत्पन्नं तदर्थ)प्रापणयोग्यं ज्ञानं प्रमाणम् । ननु ज्ञानं कर्तृ पुरुषं प्रयोज्यमर्थं कर्मभूतं यदि कदाचिन्न प्राप(यति, तत्प्रापयि[तृत्वा]भावात् कथं प्रमाणमिति चेत् । उच्यते, न ज्ञानेन पुरु)षो गलेपादुकान्यायेन बलादर्थे प्रवर्त्तयितव्यः । अपि त्वेवं(भूतेऽस्मिन् वस्तुस्वभावे तदाकारः परस्मिन्नास्तीति तेनाकारेण निश्चयः कर्त्तव्यः ।) स चेत्तेन कृतः, एतावतैव प्रामाण्यमविरुद्धम् । पुरुषस्तु तत्र (प्रयोजनवशात्प्रवर्त्तत एव प्रयोजनाभावे नैव प्रवर्त्तते । तत्रापि योगि)पिशाचादिभिरपह्रियताम् । तदा ज्ञानस्य किमायातम् । यत्तु (विसंवादित्वेन ज्ञानस्याप्रामाण्ये दर्शनमविसंवाद्येवार्थप्रापणादस्ति । यद् दृश्यते तत्प्राप्यतेऽपि अक्षणिकत्वात् । रूपं तु दृश्यते स्पर्शः प्राप्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मादन्यद् दृष्ट्वाऽन्यस्मिन्प्राप्यमाणे निर्धारणं नास्ति । प्रापणात्कथं प्रामाण्यं भवतीति **चेन्न** । वस्तुतोऽन्यप्राप्तिर्गृह्यते । **ननु** पश्यत एवाहं प्राप्नोमीति चिन्तायामेकमतिरिक्तमिति **चेत्** । अस्माभिर्निधरिण प्राप्तिरुच्यते । यत्तु मरीचिकादावुदकादिविज्ञानं तस्यार्थप्रापणायोग्यत्वाद-प्रामाण्यमेव ।) **नन्विदं** प्रापणयोग्यमिदं नेत्यर्थक्रियाप्राप्तिमन्तरेण नि(श्चयेऽशक्ये ज्ञानस्यैवोदयाद् भ्रमाभ्रमत्वेन विशेषो न नि)र्धार्यते ततः कथं तत्सम्यग्ज्ञानमिति **चेत्,** नैष दोषः । (ज्ञानस्यैवोदयात्तद्विशेषो न निर्धार्य)ते तथाऽपि ज्ञानविशेषोदयाद्यथैकस्य वैशिष्ट्यं त(था निर्दिश्यते । तथा च मन्दबुद्धिर्जातिवशादविसंवाद)कत्वं ज्ञानस्य नावधारयितुं समर्थः तथाऽपि दाहपाक(धूपनलेपादिक्रियां दूरान्निश्चिनोति । सुविज्ञातपुरुष)स्य दर्शनेनोच्छलद्धूमादिदर्शनेन च । अमन्दबुद्धिस्तु (प्रकाशप्रत्यक्षेणैव निर्धारयति । **ननु** यद्यर्थक्रियाप्रापणादविसंवादिलक्षणवतो लक्षणमस्ति तदा श्रवणविज्ञानस्य निर्धारितार्थप्रापणाकरणात्कथं प्रामाण्यमिति **चेन्न** । अर्थस्वभावनिर्धारणस्य प्रामाण्ये तस्य बाह्यार्थक्रियाप्रापणाभावेऽपि कदाचित्सत्त्वात् । यदुक्तम्–

'प्रामाण्यमविसंवादि ज्ञानमर्थक्रियास्थितम्'

अविसंवादीति । शब्दाकर्णनमात्रेणार्थविचारग्रहात्समानैव तत्रार्थक्रियास्थितिः । यथा चन्द्रसूर्यमेघचित्रादीनि दृष्ट्वैवार्थक्रिया-स्थितानि भवन्ति । तदुक्तम्–

'ज्ञेयस्वरूपविद्यैव तत्रेष्टार्थक्रियास्थिता'

इति । प्रथमतो निर्धारणावान)र्थक्रियार्थितया जलानलादावर्थ-सन्देहादेव प्रवर्त्तते । (यदि तत्र तादृशसन्देहाभावे प्रवर्त्तयित्वा वासिद्धिं कारयित्वा वापकारं करोति प्रमाणं नास्ति । यदुक्तम्–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'उत्पद्यमानसन्देहो येन निवर्त्तते' इति)

तस्मात्स्थितमेतत् । आसादितनिरन्तरार्थक्रियाव्यवहारणात् (प्रत्यक्षजातमात्रतोऽर्थप्रवृत्तौ मन्दबुद्धिना तादृशानुमा)नादिति । अत एव प्रत्यक्षस्य स्वतः प्रामाण्यम् । कस्यचित्तु परतः । योगिज्ञानस्य स्वसंवेद्यज्ञानस्य च स्वत एव प्रामाण्यम् । अनुमानस्य तु निश्चयात्मकत्वात्स्वत एव प्रामाण्यम् । तेनायमर्थः । प्रथमत एव यद्विज्ञानं प्रवृत्तं विषये तदेव प्रमाणम् । न तु तत्रैव पश्चाद्भावि ज्ञानान्तरमपि । गृहीतग्राहित्वेन तस्याप्रामाण्यात् । यथा घटं निर्विकल्पेन दृष्ट्वा पश्चात्तत्रैव विषये यथा (साध्य)मध्यवसायं घटोऽयमिति सविकल्पकं ज्ञानं स्मरणरूपम् । यथा पर्वतादौ धूमं दृष्ट्वा वह्निस्त्रेत्यनुमा(नज्ञा?)नानन्तरं पुनरपि (तत्रैव) वह्निस्त्रेत्यनुमानम् । सम्यग्ज्ञानं प्रमाणमित्युक्ते सामर्थ्याज्जडस्वभावस्येन्द्रियादेः परिच्छेदकत्वाभावात्प्रामाण्यं निरस्तम् । परिच्छेदकत्वं हि बोद्धृत्वम् । तच्च ज्ञानस्यैव निजरूपम् । तत्कथमज्ञानात्मन इन्द्रियादेः स्वभावो भवितुमर्हतीति ? ।

तद् द्विविधं प्रत्यक्षमनुमानं चेति । प्रतिगतमक्षं प्रत्यक्षम् । अक्षं त्विन्द्रियं चक्षुःश्रोत्रघ्राणजिह्वाकायाख्यम् । तस्मादुत्पन्नं ज्ञानं प्रत्यक्षमित्यर्थः । ननु यद्यक्षाश्रितं प्रत्यक्षं तदा वक्ष्यमाण [मानसादावव्याप्तम्)] । **अत्रोच्यते** । प्रतिगतमक्षं प्रत्यक्षमिति यदुक्तं तत्प्रत्यक्ष..... वशादवगन्तव्यम्, पङ्कजवत् ? । ततः स्वसंवेदनादिकमपि ज्ञानादिस्वरूपमर्थं साक्षात्करोतीति प्रत्यक्षशब्दवाच्यं सिध्यतीति । मीयतेऽर्थोऽनेनेति मानम् । अनुः पश्चादर्थे । पश्चान्मानमनुमानम् । लिङ्गग्रहणलिङ्गलिङ्गिसम्बन्धस्मरणयोः पश्चात् यद्विज्ञानं पर्वतादौ धर्मिणि परोक्षवस्त्वालम्बकं तदेवानुमानशब्देनोच्यते इति रूढिशब्दादवगन्तव्यम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्विविधवचनेन एकं त्रीणि चत्वारि पञ्च षडिति विप्रतिपत्तयो निरस्यन्ते । तथाहि-प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकः । प्रत्यक्षमनुमानं शाब्दं चेति साङ्ख्यः । प्रत्यक्षमनुमानमुपमानं शाब्दं चेति नैयायिकः । प्रत्यक्षमनुमानमुपमानं शाब्दमर्थापत्तिरिति प्राभाकरः । प्रत्यक्षमनुमानं शाब्दमर्थापत्तिरुपमानमभावश्चेति मीमांसकः । द्विविधवचनेन द्वित्वे प्राप्ते प्रत्यक्षमनुमानं चेति पुनर्यदुक्तं तदन्यथाद्वित्वनिरासार्थम् । तथा हि वैयाकरणो ब्रूते प्रत्यक्षं शाब्दं चेति प्रमाणद्वयम् । तथा चोक्तम् ।

'प्रमाणेतरसामान्यस्थितेरन्यधियो गतेः ।
प्रमाणान्तरसद्भावप्रतिषेधाच्च कस्यचित् ॥'

तत्राऽनुमानस्य प्रामाण्यमवश्यमभ्युपगन्तव्यं चार्वाकेणेति प्रतिपाद्यते । तथाहि-सरव.....शलक्षणं परप्रतिपादनाय प्रणयति । परस्य च बुद्धिर्न प्रत्यक्षा । किं तर्हि कायवाग्व्यापारात्कार्यादनुमेया । ततोऽनेन कार्यलिङ्गजमनुमानं बलादभ्युपेतं स्यात् । परलोकनिषेधाय चानुपलम्भाख्यं साधनमाचष्टे । अतोऽसौ स्वमेवानुमानेन व्यवहरन्नानुमानं प्रमाणमिति च ब्रुवाणः कथं नोन्मत्तः ? ।

शाब्दं च ज्ञानं बाह्यार्थाविसंवादेन प्रमाणमेष्टव्यम् । अविसंवादकत्वं च सम्बन्धमन्तरेण न सम्भवति । न च शब्दानां बाह्यार्थेन सह कश्चित्सम्बन्धः । तथा हि शब्दार्थयोः सम्बन्धो भवन् तादात्म्यं तदुत्पत्तिर्वा भवेत् । तत्र न तावत्तादात्म्यं शब्दार्थयोः, अत्यन्तभेदेन प्रतिभासनात् । तादात्म्यं ह्येकत्वमभिधीयते । भिन्नप्रतिभासेऽप्येकत्वे स्वीक्रियमाणे गवाश्वयोरप्येकत्वप्रसङ्गः । नापि तदुत्पत्तिरन्वयव्यतिरेकाभावात्तस्मादुत्पत्तिरित्येव वक्तुं न शक्यते । तथाहि-शब्दव्यापारमन्तरेण स्वहेतोरेव मृत्पिण्डदण्डसलिलचक्रादेः सकाशादुत्पद्यमानो घटादिरर्थो दृश्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दोऽपि बाह्यार्थं विनैव पुरुषेच्छामात्रेण तालवादिव्यापारादेवोत्पद्यते । अथ तादात्म्यदुत्पत्तिभ्यामन्य एव वाच्यवाचकभावलक्षणः स्वाभाविकः प्रतिबन्धोऽस्ति । एवं तर्ह्यसङ्केतविदोऽपि प्रमातुः शब्दादुच्चरितान्नियतार्थप्रतीतिः प्राप्ता योग्यतामात्रेणैव प्रदीपाद्धटपटादिप्रतीतिवत् । तथाहि-अभिनवनालिकेरद्वीपायातः प्रमाताऽग्निशब्दं श्रुत्वाऽप्यग्निशब्दान्न कञ्चिदर्थं प्रत्येति । **अथ** तांस्तान् सङ्केतानपेक्ष्य तदर्थप्रत्यायनयोग्य एवायं शब्दो जात इत्युच्यते । **तन्न** । न ह्येवमस्य प्रामाण्यमवतिष्ठते सर्वत्र सङ्केतस्य योग्यत्वात् । अतो न ज्ञायते किं विवक्षितमर्थमाहाऽन्यं वेति । अस्तु वाऽन्य एव कश्चित्सम्बन्धः । तथा च सोऽपि केन सम्बन्धेन तयोः सम्बद्ध इति प्रष्टव्यम् । अन्येन चतुर्थेन सम्बन्धेनेति चेच्चतुर्थोऽपि केन तत्सम्बद्धः । पञ्चमेन केनचिच्चेत् सोऽपि केनेति अनवस्थायामन्त्यासिद्धौ पूर्वेषामसिद्धिः स्यात् । अर्थासम्बद्ध एव शब्दार्थयोः सम्बन्ध इति चेत् । योऽसम्बद्धः स कथं सम्बन्धो भवति घटस्येव पटः । **अथ** वक्तव्यम् - सम्बन्धस्य ईदृश एव स्वभावो येन सम्बन्धान्तरनिरपेक्ष एव परं सम्बन्धातीति । **तदयुक्तम्** । प्रमाणसिद्धे हि वस्तुनि स्वभावेनोत्तरमभिधीयते । यथाऽग्नेरेवायमीदृशः स्वभावो दाहकत्वं नाम नान्यस्याकाशादेः । सम्बन्धसिद्धौ तु प्रमाणं किञ्चिन्निरूपयन्तो न पश्यामः । न चैवं वक्तव्यम्-शब्दशक्तिस्वाभाव्यादेव शब्दानां नियतार्थाव्यभिचारित्वम्, तथाहि यदि घट इत्ययं शब्दः स्वभावादेव कम्बुग्रीवाकारं जलधारणसमर्थं पदार्थमभिदधाति, तत्कथं सङ्केतान्तरमपेक्ष्य पुरुषेच्छया तुरगादिकमभिदध्यात् । न हि शालिबीजं स्वहेतोरङ्कुरजननस्वभावमुत्पन्नं सङ्केतान्तरमपेक्ष्य गर्दभं जनयितुं समर्थं स्यात् । नाप्याप्तप्रणीतशब्दानां प्रामाण्यमभिधातुमुचितम् । तथाहि-आप्तत्वं क्षीणदोषत्वमुच्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षीणदोषता च परचित्तवृत्तिः काचिदभिधीयते । परचित्तवृत्तीनां च दुर्लक्ष्यत्वात्, कायवाग्व्यापारस्य कार्यलिङ्गस्य त्वन्यथाऽपि सन्दर्शनात् । सरागा अपि वीतरागा इव चेष्टन्त इति न्यायात् कथमाप्तत्वं विनिश्चीयतामिति । सम्बन्धदूषणेन च वैदिकशब्दानां प्रामाण्यं निरस्तमिति पृथङ्नोक्तम् । कथं तर्हि सर्वोऽयं निःसन्दिग्धो लौकिको व्यवहार इति चेत् । तथा तथा सङ्केतेन विवक्षावशान्न काचित्क्षतिः । यथोक्तम्- **वक्तुरभिप्रायं सूचयेयुः शब्दा** इति ।

नैयायिकस्योपमानप्रमाणप्रपञ्चः-यः प्रतिपत्ता गां वेत्ति न गवयं स चादिष्टः स्वामिनाऽरण्यं गत्वा गवयमानयेति, स गवयशब्दवाच्यमर्थमजानानो वनेचरमन्यं वा तज्ज्ञं पुरुषं पृष्टवान् 'भ्रातः कीदृशो गवय' ? इति, स आह 'यादृग्गौस्तादृग्गवय' इति । तस्यारण्यगतस्य प्रेष्यपुरुषस्य आप्तातिदेशवाक्यार्थस्मरणसहकारिगवयसारूप्यज्ञानं कर्तृ अयं स गवयशब्दवाच्योऽर्थ इति प्रतिपत्तिं फलरूपां जनयत्प्रमाणम् । एतच्चायुक्तम् । यतः प्रामाण्यं नाम विषयवत्तया व्याप्तम् । न चास्य निपुणमपि निरूपयन्तो विषयं पश्यामः । तथा हि समाख्यासम्बन्धस्तस्य विषयो वर्ण्यते । स च परमार्थतो नास्ति । दृश्यत्वे तस्यानुपलम्भेन बाधा । अदृश्यत्वे तस्य सत्तासाधकं प्रमाणं नेक्ष्यते । किञ्च स हि सम्बन्धः सम्बन्धिभ्यां भिन्नोऽभिन्नो वा । यदा भिन्नस्तदा तयोः सम्बन्धः केन सम्बन्धेनेति वाच्यम् । सम्बन्धान्तरकल्पनायामनवस्था । अथाभिन्नस्तदा सम्बन्धिनावेव केवलौ । न समाख्या नाम सम्बन्धः कश्चित् । **अथ** सम्बद्धबुद्धिजनकत्वं सम्बन्धः । **तन्न युक्तम्** । यतः सम्बद्धावेताविति बुद्धिः स्वहेतुबलात्सम्बद्धवस्तुद्वयादपि सम्भाव्यमाना न सम्बन्धान्तरमाक्षेप्तुं प्रभवति ।

एवं मीमांसकोपवर्णितस्यापि प्रामाण्यं निराकर्त्तव्यम् । तथाहि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सादृश्यविशिष्टः पिण्डः पिण्डविशिष्टं वा सादृश्यमुपमानस्य विषयस्तेन वर्ण्यते । न च सदृशवस्तुव्यतिरिक्तं सादृश्यं व्यवस्थापयितुं शक्यते प्रमाणेनाप्रतीतत्वात् । तथाहि-यदि सदृशादतिरिक्तं सादृश्यं दृश्यं स्यात् तदा दृश्यानुपलम्भग्रस्तमेव तत् । अथादृश्यम् तदपि तत्प्रतिबद्धलिङ्गाभावादनुमानादपि कथं तत्सिद्धिः ? । सादृश्यप्रत्ययस्तु स्वहेतोस्तथोत्पन्नेन सदृशवस्तुनाऽपि क्रियमाणो घटत इति न तत्प्रत्ययादपि तत्सिद्धिर्युक्ता । उपमानादेव सादृश्यसिद्धिरिति **चेन्न** । यतः प्रमाणान्तरसिद्धयोरेव सादृश्यपिण्डयोर्यो विशेषणविशेष्यभावस्तस्योपमानविषयत्वं तेन वादिना परिकल्प्यते । तत्कथं सादृश्यमात्रस्योपमानात् सिद्धिरिति ? ।

अर्थापत्तेरपि प्रामाण्यं पृथङ्नोपपद्यते । तथाहि-प्रत्यक्षादिप्रतीतो योऽर्थः स येन विना नोपपद्यते तस्यार्थस्य कल्पनमर्थापत्तिरित्यर्थापत्तेर्लक्षणम् । अत्रेदं चिन्त्यते । योऽसौ प्रमाणदृष्टोऽर्थस्तस्य यदि परिकल्प्यमानेन परोक्षेणार्थेन सह कश्चित्तादात्म्यलक्षणस्तदुत्पत्तिलक्षणो वा प्रतिबन्धोऽस्ति तदा स्वभावलिङ्गजा कार्यलिङ्गजा वाऽसौ प्रतीतिरनुमानमेव । अथ नास्ति प्रतिबन्धः, तदाऽर्थापत्तिः प्रमाणमेव न भवति, असम्बन्धात् घटात्पटप्रतीतिवत् ।

अभावस्य स्वरूपमेव न वीक्षामहे, कुत एव तस्य प्रामाण्यं भविष्यति । तथाहि-प्रत्यक्षादीनामनुत्पत्तिरभावाख्यं प्रमाणं मीमांसकैरभिधीयते । तत्र केयमनुत्पत्तिः ? । किं प्रसज्यवृत्या प्रमाणानुत्पत्तिमात्रमथ पर्युदासवृत्त्या वस्त्वन्तरम् ? । वस्त्वन्तरमपि जडरूपं ज्ञानरूपं वा ? । ज्ञानमपि किं ज्ञानमात्रमेकसंसर्गिवस्तुनो ज्ञानं वा ? । तत्र न तावत्प्रसज्यरूपोऽभावो युज्यते । तस्य सर्वशक्तिशून्यत्वात्परिच्छेदकत्वं ज्ञानजनकत्वं वा कथं भविष्यति ? । अत एव न केनापि तत्प्रतिपद्येतेति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदाह पण्डितचक्रचूडामणिः **न ह्यभावः कस्य चित्प्रतिपत्तिः प्रतिपत्तिहेतुर्वा । तस्यापि कथं प्रतिपत्तिः [इति]** । नापि जडरूपं जडस्य परिच्छेदकत्वाभावात् । न हि जडरूपं शकट्यादिकं घटं परिच्छिनत्तीति क्वापि दृष्टं श्रुतं वेति । नापि ज्ञानमात्रं देशकालस्वभावविप्रकृष्टस्य सुमेरुशङ्खचक्रवर्त्तिपिशाचादेरपि ज्ञानमात्रादभावप्रमाणादभाव[प्रतीति]-प्रसङ्गात् । अथैकज्ञानसंसर्गिभूतलादिवस्तुज्ञानमभावोऽभिधीयते तदा प्रत्यक्षविशेषस्यैवाभावप्रमाणनामकरणान्नास्माकं काचिद्विप्रतिपत्तिरिति । स्थितमेतत् प्रत्यक्षमनुमानं चेति द्विविधमेव प्रमाणम् ।

तत्र प्रत्यक्षं कल्पनापोढमभ्रान्तम् । पूर्वापरमनुसन्धाय शब्दसंयुक्ताकारा प्रतीतिरन्तर्जल्पाकारा वा कल्पना । तथा चोक्तम्-**अभिलापसंसर्गयोग्यप्रतिभा सा प्रतीतिः कल्पना । यथा विज्ञस्य पुरुषस्य सोऽयं घट इति प्रतीतिः** । बालमूकादीनामन्तर्जल्पाकारं कल्पनाज्ञानमस्तीति कुतो निश्चेतव्यम् ? । विकल्पकार्यस्येष्टानिष्टोपादानपरिहारस्योदयात् । दृष्टं चेदं कार्यं बालकादौ, ईप्सितार्थस्वीकरणमनीप्सितार्थत्यजनं च नाम । किं पुनः कारणं कल्पनाविभ्रमात्मकं ज्ञानं न प्रमाणमिति चेत् । अर्थस्वरूपसाक्षात्कारि हि ज्ञानं प्रत्यक्षं सर्वेषां सम्मतम् । न च कल्पनाविभ्रमावर्थं साक्षात्कर्त्तुं समर्थौ । तथा हि-अर्थग्राहकं ज्ञानमर्थस्य कार्यम् । अर्थो हि ग्राह्यत्वात् ज्ञानस्य कारणम् । यथा चोक्तम्-'**ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षम**'मिति । कल्पनाज्ञानं त्वर्थमन्तरेण वासनामात्रादेवोपजायमानं कथमर्थकार्यं स्यात् । अर्थेन सहान्वयव्यतिरेकाभावात् । न हि यदन्तरेणापि यद्भवति तत्तस्य कार्यमतिप्रसङ्गात् । यदि पुनः कल्पनाज्ञानमर्थादुपजायेत तेनापि तदा घटादिरर्थो दृश्येत । ततश्चान्धस्यापि रूपदर्शनप्रसङ्गः न चास्ति । अत एवोक्तम्-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शाब्द्यां बुद्धावर्थस्य प्रत्यक्ष इव प्रतिभासाभावान्नास्ति कल्पनाया अर्थसाक्षात्कारित्वमिति सिद्धम् । एतेन यदुक्तं साङ्ख्येन ? [भर्तृहरिणा]

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥'

तन्निरस्तम् । तथाहि घटे पुरोवर्त्तिन्युच्चार्यमाणे तत्समीपवर्त्ति भूतलादिज्ञानमुच्चारणरहितमनुभूयत एव । न च तत्र शब्दानुगमोऽस्ति । न विकल्पद्वयं सकृदिति न्यायात् । भ्रान्तमपि ज्ञानं नार्थसाक्षात्कारि । भ्रान्तं ह्यर्थक्रियाक्षमे वस्तुनि विपर्यस्तमुच्यते । अर्थक्रियाक्षमं च वस्तुरूपं देशकालाकारनियतम् । तत्कथं विपरीतप्रतिभासिना भ्रान्तेन ज्ञानेन साक्षात्क्रियते । अत एवाहाऽऽचार्यः-'**तिमिराशुभ्रमणनौयानसङ्क्षोभाद्यनाहितविभ्रमं ज्ञानं प्रत्यक्षम्** ।' एतेन कामलिनः शुक्लशङ्खे पीतप्रतिभासि ज्ञानं, भ्रमदलातादौ चक्रादिनिर्भासि, गच्छत्यां नावि स्थितस्य भ्रमद्वृक्षादिग्राहि, गाढमर्मप्रहारहतस्य प्रज्ज्वलत्स्तम्भादिप्रतिभासि[च] न प्रत्यक्षमित्युक्तं भवति । ननु यदि तज्ज्ञानं भ्रान्तम्, कथं ततो वस्तुप्राप्तिरिति चेत्, न ततो वस्तुप्राप्ति । किं तर्हि, ज्ञानान्तरादेवेति ।

तच्चतुर्विधमिन्द्रियज्ञानं मानसं स्वसंवेदनं योगिज्ञानं चेति । चक्षुरादीन्द्रियपञ्चकाश्रयेणोत्पन्नबाह्यरूपादिपञ्चविषयालम्बनं ज्ञानमिन्द्रियप्रत्यक्षम् । तत्र चक्षुर्विज्ञानं रूपविषयम् । घ्राणविज्ञानं गन्धविषयम् । जिह्वाविज्ञानं रसविषयम् । कायविज्ञानं स्पर्शविषयम् । श्रोत्रविज्ञानं च शब्दविषयम् । इन्द्रियप्रत्यक्षमिति व्यपदेशस्य चासाधारणकारणत्वं निमित्तम् । यथा भेरीशब्दो यवाङ्कुर इति । इदं च प्रत्यक्षं यत्रैव स्वानुरूपं विकल्पं जनयति तत्रैव प्रमाणं सांव्यावहारिक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमाणाधिकारादिति । स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं मनोविज्ञानम् । स्वशब्देनेन्द्रियज्ञानमभिप्रेतम् । तस्य विषयः स्वविषयो बाह्यो घटादिः । स्वविषयस्यानन्तरः स्वविषयानन्तरः । इन्द्रियविज्ञानविषयादन्यो घटादिर्द्वितीयः क्षणः । तेन सहकारिणा सह मिलित्वेन्द्रियज्ञानेनोपादानेन समनन्तरप्रत्ययसंज्ञकेन यज्जनितं तन्मानसं प्रत्यक्षम् । **ततो** यदुक्तं परेण गृहीतग्राहित्व-मन्धबधिराद्यभावो योगिज्ञानस्यापि मानसत्वप्रसङ्गः अव्यवहारित्वं चेति **निरस्तम्** । तथाहि—द्वितीयक्षणग्रहणाद् गृहीतग्राहित्वनिरासः । इन्द्रियज्ञानजनितं हि मानसम्। अन्धादीनां रूपाद्यालम्बनमिन्द्रियज्ञानमेव नास्ति । कुतस्तज्जनितं मानसं भविष्यति ? । अतो नास्त्यन्धबधिराद्य-भावदोषः समनन्तरप्रत्ययविशेषणेन योगिज्ञानस्य मानसत्वप्रसङ्गो निरस्तः। समनन्तरप्रत्ययशब्दः स्वसन्तानवर्त्तिन्युपादाने ज्ञाने रूढ्या प्रसिद्धः । ततो भिन्नसन्तावर्त्ति योगिज्ञानमपेक्ष्य पृथग्जनचित्तानां समनन्तरप्रत्ययव्यपदेशो नास्तीति । अव्यवहारित्वं पुनरस्य दूषणं नोपपद्यते, सूक्ष्मकालभावित्वेन पृथग्जनैर्दुर्लक्ष्यत्वात्। व्यवहाराङ्गत्वेनान-भ्युपगमाच्च । आगमप्रसिद्धं मानसप्रत्यक्षं न त्वस्य निश्चायकं किञ्चिदस्ति। यथोक्तं भगवता—**द्वाभ्यां भिक्षवो रूपं गृह्यते चक्षुषा तदाकृष्टेन च मनसा** । ननु व्यहारानुपयुक्तमुपदर्शयितुं किं प्रयोजनम् ? ईदृग्लक्षणयुक्तं यदि मानसं प्रत्यक्षं स्यात्, न कश्चिद्दोषः स्यादित्यागम-स्यापि शुद्धिरनेन प्रतिपादितेति प्रयोजनम् । सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनं चित्तं वस्तुमात्रग्राहकं ज्ञानम् । चित्ते भवाश्चैत्ताः। वस्तुनो विशेषरूपग्राहकाः सुखदुःखोपेक्षालक्षणाः । तेषां सर्वचित्तचैत्तानामात्मा संवेद्यते येन स्वरूपेण तत्स्वरूपमात्मरूपसाक्षात्कारित्वात् । स्वसंवेदनं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्यक्षं कल्पनापोढमभ्रान्तं चोच्यते । अत्र **केचिदाहुः** – न चित्तचैत्तानां स्वसंवेदनं घटते स्वात्मनिकारित्वविरोधात् । न हि सुशिक्षितोऽपि बटुः स्वस्कन्धमारोढुं शक्नोति । न हि तीक्ष्णाऽप्यसिधाराऽऽत्मानं छिनत्ति । न हि सुप्रज्ज्वलितोऽपि वह्निस्कन्ध आत्मानं दहति । तथा चित्तचैत्तमपि कथमात्मानं प्रत्येतु । वेद्यवेदकभावो हि कर्मकर्तृभावः । स च लोके भेदेनैव प्रसिद्धः, वृक्षसूत्रधारयोरिव । **अत्रोच्यते** । न कर्मकर्तृभावेन वेद्यवेदकत्वं ज्ञाने वर्ण्यते । किं तर्हि व्यवस्थाप्यव्यवस्थापकभावेन । यथा प्रदीप आत्मानं [आत्मना] प्रकाशते तथा ज्ञानमपि जडपदार्थविलक्षणं स्वहेतोरेव प्रकाशस्वभावमुपजायमानं स्वसंवेदनं व्यवस्थाप्यते । यदाह अलङ्कारकारः–

'कल्पितः कर्मकर्त्रादिः परमार्थो न विद्यते ।
आत्मानमात्मनैवात्मा निहन्तीति निरूप्यते ॥'

न च चित्तचैत्तानां ज्ञानान्तरेण प्रकाश्यत्वं युज्यते ।

तथाहि–न तावत्समानकालभाविना ज्ञानानन्तरेण चित्तचैत्तं प्रकाश्यत इति घटते । उपकार्योपकारकत्वाभावात्सव्येतरगोविषाण-योरिव। नापि भिन्नकालभाविना, क्षणिकत्वात्प्रकाशस्यैवाभावात् । यदाहालङ्कारकारः–

'परोक्षं यदि तज्ज्ञानं ज्ञानमित्येव तत्कुतः ।
परोक्षस्य स्वरूपं कस्तस्य लक्षयितुं क्षमः ।'

अपि च–ज्ञानं स्वसंवेद्यं न स्यात्, तदा ज्ञातोऽर्थ इति व्यपदेशो दुर्घटः स्यात् । नागृहीतविशेषणा बुद्धिर्विशेष्ये वर्त्तत इति न्यायात् । तथा ह्यर्थो विशेष्यः । ज्ञात इति विशेषणम् । ज्ञानेनेति ? [ज्ञानेन हि] विशेषितः । ज्ञानं चेत्स्वबोधरूपेण न प्रतीतम्, तत्कथं ज्ञानेन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशेषितोऽर्थः प्रतीयताम् । न हि दण्डाग्रहणे दण्डिनो ग्रहणं युक्तिसङ्गतम्। **यच्चोक्तं** त्रिलोचनेन–'चक्षुषोऽग्रहणेऽपि यथा चाक्षुषं रूपं [इति] प्रतीयते तथा ज्ञानाबोधेऽपि ज्ञातोऽर्थ इति घटिष्यते', **तदसाधु**। प्रस्तुतेऽनुपयोगात्। न हि चक्षू रूपस्य विशेषणम्। किं तर्हि? चक्षुर्विज्ञानम् । ततश्चक्षुर्विज्ञानासंवेदने कथं रूपं ज्ञायतामिति चोद्यमक्षतमेव । तस्मादन्यथा प्रकाशकत्वासिद्धेर्यद्यमी प्रकाशन्ते तदा स्वहेतोरेव प्रकाशस्वभावा उत्पन्नाः सन्त इति स्वीकर्त्तव्यम् । यथोक्तं न्यायवादिना–

'विज्ञानं जडरूपेभ्यो व्यावृत्तमुपजायते ।
इयमेवात्मसंवित्तिरस्य याऽजडरूपता ॥'

भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति । योगः समाधिः, चित्तैकाग्रतालक्षणः । निःशेषवस्तुतत्त्वविवेचिका प्रज्ञा योगोऽस्यास्तीति योगी । योगिनो यद्विज्ञानं तत्प्रत्यक्षं भूतार्थभावनाप्रकर्षपर्यन्तजम् । भूतार्थः–प्रमाणोपपन्नार्थः । भावना–पुनः पुनश्चेतसि समारोपः । भूतार्थभावनाप्रकर्षपर्यन्ताज्जातं यद्विज्ञानं तत्कल्पनापोढमभ्रान्तम् । भूतार्थश्चतुरार्यसत्यम्। दुःख–समुदय–मार्ग–निरोधलक्षणं पञ्चस्कन्ध-स्वभावं क्षणिकशून्यनिरात्मकदुःखादिरूपतया प्रतिपत्तव्यम् । यत्सत्तत्क्षणिकमित्याद्यनुमानेन प्रमाणोपपन्नत्वं वेदितव्यम्। तस्य विषयः स्वलक्षणम्। तस्य चतुर्विधस्य प्रत्यक्षस्य स्वलक्षणं विषयो बोद्धव्यः । स्वलक्षणमित्यसाधारणं वस्तुरूपं देशकालाकारनियतम् । एतेनैतदुक्तं भवति । घटादिरुदकाद्याहरणसमर्थोऽर्थो देशकालाकारनियतः पुरः प्रकाशमानोऽनित्यत्वाद्यनेकधर्मोदासीनः(?) प्रवृत्तिविषयो विजातीय-सजातीयव्यावृत्तः स्वलक्षणमित्यर्थः । **एतेन** यदुक्तं परेण षट् पदार्थाः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रत्यक्षेण परिच्छिद्यन्ते ते च प्रत्यक्षस्य विषया इति **तन्निरस्तम्** । यथाऽवयवि द्रव्यं गुणः कर्म सामान्यं विशेषः समवायश्चेति । एते पदार्थाः पराभिमताः । न चैषां प्रत्यक्षे ज्ञाने प्रतिभासोऽस्ति । न चाप्रतिभासमानो विषयो युज्यतेऽतिप्रसङ्गात् । तथाहि–घटादौ परिदृश्यमाने पूर्वापरादिभागं विहाय नान्यत्किञ्चिदेकमवयविद्रव्यमुपलभामहे । यदाह न्यायपरमेश्वरः–

'भागा एव हि भासन्ते सन्निविष्टास्तथा तथा ।
तद्वानेव पुनः कश्चिद्विभागः सम्प्रतीयते ॥''

एवं गुणकर्मादीनां च दूषणं प्रत्येतव्यम् । **ननु** प्रमितिरूपां क्रियां फलभूतां निष्पादयज्ज्ञानं प्रमाणं प्रसिद्धम् । तत्र काऽसौ प्रमितिः, यां जनयज्ज्ञानं प्रमाणमिति **चेत्** । उच्यते । इह नीलादेरर्थात् ज्ञानं द्विरूपमुपपद्यते । नीलाकारं नीलबोधस्वरूपं च । तत्र नीलाकारव्यावृत्त्या नीलाकारं ज्ञानं प्रमाणम् । अनीलबोधव्यावृत्त्या नीलबोधस्वरूपं प्रमितिः । सैव फलम् । यथोक्तमर्थसारूप्यमस्य प्रमाणम् [प्रामाण्यम्] । अर्थाधिगतिः प्रमाणफलम् । एतच्च विकल्पप्रत्ययेन भिन्नं व्यवस्थाप्यते । परमार्थतो नास्त्येव भेदः । यथोक्तम्–तदेव प्रत्यक्षं ज्ञानं प्रमाणफलमिति । यदि पुनः साकारं ज्ञानं नेष्यते तदाऽनाकारत्वेन सर्वत्र विषये तुल्यत्वात् विभागेन विषयव्यवस्था न स्यादिति । यत्पुनः **केचिदाहुः**–पूर्वं ज्ञानं प्रमाणमुत्तरं ज्ञानं प्रमाणफलमिति । **तन्न युक्तम्** । तथाहि–प्रथमकालभावि तावज्ज्ञानं न प्रमाणं फलभूतस्य द्वितीयज्ञानस्यानुपप[अनुत्प]त्तेः । फलभूतज्ञानोत्पत्तौ च पूर्वकस्य क्षणिकत्वेन नाशात्कथं घटादिविषयज्ञानं प्रमाणं स्यात् । नापि समानकालभावि ज्ञानं फलमुचितम् । उपकार्योपकारकत्वाभावात्सव्येतरगोविषाणयोरिव ।

। इति तर्कभाषायां प्रत्यक्षपरिच्छेदः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुमानपरिच्छेदः

अनुमानं द्विधा स्वार्थं परार्थं च। स्वस्मै यत्तत्स्वार्थम्। [स्वार्थं]-अनुमानं ज्ञानात्मकम्। पर्वतादौ धूमादिकं दृष्ट्वा यस्य प्रतिपत्तुर्ज्ञानमुत्पद्यते स एव तेन ज्ञानेन परोक्षमर्थं प्रतिपद्यते नान्य इति स्वार्थानुमानमुच्यते। परस्मै यत्तत्परार्थम्। परार्थानुमानं वचनात्मकम्। त्रिरूपलिङ्गप्रतिपादकं वचनं परं प्रतिपादयति ज्ञापयतीति कृत्वा वचनमप्यनुमानशब्देनोच्यते उपचारात्। तत्र स्वार्थं त्रिरूपाल्लिङ्गादनुमेये परोक्षविषये ज्ञानं प्रतिपत्तुरुत्पद्यते तत्स्वार्थमनुमानम्। तच्च धर्मिविशेषसम्बन्धितया साध्याविनाभावित्वनिश्चय इत्येके। अन्यध्यवसाय इत्यन्ये।

सम्प्रति लिङ्गस्य त्रैरूप्यमुच्यते। अनुमेये सत्त्वमेव निश्चितम्। अनुमेये पर्वतादौ धर्मिणि लिङ्गस्यास्तित्वमेव निश्चितम्। तदेकं रूपं पक्षधर्मतासंज्ञकम्। अत्र सत्त्वग्रहणेनासिद्धस्य निरासः। यथा नित्यः शब्दश्चाक्षुषत्वात्। चाक्षुषत्वं चक्षुर्विज्ञानग्राह्यत्वम्। तच्च शब्दे धर्मिणि नास्ति। एवकारेण पक्षैकदेशासिद्धस्य। यथा दिगम्बरप्रयोगः-चेतनास्तरवः स्वापात्। पत्रसङ्कोचलक्षणो हि स्वापः। स च सर्वेषु तरुषु न सिद्धः। निश्चितग्रहणेन सन्दिग्धासिद्धस्य। यथाऽग्निरत्र बाष्पादित्वेन? [धूमत्वेन] सन्दिह्यमानाद्भूतसङ्घातात्। सत्त्वशब्दात्पश्चादेवकारेणासाधारणस्य। यथा नित्यः शब्दः श्रावणत्वात्। सपक्ष एव सत्त्वं निश्चितमिति वर्त्तते। समानः पक्षः सपक्षः। पक्षेण सह सदृशो दृष्टान्तधर्मीत्यर्थः। तस्मिन्सपक्ष एव सत्त्वं निश्चितमित्यन्वयसंज्ञकं द्वितीयरूपम्। तत्र सत्त्वग्रहणेन विरुद्धस्य निरासो यथा नित्यः शब्दः कृतकत्वात्। कृतकत्वं नित्यविपक्षेणानित्यत्वेन व्याप्तमिति विरुद्ध-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुच्यते। एवकारेण साधारणस्य। यथा नित्यः शब्दः प्रमेयत्वात्। प्रमेयत्वं विकल्पविषयीकृतत्वम्। सपक्षे आकाशे विपक्षे च घटादौ सर्वत्रास्तीति साधारणमुच्यते। सत्त्वशब्दात्पूर्वस्मिन्नेवकारेण सर्वसपक्षाव्यापिनोऽपि प्रयत्नानन्तरीयकस्य हेतुत्वं कथितम्। यथाऽनित्यः शब्दः प्रयत्नानन्तरीयकत्वाद्घटवद्विद्युद्वत्। निश्चितग्रहणेन सन्दिग्धान्वयस्य यथाऽसर्वज्ञः कश्चिद्वक्तृत्वादिष्टपुरुषवत्। इष्टपुरुषे सपक्षे वक्तृत्वमसर्वज्ञत्वेन व्याप्तमव्याप्तं वा नैव ज्ञायते। असपक्षे चासत्त्वमेव निश्चितम्। न सपक्षोऽसपक्षः। तत्रासत्त्वमेव व्यतिरेकसंज्ञकं तृतीयं रूपम्। अत्राप्यसत्त्वग्रहणेन विरुद्धस्य निरासः। एवकारेण साधारणस्य। निश्चितग्रहणेन सन्दिग्धविपक्षव्यावृत्तिकस्य। यथाऽवीतरागोऽयं पुरुषः वक्तृत्वाद्रथ्यापुरुषवत्। यत्रावीतरागत्वं नास्ति तत्र वक्तृत्वमपि, यथोपलखण्डे, यदि नाम पाषाणखण्डादुभयं व्यावृत्तं तथाऽपि न ज्ञायते किमवीतराग[त्व]निवृत्तौ वक्तृत्वनिवृत्तिः पाषाणखण्डात् स्वत एव वेति। ततः सन्दिग्धव्यतिरेकोऽयमनैकान्तिकः। एवकारेण विपक्षैकदेशवृत्तेः। यथा प्रयत्नानन्तरीयकः शब्दोऽनित्यत्वात्। अनित्यत्वं विपक्षादाकाशान्निवृत्तं न विद्युतः ततो विपक्षैकदेशवृत्तित्वमस्य। ननु सपक्ष एव सत्त्वमित्युक्ते सामर्थ्यादेवासपक्षे चासत्त्वमेवेत्यवगम्यते। तत्किमर्थमुभयोरुपादानमिति चेत्। न। विपक्षनियमार्थमिति पूर्ववृद्धाः। ते च त्रिविध एव विपक्षो भवतीति मन्यन्ते। साध्याभावमात्रं साध्यादन्यः साध्येन सह विरुद्धश्च। प्रयोगनियमार्थमिति केचित्।

त्रिरूपाणि च त्रीण्येव लिङ्गानि त्रीणि रूपाणि येषां तानि त्रीण्येव लिङ्गानि। अनुपलब्धिस्त्रिरूपं लिङ्गम्। स्वभावस्त्रिरूपं लिङ्गम्। कार्यं त्रिरूपं लिङ्गम्। साधनं ज्ञापकं हेतुर्व्याप्तमिति लिङ्गपरनामानि। तत्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कार्यं यथा—यत्र धूमस्तत्राग्निः, यथा महानसे । धूमश्चात्रेति । व्याप्तिपक्षधर्मतासंज्ञकं द्व्यवयवमेव साधनवाक्यं सौगतानाम् । अन्ये तु प्रतिज्ञाहेतुर्दृष्टान्त उपनयो निगमनं चेति पञ्चावयवं साधनवाक्यमाहुः । उपन्यासश्चैदशः । अग्निरत्र, धूमात्, यत्र धूमस्तत्राग्निः यथा महानसे, तथा चायं, तस्मादग्निरिति । एतच्चायुक्तं प्रतिज्ञावचनमात्रात्सम्बन्धरहितात्साध्यप्रतिपत्तेरयोगात् । सम्बन्धाभावस्तु शब्दार्थयोः सम्बन्धदूषणे प्रतिपादितत्वान्न पुनरुच्यते । प्रतिज्ञामन्तरेण पञ्चम्यन्तहेतुप्रयोगोऽप्ययुक्तः । हेतुं विनोपनयदृष्टांतावप्ययुक्तौ । यत्र प्रतिज्ञैव नास्ति तत्र प्रतिज्ञायाः पुनर्वचनं निगमनं कुतो भविष्यतीति सर्वमालूनविशीर्णम् ।

अयं च कार्यहेतुर्विषयभेदेन त्रिविधः । अग्न्यादौ साध्ये धूमादिस्त्रिविधप्रत्यक्षानुपलम्भेन निश्चेतव्यः । चक्षुरादौ साध्ये ज्ञानं कादाचित्ककार्योत्पादान्निश्चीयते । रूपादौ साध्ये रसादिरेकसामग्र्यधीनतया निश्चीयते यथा मातुलुङ्गे रूपानुमानम् । अत्र रूपे जनयितव्ये पूर्वकं रूपमुपादानम् । रसस्तु सहकारिकारणम् । पूर्वपुञ्जादुत्तरपुञ्जस्योत्पत्तौ न्याय एषः । ननूपादानसहकारिणोरन्वयव्यतिरेकानुविधानस्य कार्यं प्रति तुल्यत्वात्को भेदः ? । यद्विक्रियया यन्निष्पत्तिरेकसन्ताने तत्कार्यं प्रति पूर्वकमुपादानम् । यत्सन्तानान्तरे विशेषोदयनिमित्तं तत्सहकारिकारणम् । यथा शाल्यङ्कुरे जनयितव्ये शालिबीजमुपादानम् । क्षितिसलिलादि तत्र सहकारि । तदेवं कार्यहेतुस्तदुत्पत्तिसम्बन्धाद् गमक इति स्थितम् ।

स्वभावः स्वसत्तामात्रभाविनि साध्यधर्मे हेतुरुच्यते । स तस्य साध्यधर्मस्य स्वभावो वेदितव्यः । यथा वृक्षव्यवहारयोग्योऽयं शिंशपाव्यवहारयोग्यत्वात् । अयमिति पुरः परिदृश्यमानः पदार्थो धर्मी । शिंशपाव्यवहारयोग्यत्वादिति हेतुः । शिंशपाव्यवहारयोग्यत्वादिति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कोऽर्थः ? । शाखापत्रवर्णसंस्थानविशेषव्यवहारयोग्यत्वादित्यर्थः । वृक्षव्यवहारयोग्यत्वं साध्यम् । नन्वेकत्वे साध्यसाधनभावो न युक्तः प्रतिज्ञार्थैकदेशत्वात् । न । अभेदेऽपि कश्चित्प्रतिपत्ता शिंशपाव्यवहारं कृत्वा वृक्षव्यवहारं प्राकृतमपि व्यामोहेन किञ्चिदारोप्य पुनर्न करोति । स इदानीं स्वभावहेतुना व्यवहार्यते । तस्मादेतयोः परमार्थत एकत्वेऽपि विकल्पबुद्धौ व्यावृत्तिसमाश्रयेण समुत्पन्नायां भेदेन प्रतिभासनात् साध्यसाधनत्वं न विरुध्यत इति ।

अनुपलब्धि[ब्धे]र्यथा-नास्तीह प्रदेशे घटः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः । उपलब्धिलक्षणप्राप्तस्येति दृश्यस्येत्यर्थः । नन्वसतः कथं दृश्यता ? । एकेन्द्रियज्ञानग्राह्ये प्रदेशे उपलभ्यमाने यदि घटः स्यात् दृश्य एव भवेदिति । उपलम्भप्रत्ययान्तरसाकल्यादृश्यतया सम्भावितो न तु दृश्य एव । तत्र तस्यानुपलब्धिरिति हेतुः । स चैकज्ञानसंसर्गिपदार्थदेकज्ञानसंसर्गिपदार्थोपलम्भाच्च निश्चीयत इति तदुभयं कर्मकर्तृभावेन पर्युदासवृत्त्याऽनुपलब्धिरुच्यते । ननु?[तु] प्रसज्यवृत्त्योपलब्धिनिवृत्तिमात्रम् । तद्धि स्वयमेव न किञ्चिदिति कथं साधनं स्यात् । नापि प्रतिषेध्यादन्यस्य ज्ञानमात्रं रूपोपलम्भादपि नारङ्गरसनिषेधप्रसङ्गात् । तस्मान्निषेध्यादन्यद्विशिष्टमेव वस्तुद्वयं प्रदेशः प्रदेशज्ञानं चाऽनुपलब्धिरिति स्थितम् । अत एवाभावो न साध्यते । तस्य घटविविक्तप्रदेशग्राहिणा प्रत्यक्षेणैव सिद्धत्वात् । अभावव्यवहारस्तु मूढं प्रत्यनुपलम्भेन साध्यते । तथा हि-कश्चिन्मूढो रजःप्रभृतिषु साङ्ख्यप्रसिद्धेषु गुणेष्वनुपलम्भेन प्रवर्त्तिताभावव्यवहारोऽपि पुनः सर्वत्र सर्वमस्तीति स्वसिद्धान्ताभ्यासात्क्वाऽपि प्रदेशादौ घटानुपलम्भे सत्यपि नाभावव्यवहारं करोतीत्यनुपलम्भेन त्रिविधव्यवहारः कार्यते । तत्र

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निःशङ्कगमनागमनादिलक्षणः कायिको व्यवहारः । घटोऽत्र नास्तीति वाचिकः । ईदृश एवान्तर्जल्पाकारो मानसिकश्चेति । अनुपलम्भस्य कर्मधर्मपक्षे साध्येन सह तादात्म्यलक्षण एव सम्बन्धो बोद्धव्यः । कर्तृधर्मपक्षे तु तदुत्पत्तिः । तथा हि घटविविक्त प्रदेशः प्रदेशज्ञानं वाऽनुपलब्धिरित्युक्तम् । असद्व्यवहारयोग्यत्वं तु तस्यैव स्वभावः । ज्ञानं तु प्रदेशस्य कार्यमिति । ननु यद्यनुपलब्धेरपि तादात्म्यतदुत्पत्ती एव सम्बन्धौ कथं तर्हि कार्यस्वभावाभ्यामनुपलब्धेर्भेदः ? । प्रतिषेध-साधनाद्भेदो न वस्तुतः । यथोक्तम्–'**अत्र द्वौ वस्तुसाधिनौ, एकः प्रतिषेधहेतु**'रिति । उपलब्धिलक्षणप्राप्त[त्व]विशेषणेन देशविप्रकृष्टे सुमेर्वादौ कालविप्रकृष्टे भविष्यच्छङ्खचक्रवर्त्त्यादौ स्वभावविप्रकृष्टे पिशाचादावनुपलम्भमात्रसद्भावेऽपि नाभावव्यहार इत्युक्तं भवति । इयं चानुपलब्धिर्वर्त्तमानकाले प्रमाणम्, विशिष्टस्मरणसद्भावेऽतीतकाले च । अनागतकाले त्वनुपलब्धिः स्वयमेव सन्दिग्धरूपा । ततो न प्रमाणम् । यदाह न्यायवादी–'**अमूढस्मृतिसंस्कारस्यातीतस्य वर्त्तमानस्य च प्रतिपत्तृप्रत्यक्षस्य निवृत्तिरनुपलब्धिरभावव्यवहारसाधिनी**'ति ।

तत्र यदा दूरत्वान्निषेध्यस्यायोग्यदेशत्वं स्यात्, तदा दृश्यानुप-लब्धिः साक्षात्प्रयोक्तुं न शक्यत इति कार्यानुपलब्ध्यादयः प्रयुज्यन्ते । अत एवेयं प्रमाणभेदेन षोडशधा भवति । तत्र स्वभावानुपलब्धिर्यथा–नास्त्यत्र धूमः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः । प्रतिषेधस्य धूमस्य यः स्वभावस्तस्येहानुपलब्धिः ॥१॥ कार्यानुपलब्धिर्यथा–नेहाप्रतिबद्ध-सामर्थ्यानि धूमकारणानि सन्ति, धूमाभावात् । प्रतिषेध्यानां हि धूमकारणानां कार्यं धूमः, तस्येहानुपलब्धिः ॥२॥ कारणानुपलब्धिर्यथा नात्र धूमो दहनाभावात् । प्रतिषेध्यस्य धूमस्य कारणं दहनः, तस्येहानुप-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लब्धिः ॥३॥ व्यापकानुपलब्धिर्यथा नात्र शिंशपा वृक्षाभावात् । प्रतिषेध्यायाः शिंशपाया व्यापको वृक्षः, तस्येहानुपलब्धिः ॥४॥ स्वभावविरुद्धोपलब्धिर्यथा नात्र शीतस्पर्शो वह्नेरिति । प्रतिषेध्यस्य शीतस्पर्शस्य यः स्वभावस्तस्य विरुद्धो वह्निस्तस्य चेहोपलब्धिः ॥५॥ कार्यविरुद्धोपलब्धिर्यथा नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति वह्नेरिति । अन्त्यदशाप्राप्तमेव(?) कारणं कार्यं जनयति न सर्वम्, ततो विशेषणोपादानम् । प्रतिषेध्यानां शीतकारणानां कार्यं शीतम्, तस्य विरुद्धो वह्निः, तस्येहोपलब्धिः ॥६॥ कारणविरुद्धोपलब्धिर्यथा—नास्य रोमहर्षादिविशेषाः सन्ति सन्निहितदहनविशेषत्वात् । प्रतिषेध्यानां रोमहर्षादिविशेषाणां कारणं शीतम्, तस्य विरुद्धो दहनविशेषः, तस्य चेहोपलब्धिः ॥७॥ व्यापकविरुद्धोपलब्धिर्यथा—नात्र तुषारस्पर्शो दहनात् । प्रतिषेधस्य तुषारस्पर्शस्य व्यापकं शीतम्, तस्येह विरुद्धो दहनविशेषः, तस्योपलब्धिः ॥८॥ स्वभावविरुद्धकार्योपलब्धिर्यथा—नात्र तुषारस्पर्शो धूमात् । प्रतिषेध्यस्य तुषारस्पर्शस्य यः स्वभावस्तस्य विरुद्धो वह्निः, तस्य कार्यं धूमः, तस्य चेहोपलब्धिः ॥९॥ कार्यविरुद्धकार्योपलब्धिर्यथा—नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति धूमादिति । प्रतिषेध्यानां शीतकारणानां कार्यं शीतम्, तस्य विरुद्धो वह्निः, तस्य कार्यं धूमः, तस्येहोपलब्धिः ॥१०॥ कारणविरुद्धकार्योपलब्धिर्यथा—न रोमहर्षादि-युक्तपुरुषवानयं प्रदेशो धूमात् । प्रतिषेध्यानां हि रोमहर्षादिविशेषाणां कारणं शीतम्, तस्य विरुद्धो वह्निः, तस्य कार्यं धूमस्तस्येहोपलब्धिः ॥११॥ व्यापकविरुद्धकार्योपलब्धिर्यथा—नात्र तुषारस्पर्शो धूमात्, प्रतिषेधस्य तुषारस्पर्शस्य व्यापकं शीतम्, तस्य विरुद्धोऽग्निः, तस्य कार्यं धूमः, तस्येहोपलब्धिः ॥१२॥ स्वभावविरुद्धव्याप्तोपलब्धिर्यथा—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नात्राग्निस्तुषारस्पर्शात् । प्रतिषेध्यस्य हि वह्नेर्यः स्वभावस्तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्य चेहोपलब्धिः ॥१३॥ कार्यविरुद्ध-व्याप्तोपलब्धिर्यथा—नेहाप्रतिबद्धानि वह्निकारणानि सन्ति तुषार-स्पर्शादिति । प्रतिषेध्यानां वह्निकारणानां कार्यं वह्निः, तस्य विरुद्धं शीतम्, तेन व्याप्तस्तुषारस्पर्शः, तस्येहोपलब्धिः ॥१४॥ कारणविरुद्धव्याप्तोप-लब्धिर्यथा—नात्र धूमस्तुषारस्पर्शात् । प्रतिषेध्यस्य धूमस्य कारणं वह्निः, तस्य विरुद्धं शीतम् । तेन व्याप्तस्तुषारस्पर्शः, तस्येहोपलब्धिः ॥१५॥ व्यापकविरुद्धव्याप्तोपलब्धिर्यथा—नायं नित्यः कादाचित्ककार्यकारि-त्वात् । प्रतिषेध्यस्य हि नित्यत्वस्य निरतिशयत्वं व्यापकम्, तस्य विरुद्धं सातिशयत्वम्, तेन व्याप्तं कादाचित्ककार्यकारित्वम्, तस्य चेहोपलब्धिः ॥१६॥ एते च कार्यानुपलब्ध्यादयः पञ्चदश प्रयोगाः स्वभावानुपलब्धि-स्वभावा एव बोद्धव्याः । प्रयुक्तिभेदेन परं भेदः । अत्र स्वभावानुपलब्धे-रसद्व्यवहारयोग्यत्वं साध्यम् । न त्वभावः । अभावो हि पर्युदासवृत्त्या-ऽनुपलम्भ इत्युक्तम् । तस्य च प्रत्यक्षेणैव सिद्धत्वात् । अपरैश्च सर्वैरभावोऽभावव्यवहारश्च । तेषां परोक्षविषयत्वात् ।

॥ इति तर्कभाषायां स्वार्थानुमानपरिच्छेदो द्वितीयः समाप्तः ॥

परार्थानुमानपरिच्छेदः

त्रिरूपलिङ्गाख्यानं परार्थमनुमानम् । अन्वयव्यतिरेकपक्षधर्मता-संज्ञकानि त्रीणि रूपाणि येन वचनेन ख्याप्यन्ते तद्वचनमुपचारादनुमान-शब्देनोच्यते । तद् द्विविधम्—साधर्म्यवद्वैधर्म्यवच्च । साध्यधर्मिदृष्टान्त-धर्मिणोर्हेतुसत्ताकृतं सादृश्यं साधर्म्यम् । तद्यस्यास्ति तत्साधर्म्यवत् साधनवाक्यम् । साध्यधर्मिदृष्टान्तधर्मिणोर्हेत्वसत्ताकृतं वैसादृश्यं वैधर्म्यम्—तद्यस्यास्ति तद्वैधर्म्यवत्साधनवाक्यम् । तत्र स्वभावहेतोः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साधर्म्यवन्तं प्रयोगं प्रदर्शयितुं सौत्रान्तिकमतमाश्रित्य भगवता यदुक्तं **संस्कृतं सर्वं क्षणिकमिति** तद् व्युत्पाद्यते । समेत्य=सम्भूय हेतुभिः-प्रत्ययैः कृतं वस्तुजातं संस्कृतम् क्षणिकमिति उत्पत्तिक्षण एव सत्त्वात्। सर्वं तावद्घटादिकं वस्तु मुद्गरादिसन्निधौ नाशं गच्छद् दृश्यते, तत्र येन स्वरूपेणान्त्यावस्थायां घटादिकं विनश्यति तच्चेत्स्वरूपमुत्पन्नमात्रस्य विद्यते, तदानीमुत्पादानन्तरमेव तेन विनष्टव्यमिति व्यक्तमस्य क्षणिकत्वम्। **अथे**दश एव स्वभावस्तस्य स्वहेतोर्जातो यत्कियन्तं कालं स्थित्वा **विनश्यति,** एवं तर्हि मुद्गरादिसन्निधानेऽप्येष एव तस्य स्वभाव इति पुनरप्यनेन तावन्तमेव कालं स्थातव्यमिति नैव विनश्येदिति । तस्मात्तत्क्षणद्वयस्थायित्वेनाप्युत्पत्तौ प्रथमक्षणवद् द्वितीयेऽपि क्षणे क्षणद्वयस्थायित्वात्पुनरपरक्षणद्वयमवतिष्ठेत । एवं तृतीयेऽपि क्षणे तत्स्वभावत्वान्नैव विनश्येदिति । **स्यादेतत्**—स्थावरमेव तद्वस्तु स्वहेतोर्जातम्, परं [प्र]बलेन विरोधकेन मुद्गरादिना विनाश्यत इति । **तदसत्**। कथं पुनरेतद्योक्ष्यते । न च तद्विनश्यति स्थावरत्वात् विनाशश्च तस्य विरोधिना [प्र]बलेन क्रियत इति न ह्येतत्सम्भवति जीवति च देवदत्तो मरणं चास्य भवतीति । अथ विनश्यति तर्हि कथमविनश्वरं तद्वस्तु स्वहेतोर्जातमिति । न हि म्रियते चामरणधर्मा चेति युज्यते वक्तुम् । तस्मादनश्वरत्वे कदाचिदपि नाशायोगात् दृष्टत्वाच्च नाशस्य नश्वरमेव तद्वस्तु स्वहेतोरुपजातमङ्गीकर्त्तव्यम्। तस्मादुत्पन्नमात्रमेव विनश्यति । तथा च क्षणक्षयित्वं सिद्धं भवति । प्रयोगः पुनरयं कर्त्तव्यः—यद्विनश्वरस्वरूपं तदनन्तरानवस्थायि यथाऽन्त्यक्षणवर्त्ति घटस्य रूपम्, विनश्वरस्वरूपं च रूपादिकमुदयकाल इति स्वभावहेतुः । यदि क्षणक्षयिणो भावाः कथं तर्हि स एवायमिति प्रत्यभिज्ञा स्यात् । निरन्तरसदृशापरापरोत्पादादविद्यानु-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बन्धाच्च । पूर्वक्षणविनाशकाल एव तत्सदृशं क्षणान्तरमुदयते, तेनाकार-विलक्षणत्वाभावादभावेनाव्यवधानाच्चात्यन्तोच्छेदेऽपि स एवायमित्य-भेदाध्यवसायी प्रत्ययः प्रस्तूयते । अत्यन्तभिन्नेष्वपि लूनपुनरुत्पन्न-कुशकेशादिषु दृष्ट एवायं स एवायमिति प्रत्ययः । तथेहापि किं न सम्भाव्यते । तस्मात्सर्वं संस्कृतं क्षणिकमिति सिद्धमेवैतत् । निर्विशे-षणस्य स्वभावहेतोरयं प्रयोग इति ।

तथाऽपरोऽपि निर्विशेषणप्रयोगः-यत्सत् तत्सर्वमनित्यं यथा घटः । सन्तश्चामी प्रमाणप्रतीताः पदार्थाः । तथाऽपरोऽपि वेदवाक्यस्य पौरुषेयत्वसाधनाय स्वभावहेतुः । यथा यद्वाक्यं तत्पौरुषेयम् । यथा रथ्यापुरुषवाक्यम् । वाक्यं चेदमग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादि । सविशेषणप्रयोगो यथा—यदुत्पत्तिमत्तत्सर्वमनित्यं यथा घटः । उत्पत्तिमांश्च शब्दः । अनुत्पन्नेभ्यो व्यावृत्तो भाव उत्पन्न उच्यते । यदा सैव व्यावृत्ति-र्व्यावृत्त्यन्तरव्यवच्छेदेन व्यतिरिक्तोच्यते भावस्योत्पत्तिरिति तदा कल्पित-भेदेन स्वभावभूतधर्मेण विशिष्टः स्वभावो हेतुः । नन्वसत्त्वव्यावृत्त्या सन्नुच्यते । व्यावृत्त्यन्तरव्यवच्छेदेन च व्यतिरिक्तमिव सत्त्वमुच्यते । अतस्तदपि स्वभावभूतधर्मभेदेन स्वभावोदाहरणं प्राप्तम् । नैतदस्ति । सत एव धर्मित्वान्न सत्त्वेन कस्य चिद्विशेषणम् । अनुत्पन्नव्यवच्छेदेन पुनरुत्पत्तिः सतो विशेषणम् । भिन्नविशेषणस्य प्रयोगो यथा—यत्कृतकं तदनित्यं यथा घटः । कृतकश्च शब्दः । ननु चित्रगुरिति भिन्नविशेषणस्य प्रयोगः । यथा चात्र चित्रगोशब्दो भिन्नविशेषणवाचकोऽस्ति । न तथा कृतकशब्दे भिन्नविशेषणवाचकं किमप्यस्ति । तत्कथं भिन्नविशेषण-स्योदाहरणम् । अपेक्षितपरव्यापारः स्वभावनिष्पत्तौ भावः कृतक इत्युच्यते । ततः कृतकशब्दः परव्यापारसापेक्षं स्वभावं प्रकृत्यैव वदन्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भिन्नविशेषणमेवाह। प्रयुक्तविशेषणस्य स्वभावस्य प्रयोगः । यः प्रत्ययभेदभेदी स कृतकः । यथा धूमः प्रत्ययं कारणं तस्य भेदस्तेन भेत्तुं शीलं यस्य स प्रत्ययभेदभेदी । कारणमहत्त्वेन महत्त्वं कारणाल्पत्त्वेनाल्पत्वं यस्येत्यर्थः। प्रत्ययभेदशब्दस्य भिन्नविशेषणवाचकस्यात्र प्रयुक्तत्वात् प्रयुक्तविशेषणोऽयम् । स्वभावहेतुप्रदर्शनं च व्यामोहनिवृत्तये। धर्मभेदकल्पनयाऽपि स्वभावहेतुरेव प्रसज्यत इति प्रतिपादितम् । स्वभावहेतोर्वैधर्म्यवान् प्रयोगो यथा—यद्यदाऽनन्तरानवस्थायि न भवति न तत्तदा विनश्वरस्वरूपं यथाऽऽकाशम् । विनश्वरस्वरूपं च रूपादिकमुदयकाले । व्यतिरेकप्रयोगे साधनाभावेन साध्याभावो व्याप्तत्वात्साधनाभावे नियतो भवतीति बोद्धव्यम् । तथाऽपरोऽपि वैधर्म्यप्रयोगः । यत्र क्षणिकत्वं नास्ति तत्र सत्त्वमपि यथा गगनारविन्दे संश्च शब्दः । तथा यत्रानित्यत्वं निवृत्तं तत्रोत्पत्तिमत्त्वमपि यथा कूर्मरोम्णि । उत्पत्तिमांश्च शब्दः । यत्रानित्यत्वं निवृत्तं तत्र कृतकत्वमपि, यथा शशशृङ्गे । कृतकश्च शब्दः । यत्र कृतकत्वं नास्ति तत्र प्रत्ययभेदभेदित्वमपि यथा गगने । प्रत्ययभेदभेदी च शब्द इति। कार्यहेतोः साधर्म्यवान्प्रयोगो यथा—यत्र यत्र धूमस्तत्र तत्राग्निर्यथा महानसे धूमश्चात्र । कार्यहेतुरपि प्रत्यक्षानुपलम्भाभ्यां सिद्ध एव कार्यकारणभावे सति, कारणे साध्ये प्रयोक्तव्यः । वैधर्म्यप्रयोगो यथा—असत्यग्नौ न भवत्येव धूमो यथा महाह्रदे । अस्ति चेह धूम इति। अनुपलब्धेः साधर्म्यवान्प्रयोगो यथा—अवयविनिराकरणाय यद्यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्रासद्व्यवहारयोग्यम्, यथा नरशिरसि शृङ्गम् । नोपलभ्यते चात्रोपलब्धिलक्षणप्राप्तः तदुपलभ्यत एव। यथा नीलादिविशेषः । न चैवमिह प्रदेशविशेषे उपलब्धिलक्षणप्राप्तस्योपलब्धिर्घटस्येति । सर्वत्र साधर्म्यवति साधनवाक्ये साध्येन साधनं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्याप्तम् । वैधर्म्यवति पुनः साधनवाक्ये साधनाभावेन साध्याभावो व्याप्त इति प्रतिपत्तव्यम् । साधनस्य च साध्ये नियतत्वकथनं साध्याभावस्य च साधनाभावे नियतत्वकथनं नाम व्याप्तिरभिधीयते । ततः प्रमाणेन व्याप्तिसिद्धौ सत्यां नेदं क्वापि शङ्कनीयम् साधनं च स्यात् साध्यं च तत्र धर्मिणि न भवतीति । यत्र प्रमाणेन सर्वोपसंहारवती व्याप्तिरेव न सिद्धा तत्र शङ्काप्रसरोऽनिवार्यः । यथेश्वरसिद्धौ कार्यत्वानुमाने । **तथा हि तेषां साधनोपन्यासः** । इहान्यः सर्वज्ञो भवतु मा वाभूत् । भगवान्पुनरीश्वरः शक्यते सर्वज्ञः साधयितुम् । तथा हि त्रयः खलु भावा भवन्ति । केचिन्निश्चितकर्तृका यथा घटादयः । केचिन्निश्चितकर्तृनिवृत्तयो यथा व्योमादयः । अन्ये पुनः सन्दिग्धकर्तृका यथा क्षित्यादयः । न पुनरेते-भ्योऽन्यः प्रकारोऽस्ति । तत्र ये दृश्यमानोत्पत्तयो वनस्पत्यादयो ये च चिरोत्पन्नविश्वम्भरादयः ते सर्वे सन्दिग्धकर्तृत्वेन व्यवतिष्ठमाना बुद्धि-मत्कर्तृकाः कार्यत्वात्कुम्भादिवत् । नायमसिद्धो हेतुः । कार्यत्वस्य सर्वेषां प्रमाणसिद्धत्वात् । नापि विरुद्धः- सपक्षे भावात् । न चानैकान्तिकः । साध्यविपर्यये बाधकप्रमाणसद्भावात् । तथा हि कार्यं तावद्बुद्धिमतः कुम्भकारादुपजायमानं भूयोदर्शनसहायेन मानसेन प्रत्यक्षेणोपलब्धम् । तद्यदि बुद्धिमन्तमन्तरेणापि स्यात् तदानीं बुद्धिमतः सकाशात्कदाचिदपि नोपजायेत । अकारणात्कार्यस्य सकृदप्युत्पादायोगात् । तस्मान्नेदं क्वापि शङ्कनीयं कार्यं च स्यान्न बुद्धिमद्धेतुकमिति । **अत्रेदमभिधीयते** । साधनं खलु सर्वत्र साध्यसाधनयोः सर्वोपसंहारेण प्रमाणेन व्याप्तौ सिद्धायां साध्यं गमयेदिति सर्ववादिसम्मतम् । तत्र यदि दृश्यशरीरविशिष्टेन बुद्धिमता व्याप्तिर्गृह्यते तदा तथाभूतसाध्यमन्तरेणापि जायमाने तृणादौ कार्यत्वस्य दर्शनात्प्रमेयत्वादिवत्साधारणानैकान्तिकोऽयं हेतुः । तृणादयः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पक्षीकृता इत्यपि न वक्तव्यम् । न हि व्यभिचारविषय एव पक्षो भवितुमर्हति । *'सन्दिग्धे हेतुवचनात् व्यस्तो हेतोरनाश्रय'* इति न्यायात् । **अथा**शक्यारोहणेऽपि पर्वते दहनमन्तरेण धूमदर्शनादेवं धूमेऽपि व्यभिचारो वक्तुं सुलभ एव । **तन्न** । अशक्यारोहणत्वेन पर्वते दहनस्य द्रष्टुमशक्यत्वात् युक्तं तत्र सन्दिग्धविषयत्वम् । प्रस्तुते तु दृश्यशरीरविशिष्टेन बुद्धिमता व्याप्तौ गृह्यमाणायां दृश्यानुपलम्भेन बुद्धिमतो बाधो भवतीत्युक्तम् । अथादृश्यशरीरेण बुद्धिमन्मात्रेण वा व्याप्तिरवगम्यते तदाऽदृश्यस्य बुद्धिमन्मात्रस्य वा साध्यस्य दृश्यानुपलम्भेन व्यतिरेकासिद्धेः सन्दिग्धविपक्षव्यावृत्तिकोऽयं हेतुः । साध्याभावप्रयुक्तस्य साधनाभावस्यासिद्धत्वेन व्याप्तेरभावात् । तथा चोक्तम्–

'कार्यत्वस्य विपक्षवृत्तिहतये सम्भाव्यतेऽतीन्द्रियः ।
कर्त्ता चेद् व्यतिरेकसिद्धविधुरा व्याप्तिः कथं सिध्यति ।
दृश्योऽथ व्यतिरेकसिद्धिमनसा कर्त्ता समाश्रीयते
तत्त्यागेऽपि तदा तृणादिकमिति व्यक्तं विपक्षेक्षणम् ॥'

यच्च त्रिलोचनेनोक्तम्–स्वाभाविकः सम्बन्धो धूमादीनां वह्न्यादिभिः सह । तदुपाधेरनुपलभ्यमानत्वात् क्वचिद् व्यभिचारस्यादर्शनादिति । **तन्न युक्तम्** । यतोऽर्थान्तरं किञ्चिदपेक्षणीयमुपाधिशब्देनाभिधीयते । न चार्थान्तरमवश्यं दृश्यं स्यात् । अदृश्यमपि देशकालस्वभावविप्रकृष्टं सम्भाव्यते । अतो धूमस्यापि दहनेन सह सम्बन्धे भविष्यत्युपाधिः । न चोपलभ्यत इति कथमदर्शनमात्रेण नास्त्येवेत्युच्यते । यदप्युक्तं व्यभिचारस्यादर्शनादिति साधनं तदपि सन्दिग्धासिद्धम् । प्रत्ययान्तरवैकल्येनाहत्य व्यभिचारस्यादर्शनेऽपि सर्वत्र निषेद्धुमशक्यत्वात् । न चैतावता प्रामाणिकलोकयात्रातिक्रमः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रामाणिकैरेव साधकबाधकप्रमाणाभावे संशयस्य विहितत्वात् । न चैवं संशये सर्वत्राप्रवृत्तिप्रसङ्गः । प्रमाणादर्थसंशयाच्च प्रवृत्तेरुपपत्तेः । **यदप्युक्तम्**—यथाऽन्यत्वाविशेषेऽपि बौद्धानां किञ्चिदेव वस्तु कार्यं स्यात् किञ्चिदेव कारणं न सर्वं तथा ममाप्यन्यत्वाविशेषेऽपि किञ्चिदेव धूमादिकं वस्तु स्वाभाविकसम्बन्धेन सम्बद्धं न सर्वमिति । **तन्न युक्तम्**। यथा धूमाख्यं वस्तु दहनायत्तमिति प्रमाणसिद्धं तथा किं स्वाभाविकसम्बन्धोऽपि प्रमाणसिद्धः, येनैवमुच्यते । किञ्च स्वाभाविकः सम्बन्ध इति कोऽर्थः ? । किं स्वतोभूतः स्वहेतोर्वा भूतोऽहेतुको वा इति त्रयो विकल्पाः । तत्र न तावदाद्यः पक्षः स्वात्मनिकारित्वविरोधात् । नापि द्वितीयस्तदुत्पत्तिसम्बन्धस्वीकारप्रसङ्गात् । अथाहेतुकः, तदा देशकाल-स्वभावनियमाभावादतीवासङ्गतः स्वाभाविकसम्बन्धवादः । किञ्च—साधर्म्येण वा वैधर्म्येण वा दृष्टान्तमात्रमप्यस्तीति (न)व्याप्तेर-(पि)सिद्धिः । यदृच्छामिलितयोरपि करभगर्दभयोस्तथाभावप्रसङ्गात् । तस्मान्निदर्शनं नाम गृहीतविस्मृतप्रतिबन्धग्राहकप्रमाणस्मरणद्वारेण हेतावुपयुज्यते । न स्वसन्निधिमात्रेण । तथा हि-न तावदाकाशे साध्या-भावेन साधनाभावः प्रतीयते । आकाशे हि यथा बुद्धिमत्कारण-निवृत्तिस्तथाऽचेतनस्यापि कारणस्य निवृत्तिरस्त्येव । तत्कस्याभावप्रयुक्तः कार्यभावः प्रतीयताम्, येन साध्याभावप्रयुक्तः साधनाभावो व्यतिरेकः सिध्यति । नापि घटे कार्यत्वस्य बुद्धिमदन्वयदर्शनादाकाशेऽपि बुद्धिमत्कारणनिवृत्तिः तथाऽचेतनस्यापि कारणस्य निवृत्तिरस्त्येव । तदभावादेव कार्यत्वाभावो वक्तुं युज्यते । यस्मादनयोस्तादात्म्यं तदुत्पत्तिरन्यो वा स्वाभाविकादिसम्बन्धः प्रमाणतो न प्रसाधित इत्युक्तम्। किञ्चादर्शनमात्रेण व्यतिरेको न सिध्यति । तथा हि विपक्षे हेतुर्नोपलभ्यत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यनेनोपलम्भकप्रमाणनिवृत्तिरुच्यते । प्रमाणं च प्रमेयस्य कार्यम्, नाकारणं विषय इति न्यायात् । न च कार्यनिवृत्तौ कारणनिवृत्तिरुपलब्धा । निर्धूमस्यापि वह्नेर्दर्शनात् । यदि पुनः प्रमाणसत्तया प्रमेयसत्ता व्याप्ता स्यात्, तदा युक्तमेतत्केवलम् । इयमेव व्याप्तिरसम्भाविनी, सर्वस्य सर्वदर्शित्वप्रसङ्गात् । तन्नादर्शनमात्रेण व्यतिरेकः सिध्यति । यथोक्तम्—

सर्वा दृष्टिश्च सन्दिग्धा स्वादृष्टिर्व्यभिचारिणी ।
खलविलान्तर्गतस्य बीजस्यासत्त्वदर्शनात् ॥

यदपि वाचस्पतिराह—'विशेषस्मृत्यपेक्ष एव संशयो भवति । ततो यथादर्शनमेवाशङ्कितव्यम्' **अत्रोच्यते** । नायं न्यायः सार्वत्रिकः । तथाऽप्यभ्युपगम्यापि ब्रूमः । तथाहि—तादात्म्यतदुत्पत्तिसम्बन्धत्यागेन साधारणधर्मेण प्रमेयत्वधूमत्वकार्यत्वानां तन्मतेन सजातीयत्वम् । तत्र प्रमेयत्वस्य व्यभिचारदर्शनमेव शङ्कामुपस्थापयतीति यथादर्शनमेवेदमाशङ्कितम् । अतः सन्दिग्धविपक्षव्यावृत्तिकत्वं हेतुदूषणं दुर्वारमेव । एतच्च सद्दूषणमेव । अतो यदनेनोक्तं 'नायं हेतुदोषोऽतो न परिहर्त्तव्योऽस्य चोपन्यासोऽसद्दोषोद्भावनं नाम निग्रहस्थान'मिति । तदिदानीं स्वमतेनैवानेन वादिना निरनुयोज्यानुयोगलक्षणेनाऽऽत्मा बाधित इत्युपेक्षणीयोऽयं देवानांप्रियः । किञ्च—यदि बुद्धिमन्मात्रपूर्वकत्वमनेन साध्यते तदा सिद्धसाधनतादूषणं साधनस्य । अथैको नित्यः सर्वज्ञ इत्यादिविशेषणविशिष्टं बुद्धिमत्पूर्वकत्वं साध्यते तदैवं विशेषणविशिष्टेन साध्येन सह साधनस्य कार्यत्वस्य दृष्टान्तधर्मिणि प्रमाणेन व्याप्तेरसिद्धेरनैकान्तिकत्वम् । **अथ** सामान्येन व्याप्तिमादाय विशेषस्य पक्षधर्मत्वबलात्सिद्धिरुच्यते । **तन्न युक्तम्** । येन साध्यगतेन विशेषणेन विना हेतोर्वृत्तिर्धर्मिणि न घटते तस्य विशेषस्य पक्षधर्मबलाद्युक्ता सिद्धिः । यथा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूमात्पर्वतैकदेशवर्त्तित्वस्य दहनधर्मस्य न तु तार्णत्वादीनां विशेषाणाम्। तार्णत्वमन्तरेणापि पार्णत्वे धूमस्य सम्भवात्। तद्वद्बुद्धिमतोऽपि शरीरादिवर्त्तित्वं यदि सिध्यति सिध्यतु। न पुनरत्यन्तविलक्षणं सर्वज्ञत्वम्। असर्वज्ञत्वेऽपि कार्यस्य सम्भवात्। उपादानाद्यभिज्ञत्वादपि न सर्वज्ञत्वसिद्धिः। एकत्वसिद्धौ हि सिध्यत्येतत्। न चैकत्वं सिद्धम्। अनेककर्तृपूर्वकत्वेऽपि कार्यत्वस्य सम्भवात्। यथाऽनेककीटिकाशतनिष्पादितः शक्रमूर्द्धा। अथ शक्रमूर्द्धोऽपीश्वरपूर्वकत्वं साध्यम्। तर्हि घटस्यापीश्वरपूर्वकत्वसिद्धौ कुतो दृष्टान्तत्वम्? । अथ कुम्भकारस्य कर्तृत्वं दृष्टम्। कथमपाक्रियते कीटानां च हेतुत्वम्? दृष्टं तदपि कथं वार्यते। नापि बहूनां करणे विमतिसम्भावना दृष्टत्वादेवेति। किञ्च नित्यैकसर्वज्ञे बुद्धिमति साध्ये विरुद्धोऽप्येषः। अनित्यानेकासर्वज्ञेन बुद्धिमता कार्यत्वस्य व्याप्तत्वात्। तथा हि साध्यविपर्ययसाधनादिह विरुद्ध उच्यते। अयं च साध्यविपरीतं साधयतीति। तस्मात्साध्यसाधनयोर्व्याप्तिर्दृष्टान्तधर्मिणि प्रमाणेनावश्यं दर्शयितव्येति स्थितम्।

ननु साधर्म्यवति साधनवाक्येऽन्वय एवोक्तो न व्यतिरेकः। वैधर्म्यवति च व्यतिरेक एवोक्तो नान्वयः। तत्कथमाभ्यां त्रिरूपं लिङ्गं कथ्यत इति **चेन्नैष** दोषः। यस्मात्साधर्म्यवति वाक्ये उपन्यस्ते सामर्थ्यादेव व्यतिरेकोऽवगम्यते। व्यतिरेकागृहीतौ च साध्याभावेऽपि न साधनाभाव इति विपर्ययः सम्भावयितव्यः। एवं चान्वयस्यैवाभावः स्यात्। सत्यपि साधने साध्याभावादिति सामर्थ्यम्। तथा वैधर्म्यवति साधनवाक्ये उपन्यस्ते सामर्थ्यादेवान्वयोऽवगम्यते। अन्वयागृहीतौ च साधनं च स्यात्, साध्यं च न भवेदिति विपर्ययः सम्भावयितव्यः। एवं च व्यतिरेक एव न भवेत्। साध्याभावेऽपि साधनस्य सत्त्वादिति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामर्थ्यम् । तस्मात्द्वावपि प्रयोगौ त्रिरूपलिङ्गप्रकाशकावित्यदोषः ।

सम्प्रति साध्यसाधनयोर्व्याप्तिर्यत्र ग्रहीतव्या येन च प्रमाणेन, तदुभयं सुखावबोधार्थं कथ्यते । स्वभावहेतोः सत्त्वलक्षणस्य क्षणिकत्वेन व्याप्तिः साध्यधर्मिण्येव ग्रहीतव्येति केचित् । तेषामन्तर्व्याप्ति-पक्षोऽभिमतः । प्रसङ्गप्रसङ्गविपर्ययाभ्यां दृष्टान्तधर्मिणि घटादौ ग्रहीत-व्येत्यन्ये । तेषां बहिर्व्याप्तिपक्षोऽभिमतः । सत्त्वादन्येषां स्वभावहेतूनां कार्यहेतूनामनुपलम्भहेतूनां च दृष्टान्त एव व्याप्तिर्ग्रहीतव्या । तत्र शिंशपात्वस्य वृक्षव्यवहारयोग्यत्वे साध्ये दृष्टान्ते प्रत्यक्षानुपलम्भाभ्यां व्याप्तिर्ग्राह्या । सत्त्वक्षणिकत्वयोस्तु प्रसङ्गप्रसङ्गविपर्ययाभ्यां प्रमाणाभ्याम्, साध्यविपर्ययबाधकप्रमाणेन वा क्रमयौगपद्यनिवृत्तिलक्षणेन विकल्पे सिद्धे वस्तुत्वावस्तुत्वाभ्यां सन्दिह्यमाने विपक्षे धर्मिणि । कार्यहेतो-र्धूमादेर्वह्न्यादिना महानसादौ दृष्टान्तधर्मिणि त्रिविधप्रत्यक्षानुपलम्भेन पञ्चविधप्रत्यक्षानुपलम्भतो वा ग्रहीतव्या । अनुपलम्भस्यासद्व्यवहार-योग्यत्वेन सह प्रत्यक्षेणैव । अन्येषां तु स्वभावहेतूनां कार्यहेतूनां च केषाञ्चित्केनचित्प्रमाणेनोन्नीय यथास्वं प्रतिपत्तव्येति । व्याप्त्यनिश्चये हेतोरनैकान्तिको दोषः । स च त्रिविधः । असाधारणः साधारणः सन्दिग्धविपक्षव्यावृत्तिकश्चेति । तत्र असाधारणोऽनैकान्तिको यथा सात्मकं जीवच्छरीरं प्राणादिमत्त्वादपरजीवच्छरीरवत् घटवत् । अयं हेतुरपरजीवच्छरीरे आत्मना व्याप्त इति न निश्चितः । घटे च विपक्षे आत्मनोऽभावान्निवृत्त इति न निश्चितः । धर्मिणि तु जीवच्छरीरे विद्यत एवेत्यसाधारणानैकान्तिक उच्यते । अपरश्चासाधारणः । यथाऽनित्यः शब्दः श्रावणत्वात् घटवत्, आकाशवत् । साधरणानैकान्तिको यथा—नित्यः शब्दः प्रमेयत्वात् । सन्दिग्धविपक्षव्यावृत्तिको यथा—स श्यामः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्पुत्रत्वात् परिदृश्यमानपुत्रवदिति ।

यदुक्तं प्राक्, सत्त्वस्य क्षणिकत्वेन सह व्याप्तिः प्रसङ्गप्रसङ्ग-विपर्ययाभ्यां गृह्यत इति । तत्र कोऽयं प्रसङ्गो नाम ? । प्राणप्रसिद्ध-व्याप्तिकेन वाक्येन परस्यानिष्टत्वापादनाय प्रसञ्जनं प्रसङ्गः । यथा सामान्ये अनेकवृत्तित्वाभ्युपगमेऽनेकत्वप्रसञ्जनम् । तथा हि यदनेकवृत्ति तदनेकं यथाऽनेकभाजनगतं तालफलम् । अनेकवृत्ति च सामान्यम् । तस्माद-नेनाप्यनेकेन भवितव्यमिति प्रसङ्गः । अथानेकत्वं नेष्यते । तदाऽनेक-वृत्तित्वं च मा स्वीकुर्वीथाः । **ननु** यद्येतत्प्रमाणं न भवति कथमस्यो-पन्यास **इति** । व्याप्तिस्मरणार्थं व्याप्त्येकदेशकथनवदिति । यदुक्तम्— 'प्रसङ्गो द्वयसम्बन्धादेकापायेऽन्यहानये' इति । अस्यायमर्थः । व्याप्यव्यापकयोः सम्बन्धे सति यदि व्यापकं नेष्यते तदा व्याप्यमपि नेष्यताम् । अथ व्याप्यमीष्यते तदा व्यापकमीष्यतामिति ।

वादिना साधने उपन्यस्ते प्रतिवादिना दूषणं वक्तव्यमिति न्यायः । असिद्धविरुद्धानैकान्तिकानामन्यतमस्योद्भावनं दूषणम् । यथोक्तम्— **'दूषणान्न्यूनताद्युक्ति'**रिति । **नन्वेषा**मेवोद्भावनं यदि दूषणं क्व तर्हि वैयर्थ्यासामर्थ्यातिप्रसङ्गनामन्तर्भाव **इति** । अत्रैव त्रिषु । तत्र वैयर्थ्यं तावदसिद्धेऽन्तर्भवति । सन्दिग्धसाध्यधर्मो हि हेतुरुच्यते । वैयर्थ्यं तु यत्रोपन्यस्यते तत्र सन्दिग्धसाध्यधर्मकत्वं हेतोर्लक्षणं नास्तीत्यसिद्ध उच्यते । यदुक्तम्—**'सन्दिग्धे हेतुवचनाद् व्यस्तो हेतोरनाश्रयः'** । असामर्थ्यं तु स्वरूपासिद्धावन्तर्भवति । न हि सामर्थ्यं नाम हेतुस्वरूपादन्यत् । हेतोरवस्तुत्वप्रसङ्गात् । अतिप्रसङ्गः पुनरनैकान्तिकेऽन्तर्भाव्यः । साध्य-मर्थमतिक्रम्य विपक्षेऽपि प्रसक्तेरिति । यत्र तु धर्मिणि साध्यं साधयितुमारब्धं तस्य धर्मिणः प्रमाणबाधितत्वेआश्रयासिद्धिर्हेतोर्दूषणम् । यथा सर्वगत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मा सर्वत्रोपलभ्यमानगुणत्वात् । तदिह बौद्धस्यात्मैव न सिद्धः । किं पुनरस्य सर्वदेशोपलभ्यमानगुणत्वं सेत्स्यति । तथा हि तीर्थिकाः खल्वेवं वदन्ति । शरीरादिवस्तुव्यतिरिक्तं शुभाशुभकर्तृतत्फलोपभोक्तृनित्य-व्यापिरूपमात्माख्यं द्रव्यान्तरमस्ति । तेन च यदि नाम विश्वं व्याप्तं तथाऽपि यदुपभोगायतनतया परिगृहीतं जीवच्छरीरं तदेव सात्मकमभिधीयते । एतच्चायुक्तम् । आत्मनः सिद्धये प्रमाणाभावात् । न हि प्रत्यक्षेणात्मा प्रतीयते । चक्षुरादिज्ञानानां रूपादिपञ्चविषयनियतत्वान्मानसस्याप्यहंप्रत्ययस्य शरीरादिविषयत्वात् । गौरोऽहं स्थूलोऽहं गच्छाम्यहमित्यादिना कारणेनाहंप्रत्यय उत्पद्यते । यदाहालङ्कारकारः-

अहमित्यपि यज्ज्ञानं तच्छरीरेन्द्रियांशवित् ।
अहं काणः सुखी गौरः समानाधारवेदनात् ॥

न चास्य शरीरव्यतिरिक्तस्य धर्मो गौरत्वं स्थूलत्वं वा । न च विभोरमूर्त्तस्य मूर्त्तद्रव्यानुविधायिनी गमनादिक्रिया युक्तिमती । नाप्ययं माणवके सिंहप्रत्ययवत् भाक्तो युक्तः, स्खलदवृत्तिप्रसङ्गात् । नाप्यनुमानेन प्रतीयते कार्यस्वभावलिङ्गाभावान्नित्यपरोक्षेण च देशकालव्यतिरेक-विकलेनात्मना सह कस्यचिदन्वयव्यतिरेकात्मककार्यकारणभावासिद्धेः कार्यलिङ्गायोगात् । धर्मिसत्ताया असिद्धत्वात् स्वभावलिङ्गानुपपत्तेः । न चान्यल्लिङ्गमस्ति । अन्येनापि लिङ्गेन भवता साध्यव्याप्तेन भवितव्यम् । तस्य च सर्वथाऽसिद्धेः कथं व्याप्तत्वं लिङ्गस्य निश्चीयताम् । अपि च किमयमात्मा बोधरूपोऽबोधरूपो वा । यदि बोधरूपो नित्यश्च तदा चक्षुरादिवैफल्यप्रसङ्गो दुर्वारः । अथानित्यो बोधरूपस्तदानीं ज्ञान-स्यैवात्मेति नाम कृतं न कापि विप्रतिपत्तिः । अथाबोधस्वरूपोऽदृश्यश्च तदाऽनुपलम्भोऽस्य सत्तां न क्षमत इति निरात्मकसिद्धिरनवद्या ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्मात्सर्वं संस्कृतं वस्तु निरात्मकमिति ।

स्वरूपासिद्ध्याऽप्यसिद्धो हेत्वाभासो भवति । यथाऽनित्यः शब्दश्चाक्षुषत्वादिति । ननु व्याप्त्यसिद्धिरपि दूषणम् । तेनापि परेष्टासिद्धेः । तत्किं नोच्यते । अनैकान्तिकदूषणेनैव गतार्थत्वात्पृथङ्नोक्तम् । तथा हि न स्वलक्षणाभ्यां व्याप्तिर्ग्रहीतव्या । स्वलक्षणस्य देशकालाकारनियतत्वेनान्यत्रानुगमाभावात् । अपि तु साध्यसाधनसामान्याभ्यामेव ग्रहीतव्या । तत्र यदि साधनं साध्येन व्याप्तं न प्रतीयेत तदा साधनं च स्यात् साध्यं च न स्यादित्यनैकान्तिकमेवेति ।

ननु सामान्यं चेदप्रसिद्धम् तत्कथं साध्यसाधनसामान्याभ्यां सर्वोपसंहारवती व्याप्तिः प्रमाणेन गृह्यते । नैष दोषः । यतो यादृशं सामान्यं परैः परिकल्प्यते तादृशं प्रमाणेन बाध्यत इति नाभ्युपेयं तत्सौगतैः । न तु व्यवहारसिद्धमन्यव्यावृत्तिलक्षणमपोहसंज्ञकमपि । ननु कोऽयमपोहो नाम ? । यथाव्यवसायं बाह्य एव घटादिरर्थोऽपोह इत्यभिधीयते । अपोह्यतेऽन्यस्मादन्यद्विजातीयमिति कृत्वा । यथाप्रतिभासंबुद्ध्याकारोऽपोहः । अपोह्यते पृथक्क्रियतेऽस्मिन् बुद्ध्याकारे विजातीयमिति कृत्वा । यथातत्त्वं निवृत्तिमात्रं प्रसज्यरूपोऽपोहः । अपोहनमपोह इति कृत्वा । ननु यथाऽध्यवसायं विधिरेव तर्हि केवलो विषय इत्यागतम् । न । अन्यापोहविशिष्टो विधिरभिप्रेतः । यत्तु गोप्रतीतौ (न?)ना गवात्मा गवात्मेति सामर्थ्यादपोहः पश्चान्निश्चीयत इति विधिवादिनां मतम् । अन्यापोहप्रतिपत्तौ च सामर्थ्यादन्यापोढगवादिरर्थोऽवधार्यत इति निवृत्त्यपोहवादिनां मतम् । तन्न युक्तम् । व्यवहारकाले प्रथमं प्रवर्त्तमानस्यापि क्रमादर्शनात् । न हि विधिं प्रतिपद्य कश्चिदर्थापत्तितः पश्चादपोहमधिगच्छति । अपोहं वा प्रतिपद्य पश्चादन्यापोढमव-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गच्छति। तस्माद् गोप्रतिपत्तिरित्यन्यापोढप्रतिपत्तिरुच्यते। यद्यपि गोशब्दादुच्चरितादन्यापोढशब्दानुल्लेखः, तथाऽपि नाप्रतिपत्तिरेव विशेषणभूतस्यापोहस्य। अगवापोढ एव वस्तुनि गोशब्दस्य सङ्केतितत्वात्। यथा नीलोत्पलसङ्केतितेन्दीवरशब्दान्नीलोत्पलप्रतीतौ तत्काल एव नीलिमस्फुरणमनिवार्यं तथा गोशब्दादप्यगवापोढे सङ्केतिताद् गोप्रतीतौ तुल्यकालमेव विशेषणत्वादपोहस्यागवापोहस्फुरणमनिवार्यम्। यथाच प्रत्यक्षस्य प्रसज्यरूपाभावग्रहणमभावविकल्पोत्पादनशक्तिरेव तथा विकल्पानामपि तदनुरूपानुष्ठानशक्तिरेवाभावग्रहणमुच्यते। अन्यथा यदि शब्दादर्थप्रतिपत्तिकाले नावगतः परापोहः कथं तर्ह्यन्यपरिहारेण प्रतिपत्ता गवि प्रवर्त्तताम्। ततो गां बधानेति चोदितोऽश्वानपि बध्नीयादिति। तस्मात्स्थितमेतत् बाह्योऽर्थोध्यवसायादेव शब्दवाच्यो व्यवस्थाप्यते, न तु स्वलक्षणपरिस्फूर्त्त्या, प्रत्यक्षवद्देशकालाकारनियतप्रव्यक्तस्वलक्षणास्फुरणात्। यदाह न्यायपरमेश्वरः-

'शब्देनाव्यापृताक्षस्य बुद्धावप्रतिभासनात्।
अर्थस्य दृष्टाविवे'ति।

किञ्च स्वलक्षणात्मनि वाच्ये सर्वात्मना प्रतिपत्तेर्विधिनिषेधयोरयोगः। तस्य हि सद्भावेऽस्तीति व्यर्थम्। नास्तीत्यसमर्थम्। अस्ति चास्त्यादिपदप्रयोगः। तस्मान्न परमार्थतः स्वलक्षणं शब्दैरभिधीयत इति स्थितम्।

ननु यथा प्रत्यक्षेण घटस्वरूपे गृहीते पश्चात्तत्रैव क्षणिकत्वादिनिश्चयार्थं प्रमाणान्तरं प्रवर्त्तते। तथा वृक्षशब्देन वृक्षत्वांशे प्रतिपादिते सत्वांशनिश्चयार्थमस्त्यादिप्रयोगो भविष्यतीति चेत्। **न**। प्रत्यक्षस्यानिश्चयात्मकत्वादनभ्यस्तरूपविषये प्रमाणान्तरं प्रवर्तत इति युक्तम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विकल्पस्य तु स्वयं निश्चयात्मकत्वाद् गृहीते स्वरूपे किं प्रमाणान्तरेणापरेण ग्रहीतव्यमिति । यादृशं सामान्यं परैः परिकल्प्यतेऽनेकव्यक्तिसमवेतं दृश्यात्मकं नित्यं तादृशस्य सत्तासाधकं न किञ्चित्प्रमाणमुपलभामहे । ततो न सदिति व्यवस्थापयितुं युक्तम् । तथा हि गवादिव्यक्त्यनुभवकाले वर्णसंस्थानात्मकं व्यक्तिरूपमपहाय नान्यत्किञ्चिदेकमनुयायि प्रत्यक्षे प्रतिभासते । तादृशस्यानुभवाभावात् । नापि स्वलक्षणानुभवानन्तरमेकाकारपरामर्शप्रत्ययादन्यथानुपपत्त्या सामान्यपरिकल्पनं युक्तिसङ्गतम् । व्यक्तिभ्य एव स्वहेतुदत्तशक्तिभ्योऽस्य प्रत्ययस्य परम्परोत्पत्तेः । भेदेऽपि काश्चिदेव व्यक्तयोऽस्य जननाय समर्थाः न सर्वा इत्यत्र कार्यकारणभावस्य प्रत्यक्षानुपलम्भाभ्यां दृष्टस्यातिवर्तयितुमशक्यत्वात् । दृष्टं चेदं सामर्थ्यम् । भेदाविशेषेऽपि कासाञ्चिदेव व्यक्तीनाम्, यथा ज्वरादिशमने गुडूचिनिम्बादीनाम् । यथोक्तम्—

'भेदेऽपि नियताः केचित्स्वभावेनेन्द्रियादिवत् ।'

किञ्च सर्वतो विजातीयाद्व्यावृत्तेऽपि सामान्ये किमिति भेदाविशेषेऽपि गोव्यक्तिष्वेव समवेतं तत्रैव चैकाकारं प्रतीतिं जनयतीति प्रश्ने स्वभावेनोत्तरं परस्य । तच्च प्रमाणासङ्गतम् । अस्माकं तु स्वभावेनोत्तरं प्रमाणसिद्धत्वात् । तथेदमपरं जातिसाधनं परस्य यद्विशिष्टं ज्ञानं तद्विशेषणग्रहणनान्तरीयकं यथा दण्डिज्ञानम् । विशिष्टज्ञानं चेदं गौरयमित्यर्थतः कार्यहेतुः । **अत्रोच्यते**—विशिष्टबुद्धेर्भिन्नविशेषणग्रहणनान्तरीयकत्वं साध्यं विशेषणमात्रानुभवनान्तरीयकत्वं वा । प्रथमपक्षेऽस्य प्रत्यक्षबाधा । वस्तुग्राहिणि प्रत्यक्षे उभयप्रतिभासाभावात् । विशिष्टबुद्धित्वं च सामान्यं हेतुरनैकान्तिकः भिन्नविशेषणग्रहणमन्तरेणापि तस्य दर्शनात् । यथा स्वरूपवान् घटः । गोत्वं सामान्यमिति वा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयपक्षे तु सिद्धसाधनम्। स्वरूपवान् घट इत्यादिवद् गोत्वजातिमान् पिण्ड इति परिकल्पितभेदमुपादाय विशेषणविशेष्यभावस्येष्टत्वात्। अगोव्यावृत्त्यनुभवभावित्वाद् गौरयमिति व्यवहारस्य। तदेवं परपरिकल्पितसामान्यस्य विचारासहत्वादतद्रूपपरावृत्तवस्तुमात्रमेव सामान्यमपोहशब्दवाच्यं व्यवहाराङ्गं यथाध्यवसायमनवद्यमिति स्थितम्।

सामान्यस्य निषेधाय प्रयोगः पुनरेवंविधः कर्त्तव्यः। यद्यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते तत्तत्रासद्व्यवहारविषयः। यथा तुरङ्गमोत्तमाङ्गे शृङ्गम्। नोपलभ्यते चोपलब्धिलक्षणप्राप्तं सामान्यं परिदृश्यमानासु व्यक्तिषु। इति स्वभावानुपलब्धिः। न चासिद्धिसम्भावना। वर्णसंस्थान(र?स)हितं व्यक्तिरूपमपहाय द्वितीयस्यानुयायिनो रूपस्य निपुणमपि निरूप्यमाणस्य सर्वदा दर्श(न?ना)सम्भवात्। नापि ज्ञानवद्दर्शनाभावेऽपि प्रत्यक्षसिद्धत्वमस्याभिधातुमुचितम्। ज्ञानं हि स्वसंवेदनप्रमाणसिद्धम्। न तु चक्षुर्विज्ञानग्राह्यम्। इदं चक्षुर्विज्ञानग्राह्यमर्थधर्मत्वात्। प्रत्यक्षं च परैरिष्टमिति। तत्स्मात्सर्वं संस्कृतं वस्तु परपरिकल्पितसामान्येन शून्यमिति स्थितम्।

नापि केनचिद्बुद्धिमतोपरचितमित्यपि विज्ञेयम्। तथा ह्यस्य जगतः कर्त्ता भवन् नित्यो भवेदनित्यो वा। तत्र तावन्न नित्यो युक्तः। नित्ये कर्त्तरि समर्थे सति सर्गस्थितिप्रलयानां नियमेन यौगपद्यप्रसङ्गात्। येन हि स्वरूपेण स्थितिप्रलययोः स कर्त्ता तदस्य स्वरूपं सर्गकालेऽपि सन्निहितमिति तदेव स्थितिप्रलयौ कुर्यात्। सहकारिविरहान्न करोतीति चेत्तदसत्। न हि नित्येन सहकारिणा कदाचिदयं विरहितः, सदा सन्निहितत्वात्। नाप्यनित्येन सहकारिणा विरहितः, अनित्यस्य सहकारिणोऽपि तदायत्तजन्मत्वात्। तत एकदा सर्वकरणादिप्रसङ्गः। ननु

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बुद्धिमत्त्वादीश्वरस्य नैष दोषः । बुद्धिशून्यो हि स्वसत्तामात्रजन्यं कार्यमक्रमेणैव कुर्यात् । बुद्धिमांस्तु कर्तुमीशानोऽप्यनिच्छन्न करोतीति कस्तस्योपालम्भः । **अथ** स्वरूपेण सामर्थ्ये सत्यपि एष एव स्वभावः । सहकारिलक्षणयाऽऽगन्तुकशक्त्या विना न करोतीति **चेत्**, तर्हि माताऽपि सती वन्ध्या सा प्रकृत्यैवैतदपि वक्तव्यं भवेद्भवतामिति यत्किञ्चिदेतत् । **नन्वेष** एव कार्यस्य स्वभावः केवलात्समर्थादपि नोदेति । सहकारिणमपेक्ष्यैव भवति । **तन्न युक्तम्** । समर्थो हि कार्यापेक्षामनादृत्य बलादेव कार्यं कुर्यात् । अन्यथा ह्यसमर्थताप्रसङ्गः । नापि नित्यः क्रमेणार्थकारीति युक्तं निरपेक्षत्वात् । यदाह दिङ्मण्डलविख्यातकीर्त्तिः कीर्त्तिः-

नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्न युज्यते ।
क्रियायामक्रियायां च कालयोः सदृशात्मनः ॥

एतेन नित्यानामात्मादीनामक्षणिकानां घटादीनां क्रमेण कार्यकरणं **प्रत्युक्तम्** । न चात्र प्रत्यक्षविरोधः । प्रत्यक्षेणाक्षणिकस्य ग्रहणायोगात् । न हि क्षणिकं प्रत्यक्षमक्षणिकमीक्षितुं क्षमते । अनेकक्षणव्यापारो ह्यक्षणिकः । स कथमेकक्षणभाविनाऽध्यक्षेण ग्रहीतुं शक्यः । न हि प्रागूर्ध्वमवस्थानमधुना प्रकाशते । तस्याप्यधुनात्वप्रसङ्गात् । जन्मविनाशावधि प्रतिभासप्रसङ्गादिति न किञ्चित्प्रत्यक्षं पूर्वापरकालव्याप्तिमर्थस्य ग्रहीतुमलम् । **एतेन** प्रत्यभिज्ञानस्याप्रत्यक्षत्वं **व्याख्यातम्** । साक्षात्कारि हि ज्ञानं प्रत्यक्षम् । न च प्रागवस्थमधुना साक्षात्कर्त्तव्यम्, अपि तु स्मर्त्तव्यम् । न च स्मरणरूपं प्रत्यक्षम् । **अथ** मतं भवेदिदं स्मरणं यदिदानीन्तनमवस्थानं न साक्षात्कुर्यात्, तत्साक्षात्करणप्रवणं कथमिदं स्मरणं नाम । यदाह भट्टः-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पूर्वप्रमितमात्रे हि जायते स इति स्मृतिः ।
स एवायमितीयं तु प्रत्यभिज्ञातिरेकिणी ॥

इति । स्मरणग्रहणस्वरूपं तर्हि प्रत्यभिज्ञानं स्यात् । न तु ग्रहणमेव। स्मर्यमाणे ग्रहणायोगात् गृह्यमाणे च स्मरणायोगात् । न चैकस्य स्मरणग्रहणे सम्भवतः परस्परविरोधात् । येन हि रूपेण स्मरणं न तेन रूपेण ग्रहणमित्यनुन्मत्तेन न शक्यते वक्तुम् । रूपान्तरेण ग्रहणे नैकस्य स्मरणग्रहणे स्याताम् । भावेऽपि प्रत्यक्षाप्रत्यक्षत्वं स्यात् । न तु प्रत्यक्षत्वमेव । स्मर्यमाणे प्रत्यक्षायोगात् । तस्मात्प्रत्यभिज्ञाप्रत्ययो भ्रान्त एव निर्विषयत्वात् । प्रयोगश्चैवं यः प्रत्यभिज्ञाप्रत्ययः स तत्त्वतो नैकालम्बनो यथा लूनपुनर्जाततृणादिषु, प्रत्यभिज्ञाप्रत्ययश्चायं तदेवेदं नीलादीति प्रत्यय इति विरुद्धव्याप्तोपलब्धिः । एकत्वानेकत्वयोः परस्परविरोधात् । तद्विषययोरपि संवेदनयोर्विरोधः । तेनैकालम्बन-विरुद्धेनानेकालम्बनेन पूर्वोक्तया नीत्या प्रत्यभिज्ञाप्रत्ययो व्याप्त इति न प्रत्यभिज्ञानं क्षणिकानुमानबाधकम् । न च केशादिष्वपि सामान्या-वलम्बनतयैकालम्बनत्वम् । केशादिव्यक्तेरेव प्रत्यभिज्ञायमानत्वात् । सामान्ये प्रत्यभिज्ञायमाने तदेवेदं केशत्वादीति स्यात् । न तदेवेदं केशादीति । अत एवैकालम्बनत्वे प्रत्यभिज्ञानस्य क्रमेतराभ्यामुत्पत्ति-विरोधात् विरुद्धानैकान्तिकत्वे नाशङ्कनीये । न च प्रत्यभिज्ञानमेव तदवस्थापकम्, तस्यैव विचार्यमाणत्वात् । तस्मात्स्थितमेतत् नित्यः कर्त्ता नास्तीति । यदि नित्यः कर्त्ता जगतो न कारणं किमस्य तर्हि कारणम् ? । सत्वानां शुभाशुभाख्यं कर्म । यथोक्तम्—

सर्वलोकमथ भाजनलोकं चित्तमेव रचयत्यतिचित्रं ।
कर्मजं हि जगदुक्तमशेषं कर्म चित्तमवधूय च नास्ति ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वैभाषिकमतमाश्रित्य भगवता तदुक्तम्–

संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम् ॥

ननु सर्वज्ञसिद्धौ हि तद्वचनं निदर्शनीकर्तुमुचितम् । सर्वज्ञसिद्धये किं प्रमाणमिति **चेत्** उच्यते । यो यः सादरनिरन्तरदीर्घकालाभ्यास-सहितचेतोगुणः स सर्वः स्फुटीभावयोग्यः । यथा युवत्याकारः कामिन पुरुषस्य । यथोक्ताभ्याससहितचेतोगुणाश्चामी चतुरार्यसत्यविषयाकारा इति स्वभावहेतुः । न तावदाश्रयद्वारेण हेतुद्वारेण वाऽसिद्धिसम्भावना । सङ्कल्पारूढानां चतुरार्यसत्यविषयाणामाकाराणां धर्मिणां चेतोगुणमात्रस्य च हेतोः प्रत्यात्मवेद्यत्वात् । न चैष विरुद्धः सपक्षे कामिन्याकारे सम्भवात् । न चानैकान्तिकः । अभ्याससहितचेतोगुणस्फुटप्रतिभासयोः कारणकार्ययोः कुम्भकारघटयोरिव सर्वोपसंहारेण प्रत्यक्षानुपलम्भतः कार्यकारणभावसिद्धावभ्याससहितचेतोगुणस्य स्फुटप्रतिभासकरण-योग्यतया व्याप्तिसिद्धेः । तथा हि व्याप्त्यधिकरणे काम्यन्तर्वर्त्तिनि युवत्याकारे सादरनिरन्तरदीर्घकालाभ्याससहितचेतोगुणात्पूर्वमनुपलब्धिः स्फुटाभत्वस्य, पश्चादभ्याससंवेदनं, स्फुटाभसंवेदनमिति त्रिविधप्रत्यक्षा-नुपलम्भसाध्यः कार्यकारणभावः स्फुटप्रतिभासाभ्याससचिवचित्ताकार-योरित्युपपन्ना सर्वोपसंहारवती व्याप्तिः । अतोऽनैकान्तिकताऽभावाद-नवद्यो हेतुः । **नन्वनेन** साधनेन चतुरार्यसत्याकाराणां साक्षात्करण-च्चतुरार्यसाक्षात्कारी सर्वज्ञः सिध्यति, न त्वशेषेण सर्वधर्मसाक्षात्कारी । ततस्तत्सिद्धये साधनान्तरमभिधेयम् । **उच्यते** । यत्प्रमाणसंवादि निश्चितार्थं वचनं तत्साक्षात्पारम्पर्येण वा तदर्थसाक्षात्कारिज्ञानपूर्वकम् । यथा दहनो दाहक इति वचनम् । प्रमाणसंवादि निश्चितार्थं चेदं वचनं **क्षणिकाः सर्वसंस्कारा** इत्यर्थतः कार्यहेतुः । नास्यासिद्धिः । सर्वधर्मक्षणभङ्ग-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रसाधनादस्य वचनस्य सत्यार्थत्वात् । नापि विरुद्धः सपक्षे भावात् । न चानैकान्तिकता । वचनमात्रस्य संशयविपर्यासपूर्वकत्वेऽपि प्रमाणनिश्चितार्थस्य साक्षात्पारम्पर्येण वा तदर्थसाक्षात्कारिज्ञानपूर्वकत्वस्य प्रत्यक्षानुपलम्भाभ्यामुपलम्भात् । अन्यथा धूमादावपि हेतुत्यागप्रसङ्गादशेषकार्यहेतूच्छेदप्रसङ्गात् ।

स्यादेतत् । अनेकभवपरम्परालक्षणेन दीर्घकालेन भाव्यमानस्य सङ्कल्पारूढत्वं सम्भाव्यते । भवपरम्परासिद्धये तु किं प्रमाणम् ? **उच्यते** यच्चित्तं तच्चित्तान्तरं प्रतिसन्धत्ते । यथेदानीन्तनं चित्तम् । चित्तं च मरणकालभावीति स्वभावहेतुः । न चार्हच्चरमचित्तेन व्यभिचारः । तस्यागममात्रप्रतीतत्वात् निःक्लेशचित्तान्तरजननाद्वा । हेतोर्वा क्लेशे सतीति विशेषणापेक्षणादित्यनागतभवसिद्धिः । इह पूर्वजन्माभ्यासात्तपोदानाध्ययनादौ सर्वसत्वानामभ्यासे प्रवृत्तिरिति प्रवादः । ततस्तत्सिद्धये प्रमाणमुच्यते यच्चित्तं तच्चित्तान्तरपूर्वकम् । यथेदानीन्तनं चित्तम् । चित्तं च जन्मसमयभावीत्यर्थतः कार्यहेतुः । **ननु** च तत्त्वसाक्षात्करणान्मुक्तिः, तत्त्वं चैकमेव । यथोक्तम्—

मुक्तिस्तु शून्यतादृष्टिस्तदर्थाशेषभावना ।

तत्कथं सर्वज्ञद्वैतं बौद्धप्रभेदश्चेति । **नैष दोषः** । यस्मात्सर्वमेतद्भगवता सत्त्वानवतारयितुं भूतार्थे प्रतिपादितम् । तथा हि वैभाषिकाणां मतम्—

आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतं ।
संस्कृतं क्षणिकं सर्वमात्मशून्यमकर्तृकम् ॥

सौत्रान्तिकानां मतम्—ज्ञानमेवेदं सर्वं नीलाद्याकारेण प्रतिभाति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न बाह्योऽर्थः । जडस्य प्रकाशायोगात् । यथोक्तम्–

स्वाकारबुद्धिजनका दृश्या नेन्द्रियगोचराः ।

अलङ्कारकारेणाप्युक्तम्–

यदि संवेद्यते नीलं कथं बाह्यं तदुच्यते ।
न चेत्संवेद्यते नीलं कथं बाह्यं तदुच्यते ॥

ननु यदि प्रकाशमानं ज्ञानमेवेदं तदाऽस्ति बाह्योऽर्थ इति कुतः ? । बाह्यार्थसिद्धिः स्याद्व्यतिरेकतः । न हि सर्वत्र सर्वदा नीलादय आकाराः प्रकाशन्ते । न चैतत्स्वोपादानमात्रबलभावित्वे सति युज्यते । नियतविषये प्रवृत्त्ययोगात् । तस्मादस्ति किञ्चिदेषां समनन्तरप्रत्यय-व्यतिरिक्तं कारणं यद्बलेन क्वचित्कदाचिच्च भवन्तीति शक्यमवसातुम् । स एव बाह्योऽर्थ इति । कः पुनरसौ बाह्योऽर्थः । अवयवी गुणादयो धर्माः द्रव्याश्रयिणः पराभिमताः नवविधं द्रव्यं परमाणवो वेति ? । तत्र न तावद् गुणादयो द्रव्यनिषेधेनैव तेषां निषिद्धत्वात् । न चासति समवायिनि द्रव्ये समवाय इति दूषणमपि नाद्रियते ? । द्रव्यं च पृथिव्यापस्तेजोवायुराकाशं कालो दिगात्ममन इति नवविधम् । तत्रात्मनिषेधायेदमपि साधनम् यत्कादाचित्कं ज्ञानं तत्कादाचित्ककारणपूर्वकम् । यथा सौदामिनीज्ञानम् । कादाचित्कं चेदमहङ्कारज्ञानमित्यर्थतः कार्यहेतुः । नायमसिद्धः । अहङ्कारे धर्मिणि ज्ञानत्वस्य प्रत्यक्षसिद्धत्वात् । नापि कादाचित्कविशेषणम-सिद्धम् । सर्वदाऽहमिति ज्ञानाभावात् । नापि विरुद्धः सपक्षे दर्शनात् । न चानैकान्तिकः । धूमपावकयोरिव कादाचित्कज्ञानकादाचित्क-कारणयोः प्रत्यक्षानुपलम्भाभ्यां व्याप्तिसिद्धेः । कादाचित्कज्ञानस्य चाकादाचित्ककारणादुत्पत्तौ कादाचित्ककारणादनुत्पत्तिप्रसङ्गः । अनियतहेतुकतया चाहेतुकताप्रसङ्गः । तथाऽप्यनैकान्तिकत्वे प्रसिद्ध-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धूमादिहेतुरप्यनैकान्तिकः स्याद्विशेषाभावात् । अपि चाहङ्कारस्याकादाचित्ककारणपूर्वकत्वे सदैवोत्पादप्रसङ्गः । कारणस्य कुर्वद्रूपत्वादकुर्वतश्चौपचारिककारणत्वात् । कुर्वदकुर्वतोश्चैक्याभावाद्भावे वा कुर्वतोऽप्यकुर्वतोऽप्युत्पत्तिस्तत्स्वभावात् । किञ्चाहङ्कारस्याकादाचित्ककारणादुत्पादे युगपदेवोत्पादप्रसङ्गोऽव्यग्रसामग्रीकत्वात् । नन्वहङ्कारस्यालम्बनमात्मा न कारणमिति चेन्न । अकारणस्यालम्बनत्वायोगादतिप्रसङ्गात् ।

अथ किमाकाशं नाम किञ्चिद्वस्तुभूतमस्ति ? नास्ति वा ? । नास्त्येवैतत् । यत्र हि सप्रतिघं द्रव्यमस्ति न तत्राकाशमवकाशं ददाति । यत्र नास्ति तत्र तदभावादेवावकाशः सिद्ध इति । तत्क्वाकाशमवकाशं दद्यात् ? । तस्मात्सत्यस्मिन् सर्वदा सर्वथा सर्वत्रावकाशः स्यात् । न चैतदस्ति । तस्मान्नास्त्येवाकाशमिति प्रतीमः । एतच्च वैभाषिकमतमपेक्ष्य दूषणमुक्तम् । परैस्त्वाकाशं शब्दगुणमिष्यते । तच्चैकमिति । समानदेशत्वात्सर्वशब्दानां विभागेन श्रवणं न स्यात् । ततः सन्निहितदेश इव दूरदेशाभिमतोऽपि शब्दः प्रतीयेत । न वान्योऽपीत्यनैकान्तिकः । दिक्कालयोश्चैकत्वात् पूर्वापरप्रत्ययानुपपत्तिः । एतेन नित्यस्यापि मनसोऽसम्भव एव । तथा हि युगपज्ज्ञानानुत्पत्त्या मनोऽनुमीयते तद्वादिभिः । अनुभूयन्त एव युगपद्बहूनि ज्ञानानि नर्त्तकीदर्शनादौ । यदि पुनर्मनः स्यात्तदानीमेतानि ज्ञानानि न युज्यन्ते । तस्मान्नास्त्येव मनोऽपि । पृथिव्यादयोऽवशिष्यन्ते । ते चावयविपरमाणुभेदेन द्विधा इष्यन्ते । तत्र योऽवयवी घटादिः परमाणुभिर्द्व्यणुकादिक्रमेणारब्धः प्रसिद्धः तस्योपलब्धिलक्षणप्राप्तस्यानुपलम्भो बाधक इत्युक्तम् । यद्यवयवी नास्ति कथमयमेकत्वेन प्रतिभासत इति चेत्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भागा एव हि भासन्ते सन्निविष्टास्तथा तथा ।
तद्वान्नैव पुनः कश्चिन्निर्भागः सम्प्रतीयते ॥

इत्युक्तम् । ननु कोऽयं भागप्रतिभासो नाम ? । नानादिग्देशावष्टम्भेन सञ्चितपरमाणुप्रतिभास एव । यद्येवं कथं '**प्रतिभासधर्मः स्थौल्य**'मित्युक्तं धर्मोत्तरेण । तत्राप्ययमेवार्थः । अर्थस्य स्वरूपेण नास्ति वेदनम् । '**भाक्तं स्यादर्थवेदन**'मिति वचनात् । तस्माद्योऽयं नीलादिप्रतिभासो नानादेशव्यापित्वेनानुभूयते स एव स्थूलप्रतिभास इत्यदोषः । येऽपि तदारम्भकाः परमाणवो वैशेषिकाणाम्, साक्षादक्षिगोचरा वैभाषिकाणां दर्शने, स्वाकारसमर्पणप्रवणाः सौत्रान्तिकानां मते तेऽपि योगाचाराणां मते न सम्भवन्ति । खल्वेकः परमाणुः प्रसिद्धिमध्यास्ते । तस्याधरोत्तरं चतुर्दिक्षु परमाणुमध्यमध्यासीनस्य नियमेन षडंशतापत्तेः । यो ह्यस्य स्वभावः पूर्वपरमाणुप्रत्यासत्तौ न स एवापरपरमाणुप्रत्यासत्तौ घटते । तयोरेकदेशताप्राप्तेः । एवं च स पूर्वपरमाणुसहितस्वभावोऽपरः परमाणुं प्रत्यासीदेद्यदि सोऽपि तत्र स्यात् । असत्यामपि प्रत्यासत्तावाभिमुख्यमात्रेऽप्ययमेव वृत्तान्तः । ततः परमाणुमात्रं पिण्डः प्रसक्तः । अथ चाऽयं विचारः । नाप्यनेकः परमाणुः । परमाणुशः परमाणोरयोगात् । तथा हि यद्यसौ सांशः स कथं परमाणुः ? । अथ निरंशः, तदा संयुक्ताः परमाणवः सर्वात्मना संयोगात् परस्परमभिन्नदेशाः स्युरिति सर्वः पिण्डः परमाणुमात्रं स्यात् । पर्वतोऽपि क्षितिरपीति । तस्मादवश्यं तयोः स्वभावयोर्भेदोऽभ्युपेतव्यः । यथा चानयोस्तथाऽधरोत्तरदक्षिणोत्तरपरमाणुप्रत्यासन्नानां स्वभावानां भेद इति षडंशतैव परमाणोर्बलादापतति । यदाह—

'षट्केन युगपद्योगात्परमाणोः षडंशता ।
षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न चैकासिद्धावनेकस्य सिद्धिरिति न सन्ति परमाणवः । यदि बाह्योऽर्थो नास्ति किंविषयस्तर्ह्ययं प्रतिभासः । खल्वेषोऽनादिवितत्वासनातः प्रवर्त्तमानो निरालम्बन एव सम्भाव्यते । तथा हि—सति विषये सावलम्बनता स्यात् । तेन चावयविना भवितव्यं परमाणुप्रचयेन वा । स चायमुभयोऽप्यनन्तरोक्तबाधकप्रमाणग्रस्तविग्रहो न व्योमतामरसमतिशेते । यथोक्तम्—

प्रतिभासो निरालम्बः स्वप्नानुभवसन्निभः ।

स्वप्नज्ञानं तु निरालम्बनं विदितमेव । न च स्वप्नजाग्रदनुभवयोर्भेदः कश्चिदप्यस्ति । सर्वप्रकारसाधर्म्यदर्शनात् । न चानालम्बनादनवाप्तरूपविशेषं विज्ञानमालम्बनसम्बन्धमनुभवितुमुत्सहते । यदनालम्बनादविशिष्टं तदनालम्बनम् । यथैकस्मादाकाशकेशदर्शनाद् द्वितीयम् । अनालम्बनाच्च स्वप्नज्ञानादविशिष्टं च विवादाध्यासितं जाग्रद्विज्ञानमिति स्वभावहेतुः । यदि बाह्योऽर्थो नास्ति किं तर्हि सत् । ग्राह्यग्राहकादिकलङ्कानङ्कितं निष्प्रपञ्चज्ञानमात्रं परमार्थसत् । यथोक्तम्—

ग्राह्यग्राहकनिर्मुक्तं विज्ञानं परमार्थसत् ।

पुनश्चोक्तम्—

नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥

उक्तं चैतद्भगवता—

बाह्यो न विद्यते ह्यर्थो यथा बालैर्विकल्प्यते ।
वासनालुठितं चित्तमर्थाभासं प्रवर्त्तते ॥

तत्र केचिदाहुः-विज्ञानमेवेदं सर्वं शरीरादिविषयभावेन प्रसिद्धम्। तच्च स्वसंवेदनमिति न कस्यचिद् ग्राह्यं ग्राहकं वा ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कल्पनया तु ग्राह्यग्राहकभाव इति व्यस्थाप्यते । ततः परिकल्पित-ग्राह्यग्राहकभावरहितं विज्ञानं सत्यमिति । अन्ये तु सकलाकार-कलङ्कानङ्कितं शुद्धस्फटिकशङ्कासं वास्तवं विज्ञानम् । आकारास्त्वमी वितथा एवाविद्यया दर्शिताः प्रकाशन्ते । तस्माद् ग्राह्यं नाम नास्त्येव ग्राह्याभावात् । तदपेक्षया ग्राहकत्वं विज्ञानस्य यत् तदपि नास्तीति । माध्यमिकानां तु दर्शने तदपि ज्ञानं न परमार्थसत् । विचारासहत्वात् । स्वभावेन हि युक्तं पारमार्थिकमुच्यते लोके । न चास्य विचारतः कश्चित्स्वभावो घटते एको वाऽनेको वा । यथोक्तम्–

नेष्टं तदपि धीराणां विज्ञानं पारमार्थिकम् ।
एकानेकस्वभावेन वियोगाद् गगनाब्जवत् ॥

कीर्त्तिपादैरप्युक्तम्–

भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं वा रूपं तेषु न विद्यते ॥

तथाऽलङ्कारकारेणाप्युक्तम्–

यदा तु न विकल्पस्य न चान्यस्य प्रमाणता ।
तदा विशीर्यमाणे तु सर्वस्मिन् कोऽपराध्यतु ॥

बन्धमुक्तादिभेदोऽपि नैवास्ति परमार्थतः ।
भेदो हि नावभात्येव सर्वत्र समदर्शिनाम् ॥

प्रयोगः पुनरेवम् । यदेकानेकस्वभावं न भवति न तत्परमार्थसत् । यथा व्योमकमलं, एकानेकस्वभावं च न भवति विज्ञानमिति व्यापकानुपलब्धिः । न तावदसिद्धो हेतुः । साकारे विज्ञाने बहिरर्थ इव एकानेकस्वभावायोग्यत्वस्य परिस्फुटत्वात् । यत्र हि लोकस्य बाह्यार्थ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

व्यवहारः तदेव साकारवादिनो ज्ञानम्। ततो यत्तस्य बहिर्भावे भावबाधकं तदेवान्तर्भावेऽपीति। बाधकेन हि स्थूलमेकमनेकं च परमाणुरूपमपोह्यते। विज्ञानात्मकश्चायमाकारो यद्येकः स्थूलो यदि वाऽनेकः परमाणुशो भिन्न उभयथाऽपि बाह्यार्थभावि दूषणमशक्यमुद्धर्त्तुम्। न हि तद् बहिर्भावनिबन्धनं दूषणं येन तद्भावेन भवेत्। मूर्त्तनिमित्तं बाधकं नामूर्त्ते विज्ञानात्मनीत्यपि निःसारम्। साकारतायां ज्ञानस्यापि मूर्त्तत्वादयमेव हि चित्तानामाकारो मूर्त्तिरिति।

श्रीमद्राजजगद्दलविहारीय-महायति-भिक्षुमोक्षाकरगुप्तविरचितायां तर्कभाषायां परार्थानुमानपरिच्छेदः समाप्तः।

तर्कभाषामिमां कृत्वा पुण्यमासादि यन्मया।
तेन पुण्येन लोकोऽयं बुद्धत्वमधिगच्छतु॥

ग्रन्थाग्रं श्लोकमानं ८४०

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साङ्ख्यकारिका

दुःखत्रयाऽभिघाताज्जिज्ञासा तदभिघातके हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥१॥

दृष्टवदानुश्रविकः, स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥२॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥३॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं, प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥

प्रतिविषयाऽध्यवसायो दृष्टः, त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्ग-लिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु ॥५॥

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।
तस्मादपि चाऽसिद्धं परोक्षमाप्तागमात्सिद्धम् ॥६॥

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात्समानाभिहाराच्च ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सौक्ष्म्यात्तदनुपलब्धिर्नाऽभावात् कार्यतस्तदुपलब्धिः ।
महदादि तच्च कार्यं, प्रकृतिविरूपं, सरूपं च ॥८॥

असदकरणादुपादानग्रहणात्, सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात्, कारणभावाच्च सत् कार्यम् ॥९॥

हेतुमदनित्यमव्यापि, सक्रियमनेकमाश्रितं लिङ्गम् ।
साऽवयवं, परतन्त्रं, व्यक्तं, विपरीतमव्यक्तम् ॥१०॥

त्रिगुणमविवेकि विषयः, सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥११॥

प्रीत्यप्रीति-विषादात्मकाः, प्रकाश-प्रवृत्ति-नियमार्थाः ।
अन्योऽन्याऽभिभवाऽऽश्रय-जनन-मिथुनवृत्तयश्च गुणाः ॥१२॥

सत्त्वं लघु, प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः ।
गुरु वरणकमेव तमः, प्रदीपवच्चाऽर्थतो वृत्तिः ॥१३॥

अविवेक्याऽऽदिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाऽभावात् ।
कारणगुणाऽऽत्मकत्वात् कार्यस्याऽव्यक्तमपि सिद्धम् ॥१४॥

भेदानां परिणामात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूपस्य ॥१५॥

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात् ॥१६॥

संघातपरार्थत्वात्, त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च ॥१७॥

जन्म-मरण-करणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं, त्रैगुण्यविपर्ययाच्चैव ॥१८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं, माध्यस्थ्यं, द्रष्टृत्वमकर्तृभावश्च ॥१९॥

तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥२०॥

पुरुषस्य दर्शनार्थं, कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥२१॥

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्पञ्चभ्यः पञ्च भूतानि ॥२२॥

अध्यवसायो बुद्धिः, धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद्रूपं, तामसमस्माद्विपर्यस्तम् ॥२३॥

अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ।
एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव ॥२४॥

सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात् ।
भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥२५॥

बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।
वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ॥२६॥

उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात् ।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाच्य ॥२७॥

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दाश्च पञ्चानाम् ॥२८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥२९॥

युगपच्चतुष्टयस्य तु वृत्तिः, क्रमश्च तस्य निर्दिष्टा ।
दृष्टे, तथाऽप्यदृष्टे, त्रयस्य तत्पूर्विका वृत्तिः ॥३०॥

स्वां स्वां प्रतिपद्यन्ते परस्पराऽऽकूतहेतुकां वृत्तिम् ।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥३१॥

करणं त्रयोदशविधं, तदाहरण-धारण-प्रकाशकरम् ।
कार्यं च तस्य दशधाऽऽहार्यं, धार्यं प्रकाश्यञ्च ॥३२॥

अन्तःकरणं त्रिविधं, दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥३३॥

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि ।
वाग्भवति शब्दविषया, शेषाणि तु पञ्चविषयाणि ॥३४॥

साऽन्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात्त्रिविधं करणं द्वारि, द्वाराणि शेषाणि ॥३५॥

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषा ।
कृत्स्नं पुरुषस्याऽर्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥३६॥

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि पुनः प्रधान-पुरुषाऽन्तरं सूक्ष्मम् ॥३७॥

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ताः, घोराश्च, मूढाश्च ॥३८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।
सूक्ष्मास्तेषां नियताः, मातापितृजा निवर्त्तन्ते ॥३९॥

पूर्वोत्पन्नमसक्तं, नियतं, महदादिसूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥४०॥

चित्रं यथाऽऽश्रयमृते, स्थाण्वादिभ्यो विना यथा च्छाया ।
तद्वद्विनाऽविशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥४१॥

पुरुषार्थहेतुकमिदं निमित्त-नैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥४२॥

सांसिद्धिकाश्च भावाः, प्राकृतिका, वैकृतिकाश्च धर्माद्याः ।
दृष्टाः करणाऽऽश्रयिणः, कार्याऽऽश्रयिणश्च कललाद्याः ॥४३॥

धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेन चाऽपवर्गो, विपर्ययादिष्यते बन्धः ॥४४॥

वैराग्यात्प्रकृतिलयः, संसारो भवति राजसाद्रागात् ।
ऐश्वर्यादविघातो, विपर्ययात्तद्विपर्यासः ॥४५॥

एष प्रत्ययसर्गो विपर्यया-ऽशक्ति-तुष्टि-सिद्ध्याख्यः ।
गुणवैषम्यविमर्दात्तस्य च भेदास्तु पञ्चाशत् ॥४६॥

पञ्च विपर्ययभेदाः भवन्त्यशक्तिस्तु करणवैकल्यात् ।
अष्टाविंशतिभेदा, तुष्टिर्नवधाऽष्टधा सिद्धिः ॥४७॥

भेदस्तमसोऽष्टविधो, मोहस्य च, दशविधो महामोहः ।
तामिस्रोऽष्टादशधा, तथा भवत्यन्धतामिस्रः ॥४८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदश वधा बुद्धेर्विपर्ययात्तुष्टिसिद्धीनाम् ॥४९॥

आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात्पञ्च, नव तुष्टयोऽभिमताः ॥५०॥

ऊहः शब्दोऽध्ययनं, दुःखविघातास्त्रयः, सुहृत्प्राप्तिः ।
दानं च, सिद्धयोऽष्टौ, सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥५१॥

न विना भावैः लिङ्गं न विना लिङ्गेन भावनिर्वृत्तिः ।
लिङ्गाख्यो, भावाख्यस्तस्माद् द्विविधः प्रवर्त्तते सर्गः ॥५२॥

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥५३॥

ऊर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥५४॥

तत्र जन्ममरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।
लिङ्गस्याऽऽविनिवृत्तेस्तस्माद् दुःखं स्वभावेन ॥५५॥

इत्येष प्रकृतिकृतौ महदादिविशेषभूतपर्यन्तः ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥५६॥

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥५७॥

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम् ॥५८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रङ्गस्य दर्शयित्वा निवर्तते नर्त्तकी यथा नृत्यात् ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य निवर्तते प्रकृतिः ॥५९॥

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ॥६०॥

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥६१॥

तस्मान्न बध्यतेऽद्धा, न मुच्यते नापि संसरति कश्चित् ।
संसरति, बध्यते, मुच्यते च नानाऽऽश्रया प्रकृतिः ॥६२॥

रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥६३॥

एवं तत्त्वाभ्यासान्नाऽस्मि न मे, नाऽहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥६४॥

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥६५॥

रङ्गस्थ इत्युपेक्षक एको, दृष्टाऽहमित्युपरमत्येका ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥६६॥

सम्यग् ज्ञानाधिगमाद् धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः ॥६७॥

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥६८॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते तत्र भूतानाम् ॥६९॥

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय, तेन च बहुधा कृतं तन्त्रम् ॥७०॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१॥

सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः, परवादविवर्जिताश्चापि ॥७२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगसारसंग्रहः

प्रथमोऽशः ।

यः सृष्ट्वाब्जविष्णुशङ्करमयं बुद्ध्याख्यसूत्रं महत्-
तत्त्वं सत्त्वरजस्तमोमयमहामायामयाद्देहतः ।
अन्तर्यामितयोर्णनाभवदहो तेनैव कुर्वज्जग-
च्चक्रव्यूहमिदं निजांशमशकान् बध्नाति तस्मै नमः ॥१॥

पतञ्जलिव्यासमुखान् गुरूनन्यांश्च भक्तितः ।
नतोऽस्मि वाङ्मनःकायैरज्ञानध्वान्तभास्करान् ॥२॥

वार्त्तिकाचलदण्डेन मथित्वा योगसागरम् ।
उद्धृत्यामृतसारोऽयं ग्रन्थकुम्भे निधीयते ॥३॥

तत्र पुरुषस्यात्यन्तिकस्वरूपावस्थितेर्हेतुश्चित्तवृत्तिनिरोधो योग इति योगद्वयसाधारणं लक्षणम् । व्युत्थानकालीनश्च यत्किञ्चिच्चित्तवृत्तिनिरोधो नात्यन्तिकस्वरूपावस्थितिरूपमोक्षे हेतुः जन्मबीजक्लेशाद्यनुच्छेदकत्वात् अखिलवृत्तिसंस्कारानुच्छेदकत्वाच्च अतस्तत्र नातिव्याप्तिः । प्रलय-कालीनस्य च वृत्तिनिरोधस्य व्यावर्तनाय आत्यन्तिकेति । स्वरूपा-वस्थितिश्चौपाधिकरूपनिवृत्तिः । स्वरूपस्य वाऽप्रच्यवः । तथा च स्मर्यते—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मुक्तिर्हित्वान्यथाभावं स्वरूपेण व्यवस्थितिरिति ।

तत्र सम्प्रज्ञाताख्ययोगस्य मोक्षहेतुत्वम् तत्त्वसाक्षात्कारद्वारा क्लेशाद्युच्छेदकत्वात् । असम्प्रज्ञातयोगस्य चाऽखिलवृत्तिसंस्कारदाहद्वारा प्रारब्धस्याऽप्यतिक्रमेणेति वार्त्तिकेऽस्माभिः प्रपञ्चितं संक्षेपतश्चाग्रेऽपि वक्ष्यामः । योगाङ्गेषु ज्ञानभक्तिकर्मादिषु च योगशब्दो योगसाधनत्वान्मोक्षोपायत्वाच्च गौण इति ॥

अथ का निरोद्धव्याश्चित्तवृत्तयः ? को वा निरोध ? इति । **उच्यते**। प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति पञ्चविधाश्चित्तवृत्तयः । इच्छाकृत्यादिरूपवृत्तीनां चैतन्निरोधेनैव निरोधो भवति । तत्र प्रत्यक्षानुमानागमाः प्रमाणानि । इन्द्रियद्वारा या बुद्धेर्यथार्था वृत्तिः सा प्रत्यक्षं प्रमाणम् । ईश्वरसत्त्ववृत्तेः संग्रहाय तज्जातीयत्वमत्र विवक्षणीयम् । बुद्धिवृत्तिश्च प्रदीपस्य शिखावद्बुद्धेरग्रभागो येन चित्तस्यैकाग्रताव्यवहारो भवति । स एव च भाग इन्द्रियद्वारा बाह्यार्थे संयुज्य अर्थाकारेण परिणमते। [१]मूषानिक्षिप्तद्रुतताम्रवत् । तथा च सांख्यसूत्रम्—**भागगुणाभ्यां तत्त्वान्तरं वृत्तिः सम्बन्धार्थं सर्पती**ति । यतो बुद्धिर्विषयेषु सम्बन्धार्थं सर्पति गच्छति इति हेतोर्वृत्तिर्बुद्धेर्भागोऽग्नेः स्फुलिङ्गवद्विभक्तांशो बुद्धेरिच्छादिवत् गुणश्च न भवति द्रव्यस्यैव क्रियासम्भवादित्यर्थः । सा च वृत्तिः पुरुषे प्रतिबिम्बिता सति यद्भासते तदेव प्रमाणस्य फलं प्रमेत्युच्यते। तदेव च द्रष्टुर्वृत्तिसारूप्यमप्युच्यते । लिङ्गजन्या वृत्तिरनुमानं प्रमाणम् । शब्दजन्या वृत्तिश्च शब्दप्रमाणमिति । फलं तु सर्वत्र पौरुषेयो बोध एव पुरुषार्थमेव करणानां प्रवृत्तेरिति । विपर्ययवृत्तिश्च मिथ्याज्ञानं दोषजन्यम् । विकल्पवृत्तिस्तु राहोः शिरः पुरुषस्य चैतन्य-

१. तैजसद्रव्यद्रावणपात्रम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मित्यादिरूपा । तस्याश्च विशेषदर्शनानिवर्त्यतामात्रेण विपर्ययाद्भेदः । निद्रावृत्तिश्च सुखमहमस्वाप्समित्यादिस्मृतिहेतुरनुभवः सुषुप्तिकालीनः सुखादिविषयः । स्मृतिश्च संस्कारमात्रजन्या वृत्तिरिति वृत्तयो व्याख्याताः ॥

निरोधो व्याख्यायते । निरोधो न नाशोऽभावसामान्यं वा अभावानङ्गीकारात् वक्ष्यमाणसंस्कारजनकत्वानुपपत्तेश्च । किं तु वृत्तितन्निरोधौ चित्तस्य स्वविषये प्रवृत्तिनिवृत्ती भावरूपे एव गतिप्रत्यागतिवत् पुरुषप्रयत्नजन्ये । प्रवृत्तिनिवृत्त्योः अन्योन्याभावत्वे विनिगमकाभावात् । प्रवृत्तिनिवृत्त्यौदासीन्यरूपत्रैविध्यानुपपत्तेश्चेति । अतश्च भावत्वाविशेषाद् वृत्त्येव निरोधेनापि संस्कारो जन्यते । संस्कारवृद्धिं विनाऽनुदिनं योगस्य कालवृद्धौ नियामकान्तरासम्भवादिति दिक् ॥

योगसामान्यं लक्षितं तद्विशेष उच्यते । स योगो द्विविधः । सम्प्रज्ञातोऽसम्प्रज्ञातश्च । तत्र सम्यक् प्रज्ञायते साक्षात्क्रियते ध्येयमस्मिन्निरोध इति सम्प्रज्ञातो ध्येयातिरिक्तवृत्तिनिरोधविशेषः । तथा च ध्येयसाक्षात्काराख्यफलोपहितनिरोधत्वं सम्प्रज्ञातत्वम् । एकाग्रताविशेषरूपधारणादित्रयकालीनानां निरोधानां प्रलयादिकालीननिरोधानां च व्यावर्त्तनायोपहितान्तम् । धारणादित्रयकालीनस्तु निरोधो न साक्षात्कारहेतुः विषयान्तरवासनाया बलवत्तरतया प्रतिबन्धात् योगजधर्मनाश्याऽधर्मेण प्रतिबन्धाच्चेति । सम्प्रज्ञातरूपो ध्येयातिरिक्तवृत्तिनिरोधश्च विषयान्तरसञ्चाराख्यप्रतिबन्धनिवृत्तिरूपतया विषयान्तरवासनाभिभवद्वारा च तथा धर्मविशेषद्वारा च ध्येयसाक्षात्कारे हेतुर्भवति । चित्तं हि स्वत एव सर्वार्थग्रहणक्षमं विभु च भवति । तमसावरणादेव तु न सदा सर्वं गृह्णाति । अतस्तमोवर्धकानां विषयान्तरसञ्चारवासनापापादीनां निरोधाख्ययोगतः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षये स्वयमेव ध्येयं वस्तु साक्षात् क्रियते चित्तेनेति योगशास्त्रसिद्धान्तः । सम्प्रज्ञातस्य चातुर्विध्यमग्रे वक्ष्यते ॥

असम्प्रज्ञातो लक्ष्यते । न किञ्चित् सम्प्रज्ञायतेऽस्मिन्निति व्युत्पत्त्या असम्प्रज्ञातयोगः सर्ववृत्तिनिरोधः । तदा संस्कारमात्रशेषं चित्तं तिष्ठति । अन्यथा व्युत्थानानुपपत्तेः । तस्य च लक्षणं तत्त्वज्ञानसंस्कारदाहकत्वे सति सर्ववृत्तिनिरोधत्वम् । प्रलयादिकालीननिरोधव्यावर्तनाय सत्यन्तम् ॥

इदानीमभ्यर्हितत्वादादौ योगफलमुच्यते । तत्र तावत् योगद्वय-साधारणं दृष्टं फलं संप्रज्ञातस्य वृत्तिनिरोधेन वृत्त्युत्थदुःखभोगनिवृत्तिः । अदृष्टं च फलं संप्रज्ञातस्य पूर्वोक्तद्वारैर्ध्येयसाक्षात्कारः । **'क्षीणवृत्ते-रभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिरिति** सूत्रात् । ततश्चाविद्यादिक्लेशनिवृत्त्या मोक्षः । तथा सत्यां कामनायां भूतेन्द्रियप्रकृतिजयोत्थः स्वेच्छातो गतिश्च भवति । असम्प्रज्ञातस्य त्वदृष्टं फलं तत्त्वज्ञानसाधारणानामखिलसंस्काराणां प्रारब्धकर्मणां च दाहाच्छीघ्रं स्वेच्छया मोक्षः । तथाहि—तत्वज्ञानेन तावत् स्वसंस्कारः प्रारब्धकर्म च नातिक्रमितुं शक्यते अविरोधात् । **'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये'** इति श्रुत्या ज्ञानिनो मोक्षे प्रारब्धनिमित्तककिञ्चिद्वि-लम्बसिद्धेश्च । ज्ञानेन प्रारब्धनाशे जीवन्मुक्तिश्रुतिस्मृतिविरोधाच्च प्रारब्धकर्मणां ज्ञाननाश्यत्वस्य वेदान्तसूत्रेण प्रतिषिद्धत्वाच्च । योगस्य तु प्रारब्धकर्मनाशकत्वे बाधकाभावेन

विनिष्पन्नसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।
प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात् ॥

इति विलम्बाभावश्रवणेन च प्रारब्धकर्मनाशकत्वमस्ति । अतः प्रारब्धकर्मणोऽप्यतिक्रमेण शीघ्रमोक्षार्थिनो ज्ञानोत्पत्त्यनन्तरमप्यसम्प्रज्ञात-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगोऽपेक्ष्यत इति । अधिकं तु वार्त्तिकेऽस्माभिः प्रपञ्चितम् । एतेनासम्प्रज्ञाताभावेऽपि प्रारब्धभोगानन्तरं ज्ञानिनां मोक्षो भवत्येवेति सिद्धान्तो न विरुध्यते । तत्र च प्रमाणं **तत्र तावदेव चिरं यावन्न विमोक्ष्ये** इत्यादिश्रुतिः । अविद्याविनिवृत्तौ बीजाभावात् पुनर्जन्मानुपपत्तिश्च । विमोक्ष्ये प्रारब्धकर्मणः सकाशाद्विमुक्तो भविष्यतीत्यर्थः । **स्यादेतत्**

योगाग्निर्दहति क्षिप्रमशेषं पापजं रजः ।
प्रसभं जायते ज्ञानं साक्षान्निर्वाणसिद्धिदम् ॥

इत्यादि स्मृत्येकवाक्यतया योगस्य कर्मनाशकत्ववाक्यानि सम्प्रज्ञातयोगपराण्येव सन्त्विति । **मैवम्** । उक्तवाक्येन हि सम्प्रज्ञातयोगस्य ज्ञानप्रतिबन्धकपापमात्रनाशकत्वमवगम्यते न सर्वकर्मनाशकत्वम् । तथा सति **ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन** इत्यादिशास्त्रोक्तं ज्ञानस्य सर्वकर्मनाशकत्वमपि नोपपद्येत । ज्ञानहेतुना सम्प्रज्ञातयोगेनैव सर्वकर्मनाशात् । यत्तु योगस्य सर्वकर्मनाशकत्वं श्रूयते **योगाग्निदग्धकर्मचयोऽचिरादिति** तदसम्प्रज्ञातयोगपरमेव । अतो नानयोर्वाक्ययोः सम्प्रज्ञातपरत्वेनैकवाक्यत्वं घटते । तस्मात्सम्प्रज्ञातयोगतज्जन्यज्ञानाभ्यामनाश्यस्य प्रारब्धकर्मणः असम्प्रज्ञातयोगनाश्यत्वमेव योगाग्नीत्यादिवाक्यार्थः । किं च ज्ञानस्य योगस्य च कर्मनाशकत्वं सहकार्युच्छेदेन फलाक्षमीकरणमात्रमिदमेव च दाहः । तथाहि—ज्ञानेनाविद्यादिक्लेशक्षये सति क्लेशाख्यसहकार्युच्छेदादेव कर्मणा विपाक आरब्धुं न शक्यते । **सति मूल तद्विपाक** इति सूत्रेण कर्मणां स्वमूले क्लेशे सत्येव विपाकारम्भवचनात् व्यासभाष्येण तथा व्याख्यानाच्च । अतो ज्ञानस्य कर्मनाशकत्वदाहकत्ववचनं न्यायसिद्धानुवादमात्रम् । एवमेवासम्प्रज्ञातयोगेनापि भोगहेतुवासनारूपः कर्मणां सहकार्येवोच्छिद्यते । व्युत्थान-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संस्काराणां निरोधसंस्कारैर्बलवत्तरैरुच्छेदस्य सूत्रभाष्याभ्यामुक्तत्वात् स्वानुभवसिद्धत्वाच्च । अतोऽसम्प्रज्ञातयोगपरम्परया अखिलवासनाक्षये सति प्रारब्धफलकमपि कर्म फलसम्पत्तये न समर्थं वासनाया अपि कर्मसहकारित्वस्य सूत्रभाष्ययोरवधृतत्वात् । ततश्चासमाप्तभोगकमेव प्रारब्धं कर्म स्वाश्रयचित्तनाशेन नश्यति । पुरुषप्रयोजनं विना चित्तस्यावस्थानाभावात् पुरुषार्थस्य चित्तस्थितिहेतुत्वात् । तस्मादसम्प्रज्ञातयोगस्य प्रारब्धकर्मदाहकत्वं युक्तितोऽपि सिद्धमिति दिक् ॥

तदेवं योगयोः फलमुक्तम् । इदानीं सम्प्रज्ञातयोगस्य अवान्तरभेदा उच्यन्ते । तत्र सम्प्रज्ञातश्चतुर्विधः । वितर्कानुगतः विचारानुगतः आनन्दानुगतः अस्मितानुगत इति । साक्षात्कारविशेषेषु तान्त्रिकं वितर्कादिपरिभाषाचतुष्टयं तैः सफलैः साक्षात्कारैः अनुगता उपहिताश्चित्तवृत्तिनिरोधा वितर्कानुगतादिसञ्ज्ञका भवन्ति । वितर्कादिकं क्रमिकं भूमिकाचतुष्टयम् उच्चारोहिक्रमिकसोपानपरम्परावद्वितर्काणां क्रमेणैव तदनुगतत्वेन निरोधस्यापि क्रमः कथ्यते । स्वतो निरोधे क्रमाभावात् । वितर्कादिक्रम औत्सर्गिकः । एकदा चित्तस्य परमसूक्ष्मप्रवेशस्य प्रायशोऽसंभवात् । तथा च स्मर्यते ।

योगारम्भे मूर्तहरिममूर्तमथ चिन्तयेत् ।
स्थूले विनिर्मितं चित्तं ततः सूक्ष्मे शनैर्नयेत् ॥ इति ।

तथा स्थूलादिविषयेषु रागादपि उत्तरोत्तरभूमिषु चित्तसमाधानं न सम्भवति । अतः स्थूलादिसाक्षात्कारेण तत्र तत्र दोषदृष्ट्या उत्तरोत्तर भूम्यारोहो राजमार्गः । यस्य तु कदाचिदीश्वरप्रसादादादावेवोत्तरभूम्यारोहो भवति । तेन च पूर्वभूमिकाभ्यासः तत्सिद्धिकामनां विना न कार्यः उत्तरभूमिकारोहस्य फलस्य जातत्वात् । तदुक्तं भाष्यकारैः – **ईश्वरप्रसादा-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्जितोत्तरभूमिकस्य नाधारभूमिषु विनियोगस्तदर्थस्यान्यत एव सिद्धेरिति। एतच्च भूमिकाचतुष्टयमेकस्मिन्नेवावलम्बने क्रमात् कर्तव्यं अन्यथा पूर्वपूर्वोपासनात्यागदोषापत्तेः । चित्तचाञ्चल्यदोषप्रसङ्गाच्च । तद्यथा—यद्विराट्शरीरं चतुर्भुजादिकं वा शरीरं घटादिकं वा षड्विंशति-तत्त्वसङ्घातं समष्टिव्यष्ट्यात्मकमधिकृत्य प्रथमं भावना प्रवर्तते तदालम्बनमित्युच्यते । तत्रालम्बने प्रथमं स्थूलाकारधारणाध्यानसमाधि-भिर्यः स्थूलगताशेषविशेषाणामतीतानागतवर्तमानव्यवहितविप्रकृष्टानां गुणदोषरूपाणामश्रुतामतानां साक्षात्कारः स वितर्क इत्युच्यते । स्थूलशब्देन च भूतानीन्द्रियाणि चात्र गृह्यन्ते । तपोजपादिसाधनैर्ध्रुवादीनां चतुर्भुजादिसाक्षात्कारादयं साक्षात्कारो विलक्षणः । तेषां हि तपोध्यानादिना तुष्टः परमेश्वरः स्वयं शरीरं निर्माय पुरः प्रकटीभूय वागादिव्यवहारं चक्रे । योगिनस्तु योगबलेन वैकुण्ठश्वेतद्वीपादिस्थमेव चतुर्भुजादिशरीरमन्यत्र स्थिताः पश्यन्ति । तत्र च वाग्व्यवहारादिकं न सम्भवति । तथा चतुर्भुजादिशरीरस्य बाह्याभ्यन्तराखिलगुणदोषादिकम-तीतादिरूपं पश्यन्तीति विशेषः । इति वितर्को व्याख्यातः ॥

अथ विचारो व्याख्यायते । तत्रैवालम्बने स्थूलाकारसाक्षात्कारा-नन्तरं स्थूलाकारदृष्टिं त्यक्त्वा क्रमेण प्रकृतिपर्यन्तसूक्ष्माकारधारणादित्रयेण यः पूर्ववदशेषविशेषतस्तत्तत्सूक्ष्माकारः साक्षात्कारः स विचार इत्युच्यते। सूक्ष्मशब्दस्य कारणार्थकतया तत्र तन्मात्राहंकारमहत्तत्त्वप्रकृतयः सूक्ष्मशब्देन गृह्यन्ते । **ननु** स्थूलालम्बने कथं सूक्ष्मदृष्टिर्यथार्था स्यादिति **चेन्न** । सर्वेषां शरीरघटादीनां षड्विंशतितत्त्वकार्यतया कार्यकारणाभेदेन षड्विंशतितत्त्वरूपत्वात् । तत्रापि कार्यरूपताया अस्थिरत्वेन कारण-रूपताया एव सत्यत्वात् । **वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्यमिति श्रुतेः । ननु तथापि सूक्ष्माकारस्यादृष्टजातीयस्य कथं भावना स्यादिति चेन्न । श्रुतमतप्रकारैरेव सामान्यतो भावनासम्भवात् अश्रुतामत-विशेषस्य च योगजधर्मबलेन ग्रहणादेवं सर्वत्र । इति विचारो व्याख्यातः ।

अथानन्दो व्याख्यायते । तत्रैवालम्बने सूक्ष्माकारसाक्षात्कारानन्तरं तामपि दृष्टिं त्यक्त्वा चतुर्विंशतितत्त्वानुगते सुखरूपपुरुषार्थे धारणादित्रयेण यः पूर्ववदशेषविशेषतः सुखाकारः साक्षात्कारः स आनन्द इत्युच्यते । ज्ञानज्ञेययोरभेदोपचारात् । यद्यपि प्रकृतेस्त्रिगुणात्मकत्वेन सुखवद्दुःख-मोहावपि सर्वत्र स्तस्तथापि सुखरागेणैव संसारादात्मदर्शनप्रतिबन्धाच्च तदेव मुख्यतोऽशेषविशेषतो योगेन द्रष्टव्यम् । यथा तत्र दोषदर्शनेन दुःखदृष्ट्या वैराग्यं स्यादित्याशयेनानन्दमात्रे योग उपदिष्ट इति मन्तव्यम् । मोक्षधर्मे तु धर्मधर्म्यभेदेन धर्मान्तरवदानन्दमपि चतुर्विंशतितत्त्वेष्वेव प्रवेश्य सम्प्रज्ञातयोगस्य त्रैविध्यमेव प्रोक्तम् ।

वितर्कश्च विचारश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं योगमादितः ॥

इति प्रथमं योगं सम्प्रज्ञातं समादधानस्य कुर्वतः मुनेरादितः क्रमेण वितर्कादित्रयं जायत इत्यर्थः । तत्र च विवेको वक्ष्यमाणास्मितेति । इत्यानन्दो व्याख्यातः ।

अथास्मिता व्याख्यायते । एवं भूमिकाक्रमेण स्थूलसूक्ष्मानन्दानां स्वरूपाणि दोषबहुलानि साक्षात्कृत्य तेभ्यो विरज्य तत्रैवालम्बने यः कूटस्थविभुचिन्मात्रत्वादिरूपैस्तेभ्यो विवेकत आत्माकारः साक्षात्कारः सोऽस्मितेत्युच्यते । देहादिभिन्नोऽस्मीत्येतावन्मात्राकारत्वात् । आत्मज्ञाना-नन्तरं च ज्ञातव्यं नास्तीत्यतोऽस्मिता चरमभूमिका भवति । अस्यैव चात्मसाक्षात्कारस्य परा काष्ठा धर्ममेघसमाधिरित्युच्यते । यस्योदये

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानेऽप्यलंप्रत्ययरूपेण परवैराग्येण असम्प्रज्ञातयोगो जायत इति । अस्याश्चास्मिताया द्वौ विषयौ चतुर्विंशतितत्त्वविवेकत आत्मसामान्यं पञ्चविंशतितत्त्वविवेकतः परमात्मा च तयोरप्यौत्सर्गिको भूमिका-क्रमोऽस्ति ॥

चतुर्विंशतितत्त्वेभ्यः ख्यातो यः पञ्चविंशकः ।
विवेकात् केवलीभूतः षड्विंशं सोऽनुपश्यति ॥

इति स्मृतेः जीवापेक्षयापि परमात्मनः सूक्ष्मत्वाच्च । जीवस्य हि स्वरूपं प्रत्यक्षमस्ति तत्रैव ज्ञानेऽपरिच्छिन्नकूटस्थत्वादिज्ञानस्यैवात्म-साक्षात्काररूपत्वात् । परमात्मनस्तु तदाप्रत्यक्षमिति । तत्रात्मसामान्य-विषयको योगः सत्त्वपुरुषान्यताख्यातिशब्देन स्थले स्थले सूत्रभाष्य-योरुक्तः । परमात्मयोगस्तु **ईश्वरप्रणिधानाद्वेति** सूत्रेण तद्भाष्येण चोक्तः । तथा मात्स्यकौर्मयोरपि—

योगी च त्रिविधो ज्ञेयो भौतिकः साङ्ख्य एव च ।
तृतीयोऽन्त्याश्रमी प्रोक्तो योगमुत्तममास्थितः ॥

प्रथमा भावना पूर्वे साङ्ख्ये त्वक्षरभावना ।
तृतीये चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥ इति ।

अत्र भूतशब्दोऽखिलजडोपलक्षकः । अन्त्याश्रमी परमहंसः । प्रथमा भूतभावना । पूर्वे प्रथमयोगिनि । साङ्ख्ये तु मध्यमयोगिन्यक्षर-भावना कूटस्थचित्सामान्यभावना । तृतीये च परमहंसेऽन्तिमा अन्ते कर्त्तव्या पारमेश्वरी परमात्मगोचरा भावनेत्यर्थः । अतः सर्वेषु सम्प्रज्ञातेषु मध्ये पारमेश्वरयोग एव श्रेष्ठः । तथा कौर्मेऽप्युक्तम्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत्र पश्यसि चात्मानं नित्यानन्दं निरञ्जनम् ।
मामेकं स महायोगो भाषितः पारमेश्वरः ॥

ये चान्ये योगिनां योगाः श्रूयन्ते ग्रन्थविस्तरे ।
सर्वे ते ब्रह्मयोगस्य कलां नार्हन्ति षोडशीम् ॥

यत्र साक्षात्प्रपश्यन्ति विमुक्ता विश्वमीश्वरम् ।
सर्वेषामेव योगानां स योगः परमो मतः ॥ इति ।

नन्वस्मितायाः कथमचेतनेषु घटाद्यालम्बनेषु सम्भव इति चेन्न। कारणरूपेण जीवेश्वरयोः सर्वत्रानुगमात् । मुक्तात्मनां च विभुत्वेन सर्वत्रानुगमादिति ।

तदेवं सम्प्रज्ञातयोगस्य चत्वारो भेदा निरूपिताः । तेषु च वितर्काद्याश्चत्वारः स्थूलादिसाक्षात्काराः समापत्तिशब्देनापि तन्त्रे परिभाषिताः । तत्र च वितर्कानुगतविचारानुगतयोर्यौ वितर्कविचारौ विशेषणे तावपि प्रत्येकं द्विविधौ भवतः । तयोर्वितर्कः सवितर्क-निर्वितर्करूपेण द्विधा । विचारश्च सविचारनिर्विचाररूपेण द्विधा । तद्यथा— भूतेन्द्रियरूपस्थूलसाक्षात्कारो यो वितर्क इत्युक्तः स चेच्छब्दार्थज्ञानानां विकल्पेन मिश्रितो भवति तदा सवितर्कसमापत्तिरित्युच्यते तेन शून्या च निर्वितर्कसमापत्तिरिति ॥

अथ कः शब्दार्थज्ञानविकल्प इति । उच्यते । हरिरिति शब्दो हरिरित्यर्थो हरिरिति ज्ञानम् इत्येवं त्रयाणां शब्दार्थज्ञानानामेकाकारत्वेनाभेदभ्रमः पूर्वोक्तविकल्परूपः शब्दार्थज्ञानविकल्पः । तद्युक्तश्च स्थूलसाक्षात्कारः सवितर्को विकल्प इति चोच्यते । तच्छून्यश्च स्थूल-साक्षात्कारो निर्वितर्को निर्विकल्प इति चोच्यते । निर्विशेषणात्मादि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साक्षात्कारो निर्विकल्प इत्याधुनिकतार्किकप्रलापस्त्वप्रामाणिक एवेति मन्तव्यम् । न च शब्दादिविकल्पो विकल्पसामान्योपलक्षकः । युक्तिसाम्यात् । तेन च सवितर्का समापत्तिरपरप्रत्यक्षमुच्यते विकल्परूपाविद्यालेशसंपर्कात् । निर्वितर्का तु समापत्तिः परं प्रत्यक्षमारोपसामान्याभावात् । इति वितर्कस्य द्वैविध्यमुक्तम् ॥

विचारस्य द्वैविध्यमुच्यते । तन्मात्रादिप्रकृतिपर्यन्तसूक्ष्मसाक्षात्कारो यो विचार इत्युक्तः स चेत् स्वस्वविकाराणां देशकालादीनां च अनुभवेन मिश्रितो भवति तदा सविचारसमापत्तिरुच्यते । तेन शून्या निर्विचारसमापत्तिरिति । तदित्थं सम्प्रज्ञातस्य भेदा उक्ताः । सर्वे च ते सम्प्रज्ञातयोगाः सालम्बनयोगा इति सबीजयोगा इति चोच्यन्ते ध्येयरूपालम्बनयोगात् तदापि वृत्तिबीजसंस्कारोत्पत्तेश्चेति ॥

सम्प्रज्ञातयोगिनः चतुर्भूमिका भवन्ति । तद्यथा प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्ताभावनीयश्च । तत्र सवितर्कसमापत्तिमान् प्रथमः शब्दार्थज्ञानविकल्पापरित्यागात् । निर्वितर्कसमापत्तिमान् द्वितीयः । स च ऋतम्भरप्रज्ञ इत्युच्यते । तत्प्रज्ञायामसदारोपसम्पर्कासम्भवात् । इयं च भूमिका मधुमत्यप्युच्यते । मधुवत् तृप्तिहेतुना प्रज्ञया योगात् । ततश्च क्रमेण निर्विचारसमापत्तिनिष्ठया प्रकृतिपर्यन्तजयी तृतीयः । अस्यामेव च भूमिकायामानन्दानुगतस्य प्रवेशः ॥ ततश्चास्मितानुगतयोगनिष्पत्तिपर्यन्तश्चतुर्थः । अस्याश्च भूमिकाया धर्ममेघाख्यसमाधिना परिसमाप्तिर्भवति । धर्ममेघसमाधिस्तु तदोच्यते यदा सिद्धिकामनात्यागेन निरन्तरोत्पन्नात् सत्त्वपुरुषान्यताख्यातिप्रवाहात् सवासनाविद्यानिवृत्त्या प्रयोजनाभावेन तस्यामपि ख्यातौ दुःखात्मिकायामलंप्रत्ययरूपं परवैराग्यं जायते यदुत्तरमसम्प्रज्ञातयोग उदेतीति सर्वज्ञतादिजनकं प्रकृष्टं धर्मं मेहति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्षतीति व्युत्पत्त्या धर्ममेघः समाधिरुच्यते । अस्यामवस्थायां जीवन्मुक्त इत्युच्यते । **नन्वेवं** किं सर्वज्ञतादिकं विना जीवन्मुक्तिपरममोक्षौ न **स्तः** ?। न स्तः, भाष्यवाक्यात् । तद्यथा सर्वज्ञत्वपर्यन्ताखिलयोग-सिद्धिव्याख्यानानन्तरं भाष्यम्-**ईश्वरस्यानीश्वरस्य वा प्राप्त-विवेकजज्ञानस्येतरस्य वा न दग्धक्लेशबीजस्य ज्ञाने पुनरपेक्षा काचिदस्ति सत्त्वशुद्धिद्वारेण त्वेतत्समाधिजमैश्वर्यं ज्ञानं चोप-क्रान्तम्। परमार्थतस्तु ज्ञानाददर्शनं निवर्तते । तस्मिन्निवृत्ते न सन्त्युत्तरक्लेशाः । क्लेशाभावात् कर्मविपाकाभावः । चरिताधि-काराश्चैतस्यामवस्थायां गुणा न पुरुषस्य दृश्यत्वेनोपतिष्ठन्ते तत्पुरुषस्य कैवल्यमिति** । अत्र विवेकजज्ञानं विवेकख्यातेः सिद्धिः । सर्वज्ञता पूर्वसूत्रप्रोक्ता । सत्त्वशुद्धिस्तु भुक्तवैराग्यमिति । अतः सर्वज्ञ्यादिपर्यन्तधर्ममेघसमाध्यनुत्पादेऽपि अभिमानरागद्वेषादिरूपभव-बीजदाहेनैव मुक्तिद्वयमिति साङ्ख्यसिद्धान्तोऽत्राप्यनुमतः । असम्प्रज्ञात-योगस्तु अखिलवासनाक्षयेण प्रारब्धातिक्रमद्वारा झटिति स्वेच्छया मोक्ष एवोपयुज्यते न तु नियमेनेति प्रागेवोक्तमिति सम्प्रज्ञातः प्रपञ्चितः ॥

इदानीमसम्प्रज्ञातः प्रपञ्च्यते । असम्प्रज्ञातयोगो द्विविधः । उपायप्रत्ययो भवप्रत्ययश्च । शास्त्रोक्तोपायानुष्ठानादिहैव लोके योऽसम्प्रज्ञातो जायते स उपायप्रत्ययः प्रत्ययशब्दस्य कारणवाचित्वात् । उपायाश्च श्रद्धावीर्यस्मृतिसमाधिप्रज्ञारूपा इति सूत्रेणोक्ताः । तत्र श्रद्धा योगे प्रीतिः । वीर्यं चित्तस्य धारणा । स्मृतिर्ध्यानम् । समाधिर्योगस्य चरमाङ्गम् । प्रज्ञा सम्प्रज्ञातयोगजन्यसाक्षात्कारः । एतानि क्रमेण वक्ष्यमाणपरवैराग्यद्वारेण असम्प्रज्ञातस्योपाया भवन्ति । तेषां चोपायानामतिशीघ्रतीव्रतरानुष्ठाना-दासन्नतरोऽसम्प्रज्ञातपर्यन्तयोगस्तत्फलं मोक्षश्च भवति । उपायानुष्ठान-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मान्द्येऽपि चेश्वरप्रणिधानादासन्नतरौ तौ भवतः । परमेश्वरप्रणिधानेन तदनुग्रहादिति ।

अथ क ईश्वरः किं वा तत्प्रणिधानम् ? **उच्यते** । अविद्यादि-पञ्चक्लेशैर्धर्माधर्मैस्तद्विपाकैः संस्कारसामान्यैश्च कालत्रयेऽप्यपरामृष्टः पुरुषविशेष ईश्वरः । स च **अथातो ब्रह्मजिज्ञासेत्यादिवेदान्तसूत्रैरशेष-विशेषतो मीमांसितः** । अतोऽत्र दिङ्मात्रेणोच्यते । तस्य साम्याति-शयशून्यमैश्वर्यं सार्वज्ञ्यं च । स च सर्वेषां ब्रह्मविष्णुहरादीनामपि गुरुः पितान्तर्यामिविधया वेदादिद्वारा च ज्ञानचक्षुःप्रदश्च, तस्य प्रणवो नाम, प्रणवपूर्वकं च तदनुचिन्तनम् साक्षात्कारपर्यवसायि प्रणिधानमिति । अतः परमेश्वरे संयमोऽसम्प्रज्ञातपर्यन्तयोगे मोक्षे च मुख्यकल्पः । आसन्न-तरतासम्पादनात् । जीवात्मसंयमस्तु तत्रानुकल्प इति सिद्धम् । किंच ईश्वरप्रणिधानाद् व्याध्यादिरूपा योगस्यान्तराया अपि न भवन्ति, अतोऽपि तदेव मुख्यकल्प इति । तथा चास्य मुख्यकल्पत्वं स्मर्यते ।

तस्मान्मुमुक्षोः सुसुखो मार्गः श्रीविष्णुसंश्रयः ।
चित्तेन चिन्तयन्नेव वञ्च्यते ध्रुवमन्यथा ॥ इति ।

तदेवमुपायप्रत्ययो व्याख्यातः ।

अथ भवप्रत्ययो व्याख्यायते । प्राग्भवीयसाधनानुष्ठानादौत्पत्तिक-ज्ञानवैराग्याभ्यामिच्छामात्रेण योऽसम्प्रज्ञातो विदेहप्रकृतिलयानां देवता-विशेषाणां जायते स भवप्रत्यय उच्यते । जन्ममात्रकारणकत्वात् । यथा हिरण्यगर्भादीनां योगनिद्रादिकम् । तत्र विदेहा नाम स्थूलदेहनिरपेक्षेण लिङ्गदेहेनाखिलव्यवहारक्षमा हिरण्यगर्भादयः । ये तु प्रकृत्युपासनया तच्छबलपरमेश्वरोपासनया वा ब्रह्माण्डं भित्त्वा महत्तत्त्वपर्यन्तावरणान्यतीत्य प्रकृत्यावरणं गता ईश्वरकोटयस्ते प्रकृतिलया उच्यन्त इति । सम्प्रज्ञात-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योगस्य तु भवप्रत्ययरूपविशेषो न सम्भवति धारणाध्यानसमाधीनां सम्प्रज्ञातयोगस्यान्तरङ्गत्वेन तेषां निष्पतौ तस्मिन्नेव जन्मनि सम्प्रज्ञाता-वश्यम्भावात् । अतः सम्प्रज्ञाते तूपायप्रत्ययभवप्रत्ययविभागः सूत्र-भाष्ययोर्न कृत इति । स च द्विविधोऽप्यसम्प्रज्ञातो ध्येयाभावान्निरा-लम्बनयोग उच्यते । अभ्यस्यमानश्च क्रमेण अखिलसंस्कारदाहक-त्वान्निर्बीजयोग उच्यते । असम्प्रज्ञातयोगो हि निरोधरूपोऽपि नवनव-संस्कारातिशयमभ्यासाज्जनयति । येन संस्कारतारतम्येन दिनपक्षमासादि-पर्यन्तकालवृद्धिः क्रमेण योगस्य भवति । स संस्कारो यथा यथाऽतिशय्यते तथा तथा तत्त्वज्ञानपर्यन्ताखिलवृत्तिसंस्कारांस्तनूकरोति । एवं क्रमेण चरमासम्प्रज्ञातेऽखिलसंस्कारदाहो भवति । ततः परारब्धमपि कर्म न स्वविपाकसमाप्तौ समर्थम् । भोगसंस्कारसहाकार्यभावात् । **तं विद्याकर्मणी समन्वारभेते पूर्वप्रभा चेत्यादिश्रुतिस्मृतिन्यायैर्जन्मादि-**विपाके पूर्वप्रज्ञाशब्दोक्तस्य प्राग्भवीयभोगसंस्कारस्य विद्याकर्मसह-कारित्वसिद्धेः । ततश्चरिताधिकारं चित्तं प्रारब्धकर्मणा निरोधसंस्कारैश्च सह स्वकारणेऽत्यन्तं लीयते । या चेयं चित्तस्य महानिद्रा इयमेव पुरुषस्य कैवल्यमात्यन्तिको दुःखात्मकाखिलदृश्यवियोगः । चित्तद्वारैव पुरुषस्य दृश्यरूपद्वितीयसम्बन्धादिति । तथा च स्मर्यते ।

मनसोऽभ्युदयो नाशो मनोनाशो महोदयः ॥ इति ।

तत्त्वज्ञानमात्रान्मोक्षे तु प्रारब्धसमाप्त्यनन्तरं तत्त्वज्ञानसंस्कारोऽपि चित्तेन सहैव नश्यतीति विशेषः । इदमत्रावधेयम्—ज्ञानं योगश्चोभयमपि व्यापारभेदात् स्वातन्त्र्येण मोक्षकारणमत्र शास्त्रे विवक्षितम् । गीतादिषु चोक्तम्—

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यत् साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥

इत्यादिभिः । साङ्ख्यं विवेकसाक्षात्कारः । योगस्तु चित्तवृत्ति-निरोधः । अतः केवलज्ञानेन मोक्षे जनयतिव्येऽभिमाननिवर्त्तकात्म-साक्षात्कारपर्यन्त एव सम्प्रज्ञातोऽपेक्ष्यते न तु वृत्त्यन्तरवासनाक्षयाद्यथ पुनः सम्प्रज्ञातपरंपरापि प्रारब्धसमाप्तौ सत्यां ज्ञानवासनावत् इतरवासनानामपि चित्तेन सहैव विनाशादिति दिक् ॥

इति श्रीविज्ञानभिक्षुविरचिते योगसारसंग्रहे योगस्वरूपस्य तत्प्रयोजनस्य च निरूपणं प्रथमोंऽशः ॥

द्वितीयोंऽशः

योगस्य स्वरूपं निरूपितम् । इदानीं योगस्य साधनानि वक्ष्यामः ॥

तत्र मन्दमध्यमोत्तमभेदेन त्रिविधा योगाधिकारिणो भवन्ति । आरुरुक्षुयुञ्जानयोगारूढरूपाः । तेषां त्रिविधानि साधनानि सूत्र-भाष्याभ्यामुक्तानि । तेषु मन्दमध्यमयोः साधनान्यग्रे वक्ष्यामः सौत्रक्रमात् । उत्तमाधिकारिणस्तु सौत्रक्रमेणैवादावुच्यन्ते । उत्तमाधि-कारिणस्त एव ये पूर्वभवानुष्ठितबहिरङ्गसाधनतया तन्नैरपेक्ष्येणैव योगारूढाः यथा जडभरतादयः । तेषां योगनिष्पत्तावभ्यासवैराग्ये एव मुख्यसाधनम् । न तु वक्ष्यमाणः क्रियायोगो वक्ष्यमाणानि योगबहिरङ्गानि वावश्यकानि । **अभ्यासवैराग्याभ्यां तन्निरोध** इति सूत्रात् । सोपकरणे अभ्यासवैराग्ये व्याख्याय-**उद्दिष्टः समाहितचित्तस्य योगः कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदर्थमिदमारभ्यत** इत्येव

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भाष्यकृता क्रियायोगादिरूपसाधनसूत्राणामवतारणाच्च । तथा—

आरुरुक्षुयतीनां च कर्मज्ञाने उदाहृते ।
आरूढयोगवृक्षाणां ज्ञानत्यागौ परौ मतौ ॥

इति गारुडाच्च जडभरतादीनां तथैवाचाराच्च । त्यागोऽत्र प्रकृतत्वाद्योगान्तरायस्य कर्मणः । तदुक्तं मोक्षधर्मे—

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥

इति । अनुगीतायां च—

अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारीति कथ्यते ॥

ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्म विष्टरः ।
आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः ॥ इति ।

गारुडे च—

आसनस्थानविधयो न योगस्य प्रसाधकाः ।
विलम्बजननाः सर्वे विस्तराः परिकीर्त्तिताः ॥

शिशुपालः सिद्धिमाप स्मरणाभ्यासगौरवात् ॥ इति ।

अत्र बाह्यकर्मणामेव योगान्तरायत्वात् त्यागो विवक्षितो न त्वान्तरस्य ।

एतानेके महायज्ञान् योगशास्त्रविदो जनाः ।
अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति ॥

इति मन्वादिष्वनीहमानस्यापि योगिनोऽन्तर्यागविधानात् । आवश्यकभिक्षाटनस्नानादावन्तर्यागस्य अविक्षेपकत्वेन फलेच्छाभि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानशून्यत्वेन च योगिनामबन्धकत्वाच्चेति दिक् ॥

योगस्योत्तमाधिकारी च योगारूढो गीतायां लक्षितः,

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥

इति योगारूढस्य च पारमहंस्येन योगाभ्यासो राजमार्गः । **एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति । ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदित्यादिश्रुतिस्मृत्योस्तद्दर्शनादिति ।**

तत्राभ्यासः चित्तस्य स्थितौ यत्नः । स्थितिश्च योगचरमाङ्गसमाधिर्निश्चलैकाग्रताधारारूपः ।

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥

इति गीतादिभ्यः तस्यां स्थितौ यत्नः तदर्थः प्रयासो ध्येयाद्बहिर्गच्छतश्चित्तस्य पुनः पुनरानयनम् । तदुक्तं गीतायाम्—

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ इति ।

वैराग्यं च अलंबुद्धिः न तु रागाभावमात्रं विषयासान्निध्यादिना रागाभावे विरक्तत्वापत्तेः । तच्च वैराग्यं द्विविधं परमपरं च । तत्रार्जनरक्षणक्षयहिंसाद्यनन्तदोषदर्शननिमित्तकमैहिकामुष्मिकविषयेषु वैतृष्ण्यमपरं वैराग्यम् । तदपि चतुर्विधम् यतमानसंज्ञा व्यतिरेकसंज्ञा एकेन्द्रियसंज्ञा वशीकारसंज्ञा चेति । तत्र वैराग्यसाधनस्य दोषदर्शनस्याभ्यासो यतमान-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संज्ञानाम्नी वितृष्णा वैराग्यस्य प्रथमभूमिका । ततोऽजितानीन्द्रियाणि तानि च जेतव्यानीति व्यतिरेकावधारणावस्था व्यतिरेकसंज्ञा । ततश्च बाह्येन्द्रियविषयेषु रूपादिषु रागादिक्षये सति एकस्मिन्नेव मनसि मानावमानादिविषयकरागद्वेषादिनिरसनमेकेन्द्रियसंज्ञा । ततश्च विषयस्य मानावमानादेश्च सान्निध्यकालेऽपि सर्वेन्द्रियाणां चित्तस्य चाक्षोभो वशीकारसंज्ञेति । सर्वत्र संज्ञाशब्दोऽभिव्यक्त्यर्थः । तेन स्फुटता लभ्यते । एतेषु चतुर्विधवैराग्येषु वशीकारसंज्ञैव योगारूढस्यानुष्ठेया । पूर्वस्य वैराग्यत्रयस्य युञ्जमानावस्थायामेव सिद्धत्वादिति । अपरं वैराग्यमुक्तम् परं वैराग्यमुच्यते । आत्मानात्मविवेकसाक्षात्कारात् अनात्मत्वदृष्ट्या ज्ञानफलस्य वाविद्यानिवृत्तेः सिद्ध्या तत्त्वज्ञानपर्यन्तेषु सर्वदृश्येषु पूर्वोत्पन्नदोषदर्शनेनैव दोषान्तरदर्शननिरपेक्षेणालंबुद्धिः परं वैराग्यम् । एतदनन्तरमेव मोक्षस्यावश्यकतयाऽस्य परत्वमिति । अभ्यासवैराग्ये व्याख्याते । एतयोश्च मध्ये वैराग्येण विषयवृत्तिः कुण्ठीक्रियते ध्येयगोचर-राभ्यासेन यद्ध्येयाकारवृत्तिप्रवाहो बलान् दृढः क्रियत इत्युभया-धीनश्चित्तवृत्तिनिरोध इति ।

इदानीमभ्यासस्यान्तरङ्गं साधनं परिकर्मादिकमुच्यते । परिकर्म-शब्देन च स्थितिहेतुश्चित्तसंस्कार उच्यते । परिकर्माङ्गसंस्कार इति परिकर्मप्रसाधनमिति चानुशासनात् । तत्र चित्तप्रसाद एकं परिकर्म, प्रसादश्च विषयकालुष्यराहित्यं । प्रसादे च हेतवः सुखितेषु मैत्री, दुःखितेषु करुणा, पुण्यशीलेषु हर्षः, पापशीलेषु उपेक्षा इत्येवमादयो रागद्वेषनिवर्त्तनोपायाः । तदुक्तं गीतायाम्—

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ इति ।

प्राणायामश्च चित्तप्रसादस्य द्वितीय उपाय इति । परिकर्मान्तरं च विषयवती प्रवृत्तिः । विषया गन्धादयः तन्मात्ररूपाः । अल्पेनाभ्यासयोगेन तत्साक्षात्कारो विषयवती प्रवृत्तिरुच्यते । तत्र नासाग्रे चित्तधारणया अल्पेनैव कालेन जायते या दिव्यगन्धसंवित् सा गन्धप्रवृत्तिः । एवं जिह्वाग्रे रससंवित् । तालुनि रूपसंवित् । जिह्वाया मध्ये स्पर्शसंवित् । जिह्वामूले शब्दसंवित् । एतत्सर्वं शास्त्रप्रामाण्यादवधारणीयम् । एतासां च प्रवृत्तीनां विवेकपर्यन्तयोगभूमिषु श्रद्धातिशयद्वारा चित्तस्थैर्यहेतुत्वं स्थैर्यसंस्कारद्वारा त्वैहिकस्य हि शास्त्रीयार्थस्य साक्षात्कारे सति सर्वत्रैव शास्त्रार्थे श्रद्धावृद्ध्या स्थैर्यसंस्कारेण च चित्तस्थैर्यं युक्तमिति ।

तृतीयं परिकर्म विशोका ज्योतिष्मती । विगतः शोको यस्यामिति विशोका । यतश्च विशोका अतो ज्योतिष्मतीनाम्नी प्रवृत्तिश्चित्तस्थैर्यहेतुर्भवति । ज्योतिष्मती च द्विविधा प्रवृत्तिः । बुद्धिसाक्षात्कारो विविक्तपुरुषसाक्षात्कारश्च । तयोश्च प्रकाशबाहुल्यात्तद्विषयकप्रवृत्त्योर्ज्योतिष्मतीत्वम् । ननु आत्मसाक्षात्कारानन्तरं चित्तस्थैर्यस्य किं प्रयोजनम् अविद्यानिवृत्त्या कृतकृत्यत्वादिति चेन्न जातेऽप्यात्मसाक्षात्कारे अखिलसंस्कारदाहकासंप्रज्ञातार्थिनः परवैराग्यार्थं संप्रज्ञातपरम्पराया अपेक्षितत्वात् जीवात्मसाक्षात्कारोत्तरमपि परमात्मसाक्षात्कारार्थिनः परमात्मयोगापेक्षणाच्चेति ।

चतुर्थं तु परिकर्म विरक्तचित्तचिन्तनम् । यदा हि विरक्ते नारदादिचित्ते चित्तं समाधीयते तदा तद्वदेव ध्यातृचित्तमपि विरक्तं स्थिरस्वभावं भवति । यथा कामुकचिन्तया चित्तं कामुकं भवतीति ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चमं परिकर्म स्वप्ननिद्रान्यतरज्ञानचिन्तनम् । यदा हि जाग्रद्ज्ञाने स्वप्नज्ञानदृष्टिः क्रियते स्वरूपावारकत्वसाम्यात् भङ्गुरविषयकत्वसाम्याच्च तदा तत्र विरक्तं सच्चित्तं स्थिरं भवति । एतदर्थमेव श्रुतिस्मृत्योः स्वप्नार्थेन प्रपञ्चो निरूप्यते **दीर्घस्वप्नमिमं विद्धी**त्यादिभिः । तथा यदा जाग्रत्पुरुषेषु सुषुप्तिदृष्टिः क्रियते स्वरूपावरणसाम्यात् निद्रादोषेणान्तरान्तरा स्वप्नदर्शनवदन्तरान्तरैव जगद्दर्शनाच्च तदा तेषां व्यवहारेषु विरक्तं सच्चित्तं स्थिरं भवति । तथा च स्मर्यते—

यथा सुषुप्तः पुरुषो विश्वमात्मनि पश्यति ।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थिते ॥

एवं जागरणादीनि जीवस्थानानि चात्मनः ।
मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ इत्यादिकमिति ।

षष्ठं परिकर्म यथाभिमतध्यानम् । स्वाभिलषितहरिहरमूर्त्त्यादौ ध्यानम् । चित्तस्य रूपादिरागात्तत्र स्थितस्यान्यत्रापि विवेकपर्यन्ते स्थितियोग्यता भवतीति । एतानि परिकर्माण्युक्तानि । एतेषु चिन्तारूपाणां परिकर्मणामनुष्ठाने इच्छाविकल्प इति । तदेवं योगद्वयसाधारणं साधनमभ्यासवैराग्याख्यमुक्तम् । अभ्यासस्य च साधनं परिकर्मोक्तम् । तत्रायमवान्तरविभागो ग्रहीतृग्रहणग्राह्यरूपषड्विंशतितत्त्वाभ्यासो वशीकाराख्यमपरं वैराग्यं च सम्प्रज्ञातयोगसाधनम् । तत्र च वैराग्यं साक्षादेव वृत्तिनिरोधकारणम् । अभ्यासस्तु समाधिरूपाङ्गद्वारा । असम्प्रज्ञाते तु परवैराग्यमेव साक्षात्कारणम् वैराग्यरूपस्यैव ज्ञानस्याभ्यासस्तु वैराग्यनिष्पत्तिद्वारा कारणम् । परवैराग्यं च निष्पन्नतया विवेकख्यातावपि दुःखात्मिकायामलंबुद्धिरित्युक्तम् । सालम्बनस्त्वभ्यासो विवेकसाक्षात्कारद्वारैव असम्प्रज्ञातकारणं न साक्षादिति दिक् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्युत्तमाधिकारिणो योगसाधननिरूपणम् ॥

अथ मध्यमाधिकारिणो युञ्जानस्य वानप्रस्थादेः प्रकृष्टक्रिया-योगरूपं योगसाधनं निरूप्यते । तस्य च क्रियायोगो मुख्यतः साधनम् । अभ्यासवैराग्यादिकं तु यथाशक्तितोऽनुष्ठेयम् । प्रकृष्टक्रियायोगश्च तपःस्वाध्यायेश्वरप्रणिधानानि । तत्र तपः शास्त्रोक्तव्रतेन शीतोष्णादिद्वन्द्व-सहनम् । स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवादिजपो वा । ईश्वरप्रणिधानं त्वत्र परमगुरौ सर्वकर्मार्पणं तत्फलसन्न्यासो वा भाष्य-कारैस्तथा व्याख्यातत्वादिति । अर्पणशब्दार्थश्च स्मृतिषूक्तः । यथा—

ज्ञानतोऽज्ञानतो वापि यत्किंचित् कुरुते नरः ।
तत् सर्वं भगवानेव कुरुते योगमायया ॥

नाहं कर्ता सर्वमेतद् ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥

इत्यादिना कर्मफलार्पणं च कर्मफलानां परमेश्वरो भोक्तेति चिन्तनम् । **ऋतं पिबन्तावित्यादिश्रुतिभिः** परमेश्वरस्यापि भोगसिद्धेः । **अनश्नन्नन्यो अभिचाकशीतीति** श्रुत्या चाभिमानपूर्वकस्य मुख्य-भोगस्यैव परमेश्वरे प्रतिषेधात् । यदेव जीवान् कर्मफलानि भोजयन् परमेश्वरः प्रीणाति तदेव परमेश्वरस्य कर्मफलभोगः । यथाऽर्थिभ्यो धनानि प्रयच्छन् दाता तद्धनभोक्ता तद्वन्न तु साक्षादेव कर्मफलं स्वर्गनरकादि-कमीश्वरो भुङ्क्ते श्रुतिस्मृतिविरोधात् । यद्यपीश्वरस्य नित्यानन्दभोगो नित्य एव तथापि जीवानां कर्मफलप्रदानेन अभिव्यक्ततया ह्यैश्वर्यानुगता-नन्दभोगस्योत्पत्तिरौपचारिकी सिसृक्षोरुत्पत्तिवदिति । क्रियायां च योगशब्दो योगसाधनत्वाद्भक्तिज्ञानयोरिव गौणः । तस्य च क्रियायोगस्य योगवत् क्लेशतनूकरणमपि फलं भवति । **समाधिभावनार्थः क्लेश-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तूनकरणार्थश्चेति सूत्रात् । तत्र च समाधिशब्दोऽङ्गाङ्गिनोरभेदेन योगद्वयवाची । तत्र योगद्वयं प्रागेव व्याख्यातम् । क्लेशतनूकरणं तु सफलं व्याख्यायते । तत्र दुःखाख्यक्लेशनिदानत्वात् क्लेशाः पञ्च । अविद्याऽस्मितारागद्वेषाभिनिवेशा इति । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या । आत्मानात्मनोर्धर्मतः स्वतश्चात्यन्तमभेदभ्रमोऽस्मिता । अविद्या तु भेदाभेदं सहत इति विशेषः । रागद्वेषौ च प्रसिद्धावेव । अभिनिवेशस्तु मरणादिभयम् । एतेषामुत्तरोत्तरेषु पूर्वं पूर्वं कारणम् । अतोऽविद्या सर्वक्लेशानां मूलत्वात् क्षेत्रमुच्यते । अविद्यासत्त्व एवैते भवन्ति । अविद्यानाशाच्चैतेषां नाश इति । एते च क्लेशा व्याध्यादिवच्चित्तविक्षेपकत्वाद्योगस्यापि विरोधिनः । एतेषां तनुत्वं च विवेकख्यातप्रतिबन्धाक्षमता । तच्च क्रियायोगस्य दृष्टादृष्टद्वारा फलं भवति । क्रियायोगेन हि चित्तशुद्धिः क्रियते । ततश्चाधर्माख्यकारणतानवादविद्यादेरपि तनुता भवति । तथाभिमानरागद्वेषादिप्राबल्ये क्रियायोगो न संभवति । संभवे वाङ्गविकल्पो भवति । अतः क्रियायोगः स्वनिष्पत्तये क्लेशतानवमपि संपादयतीति । एवं योगोऽपि । क्रियायोगस्य दृष्टादृष्टोभयद्वारा फलं बोध्यम् । सत्त्वशुद्धिरदृष्टं द्वारम् दृष्टं तु द्वारं चित्तस्य कर्मद्वारा नियमनादिकमिति ॥

इदानीं क्लेशतानवस्य मोक्षपर्यन्तं फलं सूत्रगणोक्तं संकलय्य कथ्यते । क्रियायोगेन क्लेशतानवे सति अन्तरान्तरा क्लेशैरप्रतिबद्धो विवेकख्यातिप्रवाहः साक्षात्कारपर्यवसायी भवति । ततश्चाविद्यादिक्लेशाः प्रसङ्ख्यानाख्येन विवेकसाक्षात्कारेण अग्निना दग्धबीजकल्पाः प्ररोहसमर्था न भवन्ति । इयं जीवन्मुक्तावस्था । ततश्च प्रारब्धसमाप्तौ चित्ते प्रलीयमाने ते दग्धबीजकल्पा अप्यनागतावस्थाः सूक्ष्मक्लेशा अत्यन्तं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रलीयन्ते । तन्निवृतौ पुनर्जन्मकारणाभावात् पुरुषः पुनरिदं दुःखं न भुङ्क्ते इति परममुक्तिरिति । ननु अनागतावस्थानामपि क्लेशानां ज्ञाननाश्यत्वमेव युक्तं किमिति कार्याक्षमतारूपदाहः कल्प्यत इति चेत् । उच्यते । कार्याणामनागतावस्थैव कारणस्य शक्तिरुच्यते । तां च विहाय कारणं न तिष्ठति अग्न्यादौ दाहादिशक्तेर्यावद्द्रव्यभावित्वात् । अतः क्लेशकर्म-संस्कारादीनामनागतावस्थानां बीजशक्तिदाहकत्वमेव ज्ञानादिभिः क्रियते न त्वतीतावस्थानाम् । तासां तु चित्तनाशादेव भवति, धर्मिनाशस्य धर्मनाशकत्वादिति ।

अथ कथमविद्यादिक्लेशाद्बन्धः कथं वा तन्निवृत्त्या मोक्ष इति तयोः प्रकारः कथ्यते । अविद्यादिक्लेशेभ्य एव धर्माधर्मौ जायेते ।

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥

इत्यादि स्मृतेः । धर्माधर्माभ्यां च जन्मायुर्भोगरूपा विपाका जायन्ते । तेभ्यश्च सुखदुःखे । ततश्च पुरुषस्य तद्भोगरूपो बन्ध इति । विपाकमध्ये च भोगः शब्दाद्याकारा वृत्तिरिति भेदः । ननु क्लेशानां दुःखाख्यहेयहेतुत्ववत् स्वर्गादिसुखहेतुत्वमपि धर्मादिद्वाराऽस्ति तत्कथं क्लेशा उन्मूलनीया इति । उच्यते । स्वर्गादिसुखमपि दुःखप्रचुरत्वा-दुःखानुबन्धित्वाच्च दुःखमेव विवेकिना मन्तव्यम् । तथा च साङ्ख्य-सूत्राण्यपि यथा **दुःखाद्वेषः पुरुषस्य न तथा सुखादभिलाषः कुत्रापि कोऽपि सुखीति । तदपि दुःखबहुलमिति दुःखपक्षे निक्षिपन्ते विवेचका** इति । सोऽयमविद्यातो बन्धप्रकारः कौर्मेऽप्युक्तः—

रागद्वेषादयो दोषाः सर्वे भ्रान्तिनिबन्धनाः ।
कार्यो ह्यस्य भवेद्दोषः पुण्यापुण्यमिति श्रुतिः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्वशादेव सर्वेषां सर्वदेहसमुद्भवः ॥ इति ।

क्लेशेभ्यो बन्धप्रकार उक्तः । क्लेशनिवृत्तितो मोक्षप्रकार उच्यते । आत्मानात्मविवेकसाक्षात्कारादविद्यानिवृत्त्या तन्मूलकानां क्लेशान्तराणामपि निवृत्तिः । ततश्च कारणाभावाद्धर्माधर्मानुत्पत्तिः अनारब्धफलकानां चोत्पन्नकर्मणां फलानुत्पादः क्लेशाख्यसहकार्युच्छेदात् । आरब्धफलकर्मणां च भोगेनैव नाशः । ततः प्रारब्धसमाप्त्या देहपाते कारणाभावान्न पुनर्जन्म । तदेव च दुःखनिवृत्तिरूपो मोक्ष इति । तदेवं चिकित्साशास्त्रवदेव चतुर्व्यूहप्रतिपादकं साङ्ख्ययोगादिमोक्षशास्त्रम् । यथाहि रोगो रोगनिदानम् आरोग्यं भैषज्यमिति चत्वारो व्यूहाश्चिकित्साशास्त्रस्य प्रतिपाद्या भवन्ति । एवमत्रापि हेयं हेयहेतुर्हानं हानोपाय इति चत्वारो व्यूहाः प्रतिपाद्याः । तत्र हेयं दुःखम् । हेयहेतुरविद्या । हानं दुःखात्यन्तनिवृत्तिः । हानोपायो विवेकसाक्षात्कार इति । उपकरणानां ग्रहणाय सर्वत्र व्यूहपदमावश्यकम् । ननु पुरुषस्य नित्यनिर्दुःखत्वात् कथं दुःखहानिः पुरुषार्थ इति चेत् । न । भोग्यत्वरूपस्वत्वसम्बन्धेनैव दुःखहानस्य साङ्ख्यादिमते पुरुषार्थत्वात् । यद्यपि भोगः साक्षात्काररूपतया स्वरूपतो नित्य एव तथापि घटाकाशवद्दुःखभोगस्यानित्यतया तन्निवृत्तिः पुरुषार्थः स्यादेव दुःखभोगस्य दुःखप्रतिबिम्बावच्छिन्नचित्स्वरूपत्वादिति । अत्राविद्याया हेयहेतुतायां द्वारतया द्रष्टृदृश्यसंयोगरूपं जन्म व्याख्याय सूत्रभाष्याभ्यामनेनैव प्रसङ्गेन द्रष्टृदृश्ययोः पुंप्रकृत्योः स्वरूपं प्रपञ्चितम् । मयापि वार्त्तिके साङ्ख्यभाष्ये च प्रपञ्चितम् । साङ्ख्यसाराख्ये साङ्ख्यप्रकरणे त्वस्माभिर्विस्तरतः प्रकृतिपुरुषौ विवेचितावतो विस्तरभयान्नेह प्रकरणे प्रस्तूयेते । इति मध्यमाधिकारिणां योगसाधननिरूपणम् तत्प्रसङ्गेन क्रियायोगस्य क्लेशतानवद्वारा मोक्ष-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

हेतुताया निरूपणं च ।

अथ मन्दाधिकारिणो योगमारुरुक्षोर्गृहस्थादेर्योगसाधनान्युच्यन्ते । तानि च यथोक्तस्य ज्ञानस्यापि साधनानीत्याशयेन सूत्रभाष्याभ्यां विवेकख्यातिसाधनविधयैव निर्दिष्टानि । तानि च यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इति । एतान्यष्टौ योगाङ्गानि भवन्ति । मन्दाधिकारिभिर्धारणादिरूपोऽभ्यासो यमनियमादिरूपः समग्रक्रियायोगश्च यथाक्रममनुष्ठेय इत्याशयेन पिण्डीकृत्य सर्वमेव मन्दाधिकारिभ्य उपदिश्यते । तत्रादौ यमनियमाद्यनुष्ठानं केवलं कर्मयोग उच्यते । उत्तममध्यमयोश्च केवलज्ञानसमुच्चितज्ञानकर्मणी प्रागेवोक्ते । तत्र च ज्ञानकर्मणोः प्रत्येकसमुच्चयानुष्ठाने प्रमाणं विष्णुपुराणम् । यथा—

सनकसनन्दनादयो ब्रह्मभावनया युताः ।
कर्मभावनयान्ये च देवाद्याः स्थावराश्चराः ॥
हिरण्यगर्भादिषु च कर्मब्रह्मोभयात्मिका ॥ इति ।

तत्र यमनियमौ सूत्रभाष्याभ्यां प्रदर्शितौ ईश्वरगीतावाक्यैरेवात्र प्रदर्श्यते । यथा—

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
यमाः सङ्क्षेपतः प्रोक्ताश्चित्तशुद्धिप्रदा नृणाम् ॥

कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
अक्लेशजननं प्रोक्ता त्वहिंसा परमर्षिभिः ॥

अहिंसायाः परो धर्मो नास्त्यहिंसापरं सुखम् ।
विधिना या भवेद्धिंसा सा त्वहिंसैव कीर्तिता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्येन सर्वमाप्नोति सत्ये सर्वं प्रतिष्ठितम् ।
यथार्थकथनाचारः सत्यं प्रोक्तं द्विजातिभिः ॥

परद्रव्यापहरणं चौर्याद्वाथ बलेन वा ।
स्तेयं तस्यानाचरणादस्तेयं धर्मसाधनम् ॥

कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।
सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥

द्रव्याणामप्यनादानमापद्यपि यथेच्छया ।
अपरिग्रह इत्युक्तस्तं प्रयत्नेन पालयेत् ॥

तपःस्वाध्यायसन्तोषाः शौचमीश्वरपूजनम् ।
समासान्नियमाः प्रोक्ता योगसिद्धिप्रदायिनः ॥

उपवासपराकादिकृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं प्राहुस्तापसास्तप उत्तमम् ॥

वेदान्तशतरुद्रीयप्रणवादिजपं बुधाः ।
सत्त्वशुद्धिकरं पुंसां स्वाध्यायं परिचक्षते ॥

स्वाध्यायस्य त्रयो भेदा वाचिकोपांशुमानसाः ।
उत्तरोत्तरवैशिष्ट्यं प्राहुर्वेदार्थवादिनः ॥

यः शाब्दबोधजननः परेषां शृण्वतां स्फुटम् ।
स्वाध्यायो वाचिकः प्रोक्त उपांशोरथ लक्षणम् ॥
ओष्ठयोः स्पन्दमात्रेण परस्याशब्दबोधकः ।
उपांशुरेष निर्दिष्टः साहस्त्रो वाचिकाज्जपः ॥
यत्पदाक्षरसङ्गत्या परिस्पन्दविवर्जितम् ।
चिन्तनं सर्वशब्दानां मानसं तं जपं विंदुः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यदृच्छालाभतो नित्यमलं पुंसो भवेदिति ।
या धीस्तामृषयः प्राहुः सन्तोषं सुखलक्षणम् ॥
बाह्यमाभ्यन्तरं शौचं द्विधा प्रोक्तं द्विजोत्तमाः ।
मृज्जलाभ्यां स्मृतं बाह्यं मनःशुद्धिरथान्तरम् ॥
स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः ।
सुनिश्चला शिवे भक्तिरेतदीश्वरपूजनम् ॥ इति ।

अत्र यद्वैधहिंसाया अहिंसात्वमुक्तं तच्छौचाचमनाद्यपरिहार्य-हिंसापरं गृहस्थादिकर्तव्यहिंसापरं वा । भाष्यकारैर्यज्ञादिषु हिंसाया अपि त्यागस्तु महाव्रतत्वेन विहितः । भाष्यकारोक्तं चेश्वरप्रणिधानं सर्वकर्मार्पणरूपमीश्वरगीतोक्तपूजनादीनामुपलक्षणमिति । अनयोर्यमनियमयोर्मध्ये यमानां निवृत्तिमात्रतया देशकालाद्यपरिच्छिन्नत्वसम्भवेन तन्निमित्तिका महाव्रतसंज्ञा सूत्रकारेणोक्ता । नियमानां तु प्रवृत्तिरूपतया देशकालादिनियन्त्रितत्वेन नास्ति महाव्रतत्वरूपोऽवान्तरविशेषः इति । यमनियमौ व्याख्यातौ ।

आसनं व्याख्यायते । तत्र यावत्यो जीवजातयस्तासामुपवेशनेषु संस्थानविशेषाः सर्व एव आसनानि भवन्ति । तेषु मुख्यानि त्रीण्यासनानि ईश्वरगीतादिषूक्तानि । यथा—

आसनं स्वस्तिकं प्रोक्तं पद्ममर्द्धासनं तथा ।
आसनानां तु सर्वेषामेतदासनमुत्तमम् ॥
ऊर्वोरुपरि विप्रेन्द्राः कृत्वा पादतले उभे ।
समासीतात्मनः पद्ममेतदासनमुत्तमम् ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एकपादमथैकस्मिन् विन्यस्योरुणि सत्तमाः ।
आसीताद्धासनमिदं योगसाधनमुत्तमम् ॥
उभे कृत्वा पादतले जानूर्वोरन्तरेण हि ।
समासीतात्मनः प्रोक्तमासनं स्वस्तिकं परम् ॥ इति

आसनस्य प्रपञ्चस्त्वत्र राजयोगप्रकरणत्वान्न क्रियते । आसन-नाडीशुद्ध्यादयस्तु हठयोगादिग्रन्थेष्वशेषविशेषतो द्रष्टव्याः । आसनं व्याख्यातम् ।

प्राणायामो व्याख्यायते । रेचकः पूरकः कुम्भकश्चेति त्रिविधः प्राणायामः । केवलकुम्भकश्चतुर्थः प्राणायामः । तदुक्तं नारदीये–

रेचकः पूरकश्चैव कुम्भकः शून्यकस्तथा ।
एवं चतुर्विधः प्रोक्तः प्राणायामो मनीषिभिः ॥
जन्तूनां दक्षिणा नाडी पिङ्गला परिकीर्तिता ।
सूर्यदैवतका चैव पितृयोनिरिति स्मृता ॥
देवयोनिरिति ख्याता इडा नाडी तु वामगा ।
तत्राद्यदैवतं चन्द्रः शृणुध्वं गदतो मम ॥
एतयोरुभयोर्मध्ये सुषुम्ना नाडिका स्मृता ।
अतिसूक्ष्मा गुह्यतमा ज्ञेया सा ब्रह्मदैवता ॥
वामेन रेचयेद्वायुं रेचनाद्रेचकः स्मृतः ।
पूरयेद्दक्षिणेनैव पूरणात् पूरकः स्मृतः ॥
स्वदेहे पूरितं वायुं निगृह्य न विमुञ्चति ।
सम्पूर्णकुम्भवत् तिष्ठेत् कुम्भकः स हि विश्रुतः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

न गृण्हाति त्यजति न वायुमन्तर्बहिःस्थितम् ।
ज्ञेयं तच्छून्यकं नाम प्राणायामं यथास्थितम् ॥ इति ।

याज्ञवल्क्यादौ च–

पूरकः कुम्भकश्चैव रेचकस्तदनन्तरम् ।
प्राणायामस्त्रिधा ज्ञेयः कनीयो मध्यमोत्तमः ॥

द्वादशमात्रः कनीयान् मध्यमो मात्राचतुर्विंशः ।
उत्तमः षट्त्रिंशन्मात्रो मात्राभेदाः स्मृतास्तज्ज्ञैः ॥

इत्याद्युक्तम्। अत्र प्राणायामस्य पूरकादिक्रमकथनान्नारदाद्युक्तो रेचकादिक्रमो वैकल्पिक इति। अस्मिंश्चतुर्विधप्राणायामे सूत्रकारेणायं विशेष उक्तः। आदौ यत्सहितं त्रयमभ्यस्यते तच्च देशकालसङ्ख्याभिरवधृतं भवति तदा दीर्घसूक्ष्मसंज्ञकं भवति। तत्र रेचकस्य देशो नासिकाग्राद्बहिर्द्वादशाङ्गुलादिः स च ईर्षिका तूलादिक्रियया निश्चेयः। पूरकस्य चामस्तकमापादतलमाभ्यन्तरो देशः। स च पिपीलिकास्पर्शतुल्यस्पर्शेन निश्चेयः। कुम्भकस्य च रेचकपूरकयोर्बाह्याभ्यन्तरदेशौ समुच्चितावेव विषयः उभयत्रैव प्राणस्य वृत्तिनिरोधात्। स चोक्तलिङ्गद्वयानुपलब्ध्या निश्चेयः। एवं देशेनावधृतो व्याख्यातः। कालेनावधृतो यथा एतावत्क्षणं रेचकः कर्तव्यः एतावत्क्षणं पूरकः कर्तव्यः एतावत्क्षणं कुम्भकः कर्तव्य इत्येवमङ्गीकृतकालैरवधृत इति। सङ्ख्याभिरवधृतस्तु यथा मात्राणां द्वादशादिसङ्ख्यात्रयेणावधृत इति। अत्र देशादित्रयाणां प्राणायामपरिच्छेदकत्वे विकल्प एव न तु समुच्चयः केवलमात्राभिरपि प्राणायामपरिच्छेदस्य बहुशः स्मरणादिति। एवमभ्यासक्रमेण यदा देशकालसङ्ख्याभिरपरिच्छेद्यौ रेचकपूरकौ विनैव माससंवत्सरादिस्थायी बहुदेशस्थायी कुम्भको भवति स केवलकुम्भकश्चतुर्थः प्राणायामः। तस्मिन् सति आकाशगमनादिसिद्धयो जायन्ते। तदुक्तं वसिष्ठसंहितायाम्–

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रेचकं पूरकं त्यक्त्वा सुखं यद्वायुधारणम् ।
प्राणायामोऽयमित्युक्तः स वै केवलकुम्भकः ॥

सहितं केवलं वापि कुम्भकं नित्यमभ्यसेत् ।
यावत् केवलसिद्धिः स्यात् तावत् सहितमभ्यसेत् ॥

केवले कुम्भके सिद्धे रेचपूरकवर्जिते ।
न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते ॥

इत्यादिभिरिति । प्राणायामे च मात्रा मार्कण्डेयपुराणादिषूक्ता—

निमेषोन्मेषणे मात्रा तालो लघ्वक्षरं तथा ।
प्राणायामस्य सङ्ख्यार्थं स्मृता द्वादशमात्रिका ॥

इत्यादिभिः मात्राप्रमाणम् द्वादशमात्रिका द्वादशगुणिता । इदं च द्वादशमात्रिकत्वं त्रिष्वेव सामान्यवचनात् । वसिष्ठसंहितादौ तु पूरकं षोडशमात्राभिः कुम्भकं चतुःषष्टिमात्राभिः रेचकं तु द्वात्रिंशन्मात्राभिरित्युक्तम् । अतो मुख्यकल्पनाकल्परूपेणात्र व्यवस्थेति । अन्यश्च प्राणायामे विशेषो नारदीयादिषूक्तः—

अगर्भश्च सगर्भश्च द्वितीयस्तु तयोर्वरः ।
जपध्यानं विनाऽगर्भः सगर्भस्तत्समन्वितः ॥

इत्यादिभिः । तत्र जपमन्त्र ईश्वरगीतायामुक्तः—

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह ॥
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥ इति ।

योगियाज्ञवल्क्ये तु—

मात्राप्रमाणयोगेन प्राणापाननिरोधनात् ।
ॐकारेण तु कर्तव्यः प्राणायामो यथोदितः ॥ इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

केवलप्रणवजपोऽयं परमहंसानाम् । ध्यानं च पूरकादिक्रमेण नाभिहृदयललाटेषु ब्रह्माविष्णुशिवरूपाणां(?) स्मृतिषूक्तम् । परमहंसानां तु केवलमेव ब्रह्म ध्येयमुक्तम् ।

प्रणवेन परब्रह्म ध्यायीत नियतो यतिः ।

इत्यादिस्मृतिभिरिति दिक् । इति प्राणायाम उक्तः ॥

प्रत्याहार उच्यते । नारदीये–

विषयेषु प्रसक्तानि इन्द्रियाणि मुनीश्वराः ।
समाहृत्य निगृह्णाति प्रत्याहारस्तु स स्मृतः ॥

अनिर्जित्येन्द्रियग्रामं यस्तु ध्यानपरो भवेत् ।
मूढात्मानं च तं विद्याद् ध्यानं चास्य न सिध्यति ॥ इति ।

इन्द्रियाणां निग्रहश्च वशीकरणं स्वेच्छानुविधायीकरणमिति यावत् प्रत्याहार उक्तः ॥

यमादीनि चैतानि प्रत्याहारान्तानि योगाङ्गानि देहप्राणेन्द्रियाणां निग्रहरूपाणि । इतः परं चित्तनिग्रहरूपं धारणाद्यङ्गत्रयमभ्यर्हितं वक्तव्यम्। तत्र धारणोच्यते । देशबन्धश्चित्तस्य धारणा । यत्र देशे ध्येयं चिन्तनीयं तत्र चित्तस्य स्थिरीकरणमिति यावत् । देशाश्चोक्ता ईश्वर-गीतायाम्–

हृत्पुण्डरीके नाभ्यां वा मूर्ध्नि पर्वतमस्तके ।
एवमादिप्रदेशेषु धारणा चित्तबन्धनम् ॥ इति ।

ननु मूर्त्यादियोगे देशो घटते सत्त्वपुरुषान्यतायोगे शुद्धब्रह्मयोगे वा कथं देशो घटतां ध्येयस्यापरिच्छिन्नत्वादिति चेत् अग्नेरिन्धनवत् स्वस्वो-पाधिवृत्तेरेव तदुभयदेशत्वादिति । यावत्कालावस्थित्या धारणादित्रयं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

भवति स काल ईश्वरगीतायामवधृतः—

धारणा द्वादशायामा ध्यानं द्वादशधारणाः ।
ध्यानद्वादशकं यावत् समाधिरभिधीयते ॥ इति ।

द्वादश आयामाः प्राणायामा यावत्कालेन भवन्ति तावत्काल-परिमितं चित्तस्य यथोक्तैकाग्र्यं धारणेत्यर्थः । धारणा उक्ता ।

ध्यानमुच्यते । तत्र देशे ध्येयाकारवृत्तिप्रवाहो वृत्त्यन्तराव्यवहितो ध्यानम् । यथा हृत्पुण्डरीकादौ चतुर्भुजादिचिन्तनम् बुद्धिवृत्तौ वा तद्विवेकतश्चैतन्यचिन्तनं कारणोपाधौ चेश्वरचिन्तनमिति । ईश्वरगीता-यामप्येतदेवोक्तम्—

देशावस्थितिमालम्ब्य बुद्धेर्या वृत्तिसन्ततिः ।
वृत्त्यन्तरैरसंस्पृष्टा तद्ध्यानं सूरयो विदुः ॥ इति ।

ध्यानसमाध्योरपि कालनियम उक्त एवेति । ध्यानमुक्तम् ।

समाधिरुच्यते । तदेव ध्यानं यदा ध्येयावेशवशाद्ध्यानध्येयध्यातृ-भावदृष्टिशून्यं सद्ध्येयमात्राकारं भवति तदा समाधिरुच्यते । काल-नियमश्चोक्त एव । ध्यानाच्चास्यान्योऽपि विशेषोऽस्ति । अत्यन्ताभ्य-र्हितादिविषयैरिन्द्रियसन्निकर्षे ध्यानस्य भङ्गो भवति न तु समाधेरिति । तथा च स्मर्यते ।

तदैवमात्मन्यवरुद्धचित्तो
न वेद किञ्चिद्बहिरन्तरं वा ।
यथेषुकारो नृपतिं व्रजन्त-
मिषौ गतात्मा न ददर्श पार्श्वे ॥ इति ।

अत्र समाधिलक्षणे वृत्त्यन्तरनिरोधो न विशेषणं निरोधस्याङ्गि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्वात् किन्तूपलक्षणमेवेति मन्तव्यम् । एतत्कालीनेनैव वृत्तिनिरोधेन ध्येयसाक्षात्कारो जन्यत इत्यतः समाधिः सम्प्रज्ञातयोगस्य चरमाङ्गं भवति। ननु यदि समाधिकाल एव वृत्त्यन्तरनिरोधरूपः सम्प्रज्ञातयोगो भवति तदा निरोधस्यैवाङ्गित्वे किं नियामकमिति चेत् उक्तमेव पुनः स्मार्यते । चित्तं स्वत एव सर्वार्थग्रहणसमर्थं विभुत्वात् प्रकाश-स्वभावत्वाच्च दर्पणवत् तथापि विषयान्तरावेशदोषात् अभीष्टार्थो भाव्यमानोऽपि न साक्षात्कर्तुं शक्यते अतो विषयान्तरवृत्तिनिरोध एव प्रतिबन्धकाभावरूपतया ध्येयसाक्षात्कारे साक्षात्कारणं भवति । समाधिरपि तु तत्राङ्गमेव साक्षात्कारे वृत्त्यन्तरनिरोधद्वारैव हेतुत्वादिति । तदेवं धारणादित्रयं व्याख्यातम् । एतच्च त्रयमेकस्मिन्नालम्बने वर्तमानं संयम इत्युच्यते । तस्य च संयमस्य स्थूलादिक्रमेण विविक्तपरमात्मपर्यन्तं भूमिषु विनियोगः कर्तव्यः । तस्य च भूमिषु विनियोग इति सूत्रात् ।

स्थूले विनिर्जितं चित्तं ततः सूक्ष्मे शनैर्नयेत् ॥

इति स्मृतेश्च । अयं तत्सर्ग एवेति प्रागेवोक्तम् । यतो यदीश्वर-प्रसादात् सद्गुरुप्रसादाद्वा आदावेव सूक्ष्मसूक्ष्मभूमिकायामवस्थिति-योग्यता स्वचित्तस्य दृश्यते तदा न स्थूलादिपूर्वपूर्वभूमिकया मुमुक्षुभिः कालक्षेपः कर्तव्यः । उत्तरभूमिकारोहरूपस्य पूर्वभूमिकाप्रयोजनस्यान्यत एव सिद्धेः । तथा च स्मर्यते—

सारभूतमुपासीत ज्ञानं यत् स्वार्थसाधकम् ।
ज्ञानानां बहुता यैषा योगविघ्नकरी हि सा ॥

इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत् ।
आ स कल्पसहस्रेषु नैव ज्ञेयमवाप्नुयात् ॥ इति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतोऽत्र प्रकृष्टाधिकारिणां परमात्मालम्बन एव संयमप्रकारोऽस्माभिरुदाह्रियते । सत्त्वपुरुषान्यतालम्बनस्य तु संयमस्य प्रकारांस्तच्छेषतयैव वक्ष्यामः । तत्र परमात्मसंयमे नारदीयहरिभक्तिसुधोदयस्थप्रकारः कथ्यते । यथा नारद उवाच

विलाप्य विस्तरं कृत्स्नं चिदेकरसबोधने ।
राजयोगं प्रवक्ष्यामि तं शृणुध्वं द्विजोत्तमाः ॥

वेदान्तेभ्यः सतां सङ्गात् सद्गुरोश्च स्वतस्तथा ।
ज्ञेयोऽन्तः प्रकृतेरन्य आत्मा सम्यङ्मुमुक्षुभिः ॥

इत्यात्मानं दृढं ज्ञात्वा सङ्गं सर्वं ततस्त्यजेत् ।
अद्वैतसिद्धौ यततामन्यसङ्गो ह्यरिः स्फुटम् ॥

एकान्ते स्वासनो धीरः शुचिर्दक्षः समाहितः ।
यतेतोपनिषद्दृष्टमायाभिन्नात्मदर्शने ॥

पराक्प्रवृत्ताक्षगणं योगी प्रत्यक् प्रवाहयेत् ।
रुध्वा मार्गं तदत्यन्तं मुक्तास्त्रौघमिवार्जुनः ॥

स्थापयित्वा पदेऽक्षाणि स्वे स्वेऽन्तस्तु मनः शनैः ।
निवृत्तसैन्यं राजानं वेश्मेवान्तः प्रवेशयेत् ॥

अन्तःस्थिते च मनसि न चलन्तीन्द्रियाण्यपि ।
अभ्राणि स्तिमितानीव चोदकेऽन्यगतेऽनिले ॥

ततो वपुरहङ्कारबुद्धिभ्योऽन्ये चिदात्मनि ।
तासां प्रवर्तयितरि स्वात्मनि स्थापयेन्मनः ॥

मुधा कर्तृत्वभोक्तृत्वमानिनं तमथामलम् ।
सर्वात्मनि चिदानन्दघने विष्णौ सुयोजयेत् ॥

Ganesh Vami Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सलिले करकाश्मेव दीपोऽग्नाविव तन्मयः ।
जीवो मौढ्यात् पृथग्बुद्धौ युक्तो ब्रह्मणि लीयते ॥

अयं च जीवपरयोर्योगो योगाभिधो द्विजाः ।
सर्वोपनिषदामर्थो मुनिगोप्यः परात्परः ॥

एवं ब्रह्मणि युक्तात्मा सन्निरन्तरचिद्रसः ।
आसीताभ्यन्तरं बाह्यं विलाप्य जगदात्मनि ॥

क्रमाद्विलापयन्नेव कठिनांशोपमं जगत् ।
विस्तरं स्वात्मविद्योगी निर्विशेषं विलापयेत् ॥

एवं सततयुक्तात्मा क्रमाद्विष्णुमयो भवेत् ।
न हि सैन्धवशैलोऽपि क्षणादम्बुमयो भवेत् ॥

व्युत्थितोऽपि जगत् कृत्स्नं विष्णुरेवेति भावयन् ।
निर्ममो निरहङ्कारश्चरेच्छिथिलसंसृतिः ॥

एवं सततमभ्यासाल्लीनबुद्धेः परात्मनि ।
कर्माणि बुद्धिपूर्वाणि निवर्तन्ते स्वतो द्विजाः ॥

पूर्वाभ्यासबलात् कार्यो न लौक्यो न च वैदिकः ।
अपुण्यपापः सर्वात्मा जीवन्मुक्तः स उच्यते ॥

तद्देहपाते च पुनः सर्वगो न स जायते ।
एवमद्वैतयोगेन विमुक्तिर्वो मयोदिता ॥ इति ।

एतेषां वाक्यानां कठिनांशो व्याख्यायते । आदौ वेदान्तेभ्य आत्मानात्मसामान्यं सविकारप्रकृतितो विवेकेनावधार्यमिति । एवं साधनैरात्मानं दृढं ज्ञात्वा श्रवणमननाभ्यां निश्चित्य ततः सर्वसङ्गं त्यजेत् । योगेनात्मसाक्षात्काराय परमहंसाश्रमी भवेत् । अद्वैतसिद्धिर्वक्ष्यमाणा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्वितीयसाक्षात्कारः कैवल्यनिष्पत्तिर्वा । संन्यस्य यत्कार्यं तदाह—**एकान्त इति । उपनिषद्दृष्ट** उपनिषत्सु श्रुतः । **मायाभिन्नः** प्रकृतिविविक्तः । अथवा मायाशब्देनात्र जीवात्मा विवक्षितः । ततोऽपि विवेकेनात्र परमात्मन एव ज्ञेयतया वक्ष्यमाणत्वात् परमात्मावरकत्वेन जीवेऽपि मायाशब्दप्रयोगौचित्याच्च । यत्प्रकारमाह—**परागित्यादिना** । पराक् बहिः । प्रत्यक् अन्तरं तन्मार्गं बहिर्मार्गम् । अनेन श्लोकेन प्रत्याहार एवोक्तः । यमादयः प्राणायामान्ताश्च बहिरङ्गत्वेन अनावश्यकत्वादत्र नोक्ताः । अथवा **एकान्ते स्वासनो** धीर इत्यादिवाक्येनैव संक्षेपाद्य-माद्यङ्गचतुष्कमुक्तम् । प्रत्याहारमुक्त्वा संयमप्रकारमाह—**ततो वपुरित्यादिद्वाभ्याम्** । अत्र प्रथमश्लोकेनान्तर्यामिणः परमात्मनो देशे जीवात्मनि चित्तस्थापनरूपा धारणा प्रोक्ता । **मुधेत्यादिश्लोकेन** च ध्यानसमाधी संक्षेपेणोक्तौ । तस्यार्थः । **तं** जीवात्मानं **मुधा** वृथा कर्तृत्वभोक्तृत्वादिषु स्वातन्त्र्याभिमान**ममल**मुपाधिविविक्तत्वाच्छुद्धं सर्वेषां यथोक्तानां देहादिजीवान्तानामात्मनि परमात्मनि स्वोपाधिविविक्ते **सुयोजयेत्** विलापयेत् । प्रलीनाखिलजीवकं परमात्मानं चिन्तयेदिति । ज्ञेयत्वोपपादनाय प्रलयस्यैव तात्त्विकत्वं दृष्टान्तेनाह—**सलिल इति** । जीवो लोकैर्मोहादेव परमात्मनः पृथग्बुद्धौ विभक्ततया ज्ञायते । विभागस्य नैमित्तिकत्वेन अल्पकालावस्थायित्वादिना च विकारवद्व्यवहारम्भण-मात्रत्वात् । तत्त्वतस्तु **जीवो युक्तो** योगाख्यसाधनवान् सलिलादौ करका इव ब्रह्मणि लीयते यतस्तन्मयः तत्कार्य इत्यर्थः । शेषं स्पष्टप्रायमिति दिक् ।

तदेवमष्टौ योगाङ्गान्युक्तानि । तत्राङ्गतायामयं विशेषः सूत्र-कारेणोक्तः । प्रत्याहारपर्यन्तपञ्चाङ्गापेक्षया धारणादित्रयं सम्प्रज्ञातयोगस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्तरङ्गं भवति । पञ्चाङ्गानां प्रायशो देहप्राणेन्द्रियसंस्काररूपत्वात् । धारणादित्रयस्य तु योगाश्रयचित्तसंस्कारत्वात् । किं च पञ्चाङ्गानामभावेऽपि प्राग्भवीयैर्तैः कदाचिद्योगो भवति धारणादित्रयस्य तु सहभावेनैव अङ्गतया तेन विना योगो न जायत इति । तदेवं धारणादित्रयमन्तरा असम्प्रज्ञातस्य निरालम्बनत्वात् । जन्मान्तरीयेण धारणादिनौत्पत्तिक-ज्ञानवैराग्याणां देवविशेषाणां भवप्रत्ययासम्प्रज्ञातयोगस्योक्तत्वाच्चेति दिक् ॥

इति विज्ञानभिक्षुविरचिते योगसारसंग्रहे योगसाधननिरूपणं द्वितीयोंऽशः ॥

तृतीयोंऽशः

अतः परं संयमसिद्धयो वक्तव्याः । सिद्धिकामानां ज्ञानादिप्रति-बन्धकतृष्णोपशमाय तत्तत्संयमनिष्पत्त्यवधारणाय च । तथा मुमुक्षूणां हेयत्वप्रतिपादनाय । तथा च सर्वसिद्धान्ते सूत्रम्—**तद्वैराग्यादपि दोष-बीजक्षये कैवल्यमिति** । अत्र विषयभेदेन अनन्तानां संयमानाम् अनन्ताः सिद्धयः । तासु कियत्य एव सूत्रभाष्याभ्यामुक्ताः । अस्माभिस्तु ग्रन्थ-बाहुल्यभिया ताभ्योऽपि समुद्धृत्य सारतरा एव सिद्धय उच्यन्ते । तत्र संयमविषयसाक्षात्कारा एव संयमसिद्धितयात्र कथ्यन्ते । संयमानां स्वस्वविषयसाक्षात्कारहेतुताया सामान्यत एव लब्धत्वात् **क्षीणवृत्तेर-भिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिरिति** सूत्रेण । तथा **भुवनज्ञानं सूर्ये संयमादित्यादिसूत्रेषु** अन्यविषयकसंयम-सिद्धितया अन्यज्ञानादेः कथनाच्च । किं तु स्वविषयसाक्षात्कारपर्यन्तस्य संयमस्य विषयान्तरज्ञानादिरेव सिद्धितया कथ्यत इति मन्तव्यम् । अन्यविषयकसंयमस्य प्रतिनियतान्यपदार्थज्ञानादिकं योगजधर्मद्वारा भवति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यज्ञविशेषात् स्वर्गविशेषवदिति । तत्र यस्मात् संयमादात्मसाक्षात्काररूपा सिद्धिर्भवति तदुभयमेवाभ्यर्हित्वादादावुच्यते । तत्र सूत्रम् । **सत्त्व-पुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थत्वात् स्वार्थ-संयमात् पुरुषज्ञानमिति**। भोगमध्ये बौद्धप्रत्ययविवेकेन पौरुषप्रत्यये संयमः कर्त्तव्य इत्याशयेन भोगोऽप्यत्र लक्ष्यते । तथा चायमर्थः । सत्त्वमुपाधिः कार्यकारणसाधारणः । पुरुषस्तद्वति साक्षी जीवेश्वर-साधारणः । तयोरत्यन्तासंकीर्णयोस्तमःप्रकाशवदत्यन्तविधर्मयोरपि यः परस्परप्रतिबिम्बवशात् प्रत्ययाविशेषः प्रत्ययोर्विवेकाग्रहणमेकत्वभ्रमो वा शब्दाद्याकारवृत्तिरेव ज्ञानमित्येवं तप्तायःपिण्डवदेकतावृत्तिरूपः स भोगो मुख्य इति विशेषः। तथा च भाष्यम्— **इष्टानिष्टगुणस्वरूपाव-धारणमविभागापन्नं भोग** इति । तयोः प्रत्यययोर्मध्ये संहत्यकारित्वात् परार्थो यः शब्दाद्याकार उपाधिसत्त्वस्य प्रत्ययस्तस्माद्भेदेन स्वार्थे ज्ञानरूपे पुरुषस्य प्रत्यये संयमात् तदुभयविवेकसाक्षात्कारपर्यन्तात् पुरुषज्ञानं कूटस्थविभुनित्यशुद्धमुक्तत्वादिना आत्मसाक्षात्कारो भवति । अखिल-प्रपञ्चात् पुरुषस्य विवेकोऽनुभूयत इति यावत् । अत्र परार्थत्वं स्वार्थत्वं च प्रत्यययोर्विवेकहेतुविधयोपन्यस्ते । तत्र परार्थत्वं परमात्रस्य भोगापवर्ग-साधनत्वम् । स्वार्थत्वं स्वभोगापवर्गसाधनत्वम् । अत्र तु भोगो विषयानुभवमात्रमिति। **ननु** पौरुषेयप्रत्ययः पुरुषस्य स्वरूपमेव अतः कथं तस्मात् साक्षात्कारपर्यन्तस्य संयमस्य पुरुषज्ञानं फलं स्यात् तस्य प्रागेव सिद्धत्वादिति **चेन्न**। घटाकाशवच्छब्दादिवृत्त्यवच्छिन्नचिदाकाश-भागस्य वृत्तिविवेकेन साक्षात्कारात् परिपूर्णत्वादिरूपैरखिलप्रपञ्चविवेकेन च तत्साक्षात्कारस्य सिद्धिरूपस्य भिन्नत्वादिति दिक् ।

तमिमं संयमं विहायात्मसाक्षात्कारस्यान्य उपायो नास्ति । अत

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आत्मजिज्ञासुभिरयमेव संयमः संयमान्तराण्यणिमादिसिद्धिहेतूनि विहाय कर्त्तव्य इति साङ्ख्ययोगयो रहस्यं स्वानुभवसिद्धमुपदिष्टम् । एतस्मिंश्च संयमे क्रियमाणे अन्या अपि सिद्धयः पुरुषज्ञानस्य लिङ्गभूता आदौ जायन्ते प्रातिभश्रावणवेदनादर्शास्वादवातसंज्ञकाः । तत्र दृष्टकारणं विनैव अकस्माद्व्यवहितविप्रकृष्टातीतानागतसूक्ष्माद्यर्थस्फुरणसामर्थ्यं प्रतिभा तज्जन्यं ज्ञानं प्रातिभं मनसः सिद्धिः । तथा व्यवहितश्रवणं श्रावणं श्रोत्रस्य सिद्धिः । तथा व्यवहितादिस्पर्शनवेदनं त्वगिन्द्रियस्य सिद्धिः । तथा व्यवहितादिदर्शनमादर्शश्चक्षुषः सिद्धिः । तथा व्यवहितादिरसग्रहणास्वादो रसनायाः सिद्धिः । तथा व्यवहितादिगन्धग्रहणं वातो घ्राणस्य सिद्धिरिति । एताः षडिन्द्रियस्य षट् सिद्धयः पुरुषसाक्षात्कारहेतोः प्रत्ययसमाधेरुपसर्गा अन्तरायाः । विषयभोगतः समाधिभ्रंशाद् व्युत्थितचित्तस्य बहिर्मुखस्य दृष्ट्यैव तु सिद्धयः पुरुषार्थसिद्धिरूपा उच्यन्ते । ते **समाधावुपसर्गा व्युत्थाने सिद्धय** इति सूत्रात् । अत एता आत्मजिज्ञासुभिर्न कामनीयाः कदाचिदकामत उपस्थितावप्युपेक्षणीया इति । इत्यात्मज्ञानरूपसिद्धिहेतोः संयमस्य कथनम् ।

इतः परं वितर्कविचारानन्दास्मितानुगतसम्प्रज्ञातानां हेतवो ये ग्रहीतृग्रहणग्राह्येषु संयमास्तेषां सिद्धयो वक्तव्याः । तत्र ग्राह्यग्रहणग्रहीतृक्रमेणैवोत्सर्गतः संयमोत्पादात्प्रथमं ग्राह्यसंयमस्य सिद्धिरुच्यते । ग्राह्याणि भूतानि तानि च कार्यकारणाभेदेन धर्मधर्म्यभेदेन च पञ्चरूपाणि भवन्ति । रूपाणि च स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंज्ञानि । तत्र शब्दादयो विशेषा आकाशादयश्च भूतानां स्थूलं रूपम् । आकाशत्ववायुत्वादिसामान्यपञ्चकं च भूतानां स्वरूपाख्यं रूपम् । शब्दादितन्मात्रपञ्चकं तु सूक्ष्मं रूपम् । अनुगच्छतीत्यन्वयः सत्त्वादिगुणत्रयात्मिका प्रकृतिरन्वयाख्यं रूपम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गुणगतः पुरुषार्थो भोगपवर्गरूपाऽर्थवत्त्वमिति । एतद्रूपपञ्चकसङ्घातरूपेषु भूतेषु एतैः पञ्चरूपैः संयमात् साक्षात्कारपर्यन्तात् तैरेव रूपैर्भूतजयरूपा सिद्धिर्भवति । **स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजय इति** सूत्रात् । जयश्च वशवर्तित्वं स्वेच्छानुसारतः प्रवर्त्तनम् । यद्यप्यहङ्कारबुद्धी अपि भूतकारणत्वेन भूतानुगततया भूतानां रूपं भवतः तथापि यज्ञादिफलवत्संयमसिद्धेर्वाचनिकतया भूतेषु बुद्ध्यहङ्काररूपाभ्यां संयमस्य न तदुभयजयः फलमित्याशयेन तदुभयरूपसंयमो भूतेषु नोक्तः इन्द्रियेषु वक्ष्यते । ततश्च भूतजयादणिमादिप्रादुर्भावः कायसंपत् भूत-धर्मानभिघातश्चेत्येतत्सिद्धित्रयं भवति । तत्र अणिमाद्या अष्टौ सिद्धयः स्मृतिषु परिगणिताः—

अणिमा महिमा मूर्त्तेर्लघिमा प्राप्तिरिन्द्रियैः ।
प्राकाम्यं श्रुतदृष्टेषु, शक्तिप्रेरणमीशिता ॥
गुणेष्वसङ्गो वशिता यत्कामस्तदवस्यति ॥ इति ॥

तत्र स्वेच्छयाऽणुपरिमितशरीरो भवतीत्यणिमा । एवं महिमा । लघिमा तु गुरुतरशरीरोऽपि तूलादिवल्लघुर्भवति येनाकाशादिषु संचरति । इन्द्रियैः प्राप्तिस्तु भूमिष्ठ एव अङ्गुल्या चन्द्रमसं स्पृशतीत्यादिरूपा । प्राकाम्यं च श्रुतदृष्टेषु स्वर्गादिषु जलादिषु च गत्यप्रतिबन्धः । ईशिता च शक्तीनां भूतभौतिकानां स्वेच्छया प्रेरणम् । वशिता भूतभौतिकानां शक्ति प्रतिबन्धसामर्थ्यं स्वस्य च तदवशत्वम् । यत्रकामावसायित्वसंज्ञा त्वष्टमी सिद्धिः । विषस्यापि स्वेच्छयामृतीकरणसामर्थ्यम् अमृतस्यापि विषी-करणसामर्थ्यमित्यादिरूपेति अणिमाद्यष्टसिद्धयो व्याख्याताः ।

कायसम्पच्च रूपलावण्यबलवज्रसंहननत्वानि । भूतधर्मानभि-घातस्तु पृथिव्यादिधर्मैः काठिन्यादिभिर्योगिशरीरस्य गत्याद्यप्रतिघातः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तद्यथा पृथिवी काठिन्येन शरीरक्रियां न प्रतिबध्नाति येन पर्वतमपि भित्त्वा स्थूलशरीरं गच्छति शिलामपि वानुप्रविश्य तिष्ठति । तथा आपः स्निग्धाः शरीरं न क्लेदयन्ति अग्निरुष्णो न दहति । वायुर्गतिशीलो न चालयति। आकाशमनावरकमप्यावृणोति । येन सिद्धानामपि अदृश्यो भवति । इति ग्राह्यसंयमस्य सिद्धय उक्ताः ।

ग्रहणसंयमस्योच्यन्ते । गृह्यन्ते एभिरिति ग्रहणान्येकादशेन्द्रियाणि। तान्यपि कार्यकारणाभेदेन धर्मधर्म्यभेदेन च पञ्चरूपाणि भवन्ति । रूपाणि च ग्रहणरूपास्मितान्वयार्थवत्त्वसंज्ञानि । तत्रेन्द्रियाणां वृत्तयो ग्रहणम् । इन्द्रियाणि स्वरूपम् । अहङ्कारः अस्मिता । अत्रैव बुद्धेरप्यन्तर्भावः । अन्वयश्च पूर्ववद् गुणत्रयात्मिका प्रकृतिः । अर्थवत्त्वं तु पूर्ववत् । एतद्रूप-पञ्चकसङ्घातरूपेष्विन्द्रियेषु एतैः पञ्चरूपैः संयमात् साक्षात्कार-पर्यन्तादिन्द्रियजयरूपा सिद्धिर्भवति । **ग्रहणस्वरूपास्मितान्वयार्थव-त्त्वसंयमादिन्द्रियजय** इति सूत्रात् । ततश्च मनोजवित्वं विकरणभवः प्रधानजयित्वं चेत्येतत्सिद्धित्रयं भवति । तत्र कायस्यानुत्तमगतिलाभो मनोजवित्वम् येनोपासकादिभिः स्मृतमात्राः क्षणादेव सिद्धाः पुरो दृश्यन्ते। स्थूलदेहनैरपेक्ष्येणैवेन्द्रियाणां यथेच्छं व्यवहितादिसाधारणार्थेषु वृत्तिलाभो विकरणभावः । इन्द्रियाणां सर्वत्र विकीर्णतेति यावत् । सर्वप्रकृतीनां तद्विकाराणां च वशित्वं स्वेच्छया प्रेरणसामर्थ्यं प्रकृतिजय इति । एताश्च पञ्चरूपैरिन्द्रियसंयमस्य तिस्रः सिद्धयो मधुप्रतीका इत्युच्यन्ते। इति ग्रहणसंयमस्य सिद्धय उक्ताः ।

अथ ग्रहीतृसंयमस्योच्यन्ते । ग्रहीतुः कार्यकारणविलक्षणत्वा-न्निर्धर्मत्वाच्च रूपभेदो नास्ति ग्रहीतरि पुरुषसामान्ये उपाधिसत्त्वाद्भेदेन संयमात् साक्षात्कारपर्यन्तात् सर्वभावाधिष्ठातृत्वं सर्वज्ञत्वं च भवति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञत्वं चेति सूत्रात् । इयं च सिद्धिः सर्वकामावाप्त्या अखिलशोकरहितत्वाद्विशोकेत्युच्यते। तत्र परमेश्वरवत् स्वेच्छया सर्ववस्तुप्रेरणसामर्थ्यं सर्वभावाधिष्ठातृत्वं प्रकृतिपुरुषादिषु अप्रतिहतेच्छत्वमिति यावत् । सर्वज्ञत्वं तु वक्ष्यमाणं, तदेव च सार्वज्ञ्यं विवेकजं ज्ञानं तारकमित्युच्यते सत्त्वपुरुषविवेकसंयमजन्यत्वात् संसारतारकत्वाच्च तच्च सार्वज्ञ्यं सूत्रेण लक्षितम् । **तारकं सर्वविषयं सर्वथाविषयमक्रमं चेति विवेकजं ज्ञानमिति** । तथा विष्णुपुराणेऽपि लक्षितम्—

अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्यस्तथा ज्ञानं यद्विमर्षे विवेकजम् ॥ इति ॥

पूर्वं परार्थप्रत्ययाद्भेदेन स्वार्थप्रत्यये संयमस्य तत्साक्षात्कारपर्यन्तस्य पुरुषसाक्षात्काररूपा सिद्धिरुक्ता । अत्र तु बुद्धिसत्त्वाद्भेदेन पुरुषे संयमस्य पुरुषसाक्षात्कारपर्यन्तस्य सार्वज्ञ्यादिसिद्धिरुच्यत इति भेदः । तदिदं ग्रहीतृसंयमस्य सिद्धिद्वयमुक्त्वा सूत्रकारेण तस्यैव अन्या सर्वसिद्धिमूर्द्धन्या परमा सिद्धिरुक्तास्ति । **तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति** । अस्यायमर्थः—क्लेशकर्मरूपाणां दोषाणां संसारबीजानां आत्मज्ञानेन निःशेषतः क्षये सति तयोः सिद्धयोरपि वैराग्यमलंप्रत्ययो जायते । तस्माद्वैराग्यात्कैवल्यरूपा सिद्धिरिति । तदुक्तं मोक्षधर्मे—

वैराग्यं पुनरेतस्य मोक्षस्य परमो विधिः ।
ज्ञानादेव तु वैराग्यं जायते येन मुच्यते ॥ इति ।

यदि च ज्ञानस्यापरिपाकात् सार्वज्ञ्यानदिरागस्तिष्ठति तर्हि संयमस्योक्तसिद्धिद्वयं कैवल्याख्यसिद्ध्यन्तरायो भवतीत्याशयः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तदेवं मुख्यसंयमानां सिद्धय उक्ताः । यथा च सर्वज्ञत्वपर्यन्त-सिद्धिज्ञानं विनापि मोक्षो भवति तथा प्रागेवोक्तम् । इदानीं सिद्धिप्रकारः कथ्यते । यदा मनुष्यादिशरीरेणैव देवभावं प्राप्नोति यदा वा अणिमादिसिद्धयः प्रादुर्भवन्ति तदा किं संकल्पयोगजधर्माभ्यामतिरिक्तं कारणमपेक्षते न वेति संशये निर्णयसूत्रम्—**जात्यन्तरपरिणामः प्रकृत्या-पूरादिति** । अस्यायमर्थः । मनुष्यादिशरीरस्य देवादिजात्यन्तररूपः परिणामः सत्त्वादिविशेषरूपाणां देवादिशरीरारम्भयोग्यानामापूरादेव भवति। तत्र चापूरणे अधर्मादिप्रतिबन्धनिवृत्तिद्वारा योगिसंकल्पयोगज-धर्मादिकं निमित्तमात्रं न तु प्रकृतिप्रेरकं भवति प्रकृतीनां स्वत एव सर्वपरिणामसामर्थ्यात् । अतो न प्रकृतिस्वातन्त्र्यक्षतिः । तथा च सूत्रम्। **निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत्** इति । अत्र प्रकृत्यापूरेण प्रकृत्यपसारणमुपलक्ष्यते । जात्यन्तरपरिणामेन च अणिमा-महिमाद्या अपि सिद्धय उपलक्ष्यन्ते । तेन यथायोग्यं प्रकृत्यापूरणाप-सारणाभ्यां सर्वाः सिद्धय उत्पद्यन्ते । एतेन वामननृसिंहवराहादीनां क्षणेन प्रकृत्यापूरणादेव शरीरवृद्धिः । अगस्त्यादिपीयमानसमुद्रादेश्चाल्पत्वं प्रकृत्यपसरणादुपपन्नमिति । कायव्यूहादिकं तु देहान्तरादिप्रकृतीनां पृथगेवारम्भकसंयोगाद्भवतीति विशेषः । ननु यदा योगी कायव्यूहं करोति तदा किं तत्तद्देहप्रतिनियतानि चित्तानि चित्तप्रकृतितो निर्मिमीते किं वा एकेनैव निर्मातृचित्तेन सर्वाणि शरीराण्यधितिष्ठतीति संशये निर्णयसूत्रम् । **निर्माणचित्तान्यस्मितामात्रादिति** । अस्यायमर्थः—अस्मितामात्रमहङ्कार-स्तस्मात् कारणाद्बहून्येव शरीरप्रतिनियतानि मनांसि योगिसंकल्पाज्जायन्त इति । अन्यथा एकचित्तेन विरुद्धानां भोगसमाध्यादीनां नानादेहेष्वेकदा न संभवः । तथा श्रीरामरूपलीलाविग्रहे श्रीविष्णोः सर्वज्ञस्य निर्मातृ-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चित्तेनाज्ञानस्वीकारश्च नोपपद्यत इति भावः । योगीनां नानाशरीरैर्विरुद्धनानाकार्यं तु स्मर्यते ।

प्राप्नोति विषयान् कश्चित् कश्चिदुग्रं तपश्चरेत् ।
योगेश्वरः शरीराणि करोति विकरोति च ॥ इति ।

सर्वेषां तु निर्माणचित्तानामेकमेव निर्मातृचित्तं प्रवृत्तिनिवृत्त्योः प्रयोजकं भवति । **प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषामिति** सूत्रात् । कादाचित्कं तु एकेनापि चित्तेन नानाशरीराधिष्ठानमत्र न निराक्रियते योगिनां स्वतन्त्रेच्छत्वादिति । एतेन हिरण्यगर्भादीनां जगत्सृष्ट्यादिरपि प्रकृत्यापूरादिना व्याख्याता । अत्र प्रकृत्यापूरेण जीवान्तराणां स्वस्वोपाधिसंयोगस्याप्युपलक्षणम् । येन योगी जीवान्तरसंयोगन गजतुरगादीनि निर्मायैश्वर्यं भुङ्क्त इति । यथा च समाधिसिद्धयः प्रागुक्ता एवमेव जन्मादिसिद्धयोऽपि मन्तव्याः । विशेषस्त्वयं समाधिसंस्कृतं चित्तमेवात्मसाक्षात्कारद्वारा साक्षान्मोक्षहेतुर्न जन्मादिसिद्धमिति । तत्र **जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय** इति सूत्रेण सिद्धयः पञ्चप्रकारा उक्ताः । तत्र देवानां जन्मसिद्धिरणिमादिरूपा असुरादीनां चौषधसिद्धिर्महाबलत्वादिः सुवर्णादिसिद्धिश्च । मन्त्रसिद्धिस्तु मन्त्रैराकाशगमनादिः । तपःसिद्धिश्च तपसा संकल्पसिद्ध्यादिः । समाधिसिद्धयस्तु व्याख्याता इति । प्रल्हादादीनां भक्त्यादिजन्यसिद्धयश्च तपःसिद्धिमध्ये प्रवेशनीयाः ।

अक्षयः परमो धर्मो भक्तिलेशेन जायते ॥

इति स्मृत्या तपोऽन्तरायेऽक्षयापि भक्तिरधिकेत्येव विशेष इति दिक् ॥

इति विज्ञानभिक्षुविरचिते योगसारसंग्रहे योगसिद्धिनिरूपणं तृतीयोंऽशः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्थोऽशः

योगविभूतयः प्रतिपादिताः । इदानीं ज्ञानयोगयोर्मुख्यं फलं कैवल्यं प्रतिपाद्यते ।

तत्र सूत्रम् । **पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति** । अत्र गुणशब्देन बुद्धिरूपतया परिणताः सत्त्वादय उक्ताः । कैवल्यं एकाकिता । सा चान्योन्यवियोगरूपतया गुणपुरुषयोरुभयोरेव भवति । तत्र विवेकख्यात्या परवैराग्येण पुरुषार्थशून्यानां गुणानां पुरुषोपकरणानामात्यन्तिकः प्रतिप्रसवः प्रलयस्तस्मात् पुरुषादत्यन्तवियोग इति यावत्, न तु नाशः, **कृतार्थं प्रति नष्टमप्यनष्टं तदन्यपुरुषसाधारणत्वादिति** सूत्रात् । एतदाद्यं कैवल्यं प्रकृतिधर्मः । द्वितीयं च कैवल्यं पुरुषस्य स्वरूपप्रतिष्ठा । सा च चितिशक्तिरेव । प्रतिबिम्बरूपेण उपाधिवियुक्तेत्यर्थः । उभयपक्षेऽपि पुरुषस्य दुःखभोगनिवृतिरूपपुरुषार्थे पर्यवसानं भवति । अत एव **हेयं दुःखमनागतमिति** सूत्रम् । अथ **त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ** इति साङ्ख्यसूत्रं चानेन सूत्रेण सहाविरुद्धम् । वेदान्तिनस्तु परमात्मनि जीवात्मलयो मोक्ष इति वदन्ति तैः सहास्माकं न विरोधः । समुद्रे नदीनामिव ब्रह्मणि जीवानामुपाधिलयेनाविभागस्यैव लयशब्दार्थत्वात् तस्य च पररूपेण अप्रतिष्ठात्व एव पर्यवसानात् । वैशेषिकास्तु अशेषविशेषगुणोच्छेदो मोक्ष इत्याहुः तदप्यस्माकमविरुद्धम् । उपाधेर्विशेषगुणानामेव उपाधिमत्युपचारेण तदुच्छेदस्याप्युपचारात् । नैयायिकास्तु आत्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति इच्छन्ति तत्तु अस्मन्मतमेव भोग्यभोक्तृभावसम्बन्धेन दुःखनिवृत्तिः पुरुषार्थो न समवायेने-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्येवास्माकं विशेषात् । यत्तु नवीना वेदान्तिब्रुवा नित्यानन्दावाप्ति परममोक्षं कल्पयन्ति तदेव च **वयं न मृष्यामहे** । ब्रह्ममीमांसादि-सकलदर्शनेषु तादृशसूत्राभावात् श्रुतिस्मृतिन्यायाविरोधाच्च । तत्र मोक्षे सुखप्रतिषेधिकाः श्रुतयः—**'विद्वान् हर्षशोकौ जहाति' 'अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत'** इत्यादयः । स्मृतिश्च—

यच्च किंचित्सुखं तच्च दुःखं सर्वमिति स्मरन् ।
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ॥

परमात्मनि संलीनो विद्याकर्मबलान्नरः ।
न सुखेन न दुःखेन कदाचिदपि युज्यते ॥ इत्यादिः ।

न्यायश्च मोक्षस्य जन्यत्वे विनाशित्वप्रसङ्गः, नित्यत्वे सिद्धतया न पुरुषार्थत्वम् । **अथ** नित्यसुखस्योपलब्धिरेव मोक्षो वाच्य इति **चेन्न** उपलब्धेरपि नित्यानित्यविकल्पग्रस्तत्वात् । **न च** नित्यसुखगोचरस्या-विद्यादियत्किंचिदावरणस्य भङ्ग एव पुरुषार्थो **वाच्यः**, सुखानुभवस्यैव लोके पुरुषार्थत्वाच्चैतन्यनित्यत्वेनावरणस्याप्यसंभवाच्चेत्यादिरिति । **नन्वेवं** मोक्षे परमानन्दश्रुतिस्मृतयः कथमुपपद्येरन्निति **चेन्न** मोक्षशास्त्र-परिभाषयैव तदुपपत्तेः ।

दुःखमेवास्ति न सुखं यस्मात् तदुपलभ्यते ।
दुःखार्तस्य प्रतीकारे सुखसंज्ञा विधीयते ॥

दुःखं कामसुखापेक्षा सुखं दुःखसुखात्ययः ।

इत्यादिस्मृतिभिर्हि दुःखबहुलत्वेन सुखमपि दुःखतया परिभाष्यते तादृशदुःखनिवृत्तिरेव सुखत्वेन परिभाषितास्ति उपादेयगुणत्वेनेति । अत एव साङ्ख्यसूत्रम्—**दुःखनिवृत्तेर्गौण इति । विमुक्तिप्रशंसा मन्दाना-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिति च। आनन्दावाप्तिस्तु गौणो मोक्षो ब्रह्मलोके भवतीति दिक्। तदेवं कैवल्यं सङ्क्षेपेण प्रतिपादितम्।

योगशास्त्रस्य सारार्थः सङ्क्षेपेणायमीरितः।
नातोऽधिको मुमुक्षूणामपेक्ष्यो योगदर्शने॥

साङ्ख्यसारप्रकरणे विवेको बहु वर्णितः।
नातः प्रपञ्च्यते सोऽत्र ग्रन्थबाहुल्यभीतितः॥

ब्रह्मप्रकरणे ब्रह्मादर्शादावीश्वरोऽपि च।
वर्णितो वर्ण्यते नात्र ग्रन्थसङ्क्षेपकाम्यया॥

समानतन्त्रसिद्धान्तन्यायेनात्र च दर्शने।
साङ्ख्यानुसारतो ज्ञेयः सृष्ट्याद्यर्थोऽविरोधतः॥

तैर्दूषितं चेश्वरादि प्रसाध्यमिह यद्भवेत्।
तत्रेश्वरो ब्रह्मशास्त्रे न्यायादौ च प्रसाधितः॥

तेनाप्यसाधितः स्फोटशब्दो धीवैभवं तथा।
सङ्क्षेपात् साध्यतेऽस्माभिः साङ्ख्यदोषनिरासतः॥

तत्र शब्दस्तावत्त्रिविधो भवति। वागिन्द्रियविषयः श्रोत्रविषयो बुद्धिमात्रविषयश्च। तेषु कण्ठाताल्वादिस्थलावच्छिन्नः शब्दो वागिन्द्रियस्य विषयः तत्कार्यत्वात्। वागिन्द्रियव्यवहितः श्रोत्रस्थश्च शब्दजः शब्दः श्रोत्रस्य विषयः तद्ग्राह्यत्वात्। घट इत्यादि पदानि तु बुद्धिमात्रस्य विषयः वक्ष्यमाणयुक्त्या बुद्धिमात्रग्राह्यत्वात् तानि पदान्येवार्थस्फुटीकरणत्वात् स्फोट इत्युच्यते। तद्धि पदं वागिन्द्रियोच्चार्यप्रत्येकवर्णेभ्योऽतिरिक्तं वर्णानामाशुतरविनाशितया मिलनाभावेनैकं पदमिति व्यवहारगोचरत्वासंभवात् अर्थस्मारकत्वासंभवाच्च।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अस्य च स्फोटस्य कारणमेकः प्रयत्नविशेषः प्रयत्नभेदेनोच्चारणे सति एकपदव्यवहाराभावादर्थाप्रत्ययाच्च । तस्य च स्फोटस्य व्यञ्जक आनुपूर्वीविशेषविशिष्टतया अन्त्यवर्णप्रत्ययः । अतश्च तद्बुद्धेरेव स्फोटग्राहकत्वम् आनुपूर्व्या बुद्धयैव ग्रहणसंभवेन सामानाधिकरण्यप्रत्यासत्त्यैवानुपूर्वीप्रत्ययस्य स्फोटाख्यपदाभिव्यक्तिहेतुत्वे लाघवात् । अत एव स्फोटः श्रोत्रेण ग्रहीतुं न शक्यते । घोत्तरटत्वादिरूपिण्या आनुपूर्व्याः श्रोत्रेण ग्रहणासंभवात् आशुतरविनाशितया वर्णानां मिलनासंभवात् पूर्वपूर्ववर्णसंस्काराणां तत्स्मृतीनां चान्तःकरणनिष्ठानामन्तःकरणसहकारित्वस्यैवोचित्यादिति । **स्यादेतत्** स्फोटव्यञ्जकस्य आनुपूर्वीविशिष्टचरमवर्णस्यैव पदत्वमर्थप्रत्यायकत्वरूपमस्तु अलं स्फोटेन तद्धेतोरेव तदस्त्विति न्यायात् । एतदेव साङ्ख्यसूत्रेणोक्तम्—**प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्द** इति । एकत्वप्रत्ययोऽप्यानुपूर्वीविशिष्टचरमवर्णस्यैकत्वे नोपपद्यत इति । **अत्रोच्यते** एवं सत्यवयव्युच्छेदप्रसङ्गः । असमवायिकारणसंयोगविशेषावच्छिन्नानामवयवानामेव जलाद्याहरणहेतुत्वकल्पनायां लाघवात्तद्धेतोरेव तदस्त्विति न्यायसाम्यात् । एको घट इत्यादिप्रत्ययानामप्येकं वनमित्यादिप्रत्ययवदुपपत्तेः । **अथ** परमाणूनां तत्संयोगानां चातीन्द्रियतया तद्रूपत्वेऽवयविनः प्रत्यक्षानुपपत्तिरित्यादिकमवयविसाधकमिति **चेत्** तुल्यं स्फोटेऽपि । आनुपूर्व्याः क्षणाद्यतीन्द्रियघटिततया आनुपूर्वीविशिष्टचरमवर्णात्मकत्वे पदस्य प्रत्यक्षानुपपत्तिरित्यादिकं स्फोटसाधकमिति । अपि च स्फोटशब्दोऽस्माभिः श्रुतिप्राणेनैव स्वर्गादिवत् कल्प्यत इत्यतस्तत्र लौकिकप्रमाणाभावेऽपि न क्षतिः । तथाहि प्रणवस्याकारोकारमकाररूपमात्रात्रयं ब्रह्मादिदेवतात्रयात्मकत्वमुक्त्वा प्रणवदेवतात्रयातिरिक्तपरब्रह्मात्मकचतुर्थमात्रां श्रुतय

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आमनन्ति । सा च चतुर्थी मात्रा वर्णत्रयादतिरिक्तः स्फोट एव संभवति। सैव चार्द्धमात्रेत्युच्यते । राशिवदविभक्तयोर्हि वर्णपदयोर्वर्ण एकमर्द्धपदं वा तदर्द्धमित्युपपद्यते । यथा चावयवेभ्यो विविच्यावयवी न व्यवहार्यो भवति । एवमेव प्रत्येकवर्णेभ्यो विविच्य पदमुच्चारयितुं न शक्यत इत्यतः स्मर्यते ।

अर्द्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः । इति ।

ननु स्यादेवमर्द्धमात्रोपपत्तिः नादबिन्दोस्तु किं स्वरूपम् । **उच्यते**। प्रणवे उच्चार्यमाणे शङ्खनादवेणुनादादिवद्यः स्वरविशेषो भवति स नादः या च नादस्योपरमावस्था अतिसूक्ष्मा सा शून्यतुल्यतया बिन्दुरुच्यत इति। तस्मादवयवेभ्योऽवयवी वर्णेभ्योऽतिरिक्तं पदं तदेव स्फोट इति सिद्धम् । **नन्वेवं** वाक्यमपि स्फोटः स्यादिति **चेत्** बाधकाभावे सतीष्यतामिति दिक् ।

स्फोटो व्यवस्थापितो मनोवैभवं व्यवस्थाप्यते । धर्माधर्मवासनाश्रयतया प्रतिपुरुषमन्तःकरणं नित्यम् । **न च** प्रकृतिधर्मा एव सन्त्वदृष्टादय इति **वाच्यम्,** अन्यनिष्ठादृष्टादिभिरन्यत्र सुखदुःखाद्युत्पादेऽतिप्रसङ्गात् । तच्च नाणु संभवति योगिनां सर्वावच्छेदेन एकदाखिलसाक्षात्कारसंभवात् । अयोगिनामपि दीर्घशष्कुलीभक्षणादावनेकेन्द्रियवृत्त्यनुभवाच्च । न च योगिनां योगजधर्म एव प्रत्यासत्तिः स्यात्, संयोगसंयुक्तसमवायादिलौकिकप्रत्यासत्त्यैवोपपत्तौ सन्निकर्षान्तरकल्पने गौरवात् अन्योन्यं व्यभिचाराच्च साक्षात्कारेष्ववान्तरजातिकल्पने गौरवाच्च । अस्मन्मते च सर्वार्थग्रहणसमर्थस्यान्तःकरणस्य तमआख्यावरणभङ्ग एव योगजधर्मादिभिः क्रियते । सुषुप्तौ तमसो वृत्तिप्रतिबन्धकत्वसिद्धेरिति। नाप्यन्तःकरणं मध्यमपरिणाममात्रं संभवति । प्रलये विनाशेनादृष्टाद्या-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धारतानुपपत्तेः । अतः परिशेषतोऽन्तःकरणं विभ्वेव सिध्यति । तथा च स्मर्यते–

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतमं विद्धि चिदाकाशं वरानने ॥ इति ।

स्यादेतत् । अन्तःकरणस्य विभुत्वे परिच्छिन्नवृत्तिलाभस्यावरणेनोपपत्तावपि लोकान्तरगमनादिकं नोपपद्यते । अत एव साङ्ख्यसूत्रम् । **न व्यापकमन्तःकरणत्वादिति तदतिच्युतेरिति** च । किं च एवं सति लाघवाच्चैतन्यस्यैवावरणकल्पनमुचितं किमर्थं विभ्वन्तःकरणं परिकल्प्यते । तत्र ज्ञानप्रतिबन्धकमावरणं कल्प्यत इति । **अत्रोच्यते** । गतिश्रुतिस्तावदात्मनीवान्तःकरणेऽपि प्राणेन्द्रियाद्युपाधिनोपपद्यते कार्यकारणरूपेणान्तःकरणद्वैतात् कार्यान्तःकरणस्य स्वतोऽपि गतिरुपपद्यते । कार्यकारणरूपेणान्तःकरणद्वैतं साङ्ख्यैरप्येष्टव्यम् । केवलकार्यत्वेऽन्तः**करणधर्मत्वं धर्मादीनामिति** साङ्ख्यसूत्रानुपपत्तेः । केवलनित्यत्वे च महदाद्युत्पत्तिसूत्रानुपपत्तेः । **यदुक्तं** चैतन्यस्यैव आवरणकल्पनं युक्तमिति । **तदयुक्तम्** । कूटस्थचैतन्यस्य ज्ञानप्रतिबन्धरूपावरणासंभवात् । **न च** चैतन्यस्यार्थसम्बन्ध एव प्रतिबिम्बादिरूपे प्रतिबन्धकं कल्पनीयमिति **वाच्यम्** । एवमप्यात्मदर्शनानुपपत्तेः । करणद्वारं विना स्वस्मिन् प्रतिबिम्बादिरूपेण स्वसम्बन्धासंभवात् । अपि च इच्छाकृत्याद्याधारतयान्तःकरणे सिद्धे स्वप्नादावन्तर्दृश्यमानघटादयोऽपि तस्यैव परिणामाः कल्प्यन्ते कार्यकारणयोः सामानाधिकरण्यौचित्यात् । त एव च घटाद्याकारपरिणामाश्चैतन्ये भासन्ते तद्विभागेनैव बाह्यघटादिकं भासते अतस्तादृशपरिणामप्रतिबन्धकमेवावरणम् । तन्नैव युक्तम् । किं च बाह्यकरणस्यावरणदर्शनेनान्तरावरणस्यापि करणनिष्ठत्वं चानुमीयते । आत्मनोऽनावृतत्वं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रुतिस्मृतिभ्यां चेति । **नन्वन्तः**करणस्य विभुत्वे सति कथं कार्यत्वं स्यादिति **चेत्** न विभ्व्या अपि आकाशप्रकृतेः कार्याकाशरूपपरिच्छिन्न-परिणामवद् गुणान्तरभेदेन अन्तःकरणप्रकृतेरपि परिच्छिन्नान्तःकरण-रूपपरिणामोपपत्तेः । श्रुतिस्मृतिप्रामाण्याच्चैतदिष्यत इति दिक् ॥

मनोवैभवं व्यवस्थापितं क्षणरूपः कालो व्यवस्थाप्यते । तत्र न्यायवैशेषिकाभ्यां मन्यते आत्मवदखण्डो नित्य एकः कालोऽस्ति । लाघवात्स एव तदुपाध्यवच्छिन्नः सन् क्षणमुहूर्ताहोरात्रमाससंवत्सरादि-व्यवहारं कुरुते न पुनः क्षणनामा पृथक्पदार्थोऽस्तीति । साङ्ख्यैस्तु **दिक्कालावाकाशादिभ्य** इति सूत्रात् महाकालो वा क्षणादिर्वा पृथक्पदार्थो नास्ति किं तु आकाशमेवोपाधिभिर्विशिष्टं क्षणादिमहाकालान्तव्यवहारं कुरुत इति मन्यते । तदेतन्मतद्वयमप्यसमञ्जसम् । स्थिरेण केनाप्युपाधिना महाकालाकाशाभ्यां क्षणव्यवहारस्यासंभवात् । तथाहि । उत्तरदेश-संयोगावच्छिन्ना परमाण्वादिक्रिया अन्यद्वा एतादृशं किंचिन्महाकाला-काशयोः क्षणरूपतायामुपाधिः परैरिष्यते । तत्रोक्तसंयोगविशिष्टक्रियादिकं चेद्विशेष्यविशेषणतत्सम्बन्धमात्रं तर्हि त्रयाणामपि परैः स्थिरत्वाभ्युप-गमान्न तैः क्षणव्यवहारः सम्भवति । यदि च तत् तेभ्योऽतिरिक्तमिष्यते तर्हि तस्य विशिष्टसंज्ञामात्रं तदेव चास्माभिः सर्वेभ्यः स्थिरपदार्थेभ्यो-ऽतिरिक्तं क्षणाख्यः काल इष्यते । न तु तन्महाकाल आकाशं वा तेनैव क्षणव्यवहारोपपत्तौ तदवच्छिन्नस्यान्यस्य क्षणव्यवहारहेतुत्वकल्पना-वैयर्थ्यात् । स च विशिष्टादिरस्थिरः क्षणः प्रकृतेरेवातिभङ्गुरायाः परिणाम-विशेष इत्यतो न प्रकृतिपुरुषातिरिक्तत्वापत्तिः । तस्यैव च क्षणस्यावयव-विशेषैर्मुहूर्ताहोरात्रादिद्विपरार्द्धान्तव्यवहारो भवति न त्वखण्डो महाकालो-ऽस्ति प्रमाणाभावात् । इदानीमद्येत्यादिव्यवहाराणां क्षणप्रचयेनैवोपपत्तेः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कालनित्यताश्रुतिस्मृतयस्तु प्रवाहनित्यतापरा इति । तस्मादावश्यकत्वात् क्षणात्मक एव कालो नाखण्डो महाकालोऽस्ति नाप्याकाशं कालव्यवहारहेतुरिति सिद्धम् । एवमन्येऽप्यस्मच्छास्त्रसिद्धान्ताः साङ्ख्यादिप्रतिषिद्धाः सुबुद्धिभिरुपपादनीया इति दिक् ॥

इति विज्ञानभिक्षुविरचिते योगसारसंग्रहे कैवल्यादिनिरूपणं चतुर्थोऽशः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मीमांसापरिभाषा

सूर्यनारायणं वन्दे देवीं त्रिपुरसुन्दरीम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥१॥

बालानां शास्त्रसिद्धार्थलेशबोधाय धीमता ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥२॥

इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसाया धर्माधर्मावेवानुष्ठानोपयोगितया विचारतौ । तत्र वेदबोधितेष्टसाधनताको धर्मः-यथा यागादिः । वेदबोधितानिष्टसाधनताकोऽधर्मः-यथा कलञ्ज-भक्षणादिः । तयोश्च वेदः, स्मृतिः, आचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रं प्रमाणम् इतरौ तु वेदमूलकतया ।

तत्र वेदो द्विविधः-मन्त्ररूपो ब्राह्मणरूपश्चेति । तत्र प्रयोग-कालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते । प्रयोगोऽनुष्ठानं तत्कालीनेत्यर्थः । विधायकं वाक्यं ब्राह्मणम् । तच्छेषोऽर्थवादः । तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्येकवाक्यतया प्रामाण्यमिति वक्ष्यते ।

ब्राह्मणवाक्यं चानेकविधम्-कर्मोत्पत्तिवाक्यं, गुणवाक्यं, फल-वाक्यं, फलाय गुणवाक्यं, सगुणकर्मोत्पत्तिवाक्यमित्यादिभेदात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र येन वाक्येन 'इदं कर्म कर्तव्य'मिति बोध्यते तत् कर्मोत्पत्ति वाक्यम्-यथा **'अग्निहोत्रं जुहोति'** इति । अत्राग्निहोत्रहोमः कर्तव्यतया विधीयत इति कर्मोत्पत्तिवाक्यमिदम् ।

विहिते कर्मणि तदङ्गतया द्रव्यदेवतादिविधायकं वाक्यं गुण-वाक्यम्-यथा **'दध्ना जुहुयात्'** इति। अत्र होममुद्दिश्याऽङ्गतया दधि विधीयत इति गुणवाक्यमिदम् । कर्माङ्गतया विहितत्वमेव दध्यादेर्गुणत्वम् । अत्र होमस्योद्देश्यत्वं नाम मानान्तरप्राप्तत्वे सति विधेयान्वयितया निर्देश्यत्वम् । तस्यैव मानान्तरप्राप्तस्य पुनः कथ्यमानरूपत्वमनुवाद्यत्वम्, दध्यादिगुणा-न्वयितया प्राधान्यं च दध्यादेर्मानान्तराप्राप्तत्वादत्रैव विधेयत्वम्, होमसाधन-त्वाच्च होमापेक्षया गुणत्वम्, पुरुषेणानुष्ठीयमानत्वादुपादेयत्वं चेति । अत्र मानान्तरप्राप्तत्वं मानान्तरज्ञातत्वम्, अप्राप्तत्वं चाज्ञातत्वमिति बोध्यम् ।

उत्पन्नस्य कर्मणः फलाकाङ्क्षायां फलसम्बन्धबोधको विधिः फलविधिः-यथा **'अग्निहोत्रं जुहुयात्स्वर्गकामः'** इति । अत्र 'यः स्वर्गं कामयते स तत्साधनत्वेनाग्निहोत्रनामकं होमं भावयेत् कुर्यात्' इति अग्निहोत्रवाक्योत्पन्नस्य कर्मणः फलसंबन्धो बोध्यत इति फल वाक्यमिदम् ।

प्राप्तं कर्माश्रित्य फलाय गुणविधौ फलायगुणवाक्यम्-यथा **'दध्नेन्द्रियकामस्य जुहुयात्'** इति । अग्निहोत्रवाक्योत्पन्नं होममाश्रित्ये-न्द्रियफलाय दधिरूपो गुणो विधीयते-'होमाश्रितेन दध्ना इन्द्रिय रूप फलं भावयेत्' इति । होमाश्रितेन होमकारकीभूतेनेत्यर्थः । अयमेव-गुणफलविधिः, गुणकामविधिरिति चोच्यते ।

द्रव्यदेवतादिगुणविशिष्टकर्मविधायकं वाक्यं सगुणकर्मोत्पत्ति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वाक्यम्-यथा **'सोमेन यजेत'** इति । अत्र सोमलताविशिष्टो यागो विधीयते। विशिष्टविधावपि विशेषणस्यार्थाद्विधिः ।

क्वचित्कर्मोत्पत्तिवाक्यमेव फलसम्बन्धबोधकमपि भवति-यथा **'उद्भिदा यजेत पशुकामः'** इति । अत्रोद्भिन्नामको यागो वाक्यान्तरविहित एव पशुकामस्य पशुफलाय विधीयत इत्येकमेवेदं वाक्यं फलसाधनयागविधायकम् ।

प्रधानविधिरेवाङ्गविधिभिरेकवाक्यतया महावाक्यतामापन्नः सन् सर्वाङ्गविशिष्टप्रधानप्रयोगविधायकत्वात् प्रयोगविधिरित्युच्यते-यथा **'अग्निहोत्रं जहुयात्स्वर्गकाम'** इति । अत्र अग्निहोत्रहोमेन स्वर्गं भावयेत् इत्यर्थः प्रतीयते। भावयेत् उत्पादयेदिति यावत्। अत्र 'कथमनेन होमेन स्वर्गं कुर्यात्' इति कथंभावाकाङ्क्षा जायते, यथा 'कुठारेण द्वैधीभावं कुर्यात्' इत्युक्ते भवत्याकाङ्क्षा 'कथमनेन द्वैधीभावं कुर्यात्' इति, तत्रोद्यमनिपातनादिसहायेनेति गम्यते, तद्वदत्रापि 'अग्निं प्रणयति', **'अग्निषु समिध आदधाति'** इत्याद्यङ्गविधिविहितप्रणयनसमिदाधानायतनशोधनादिकाङ्गकलापजनितोपकारसहितेनाऽग्निहोत्रहोमेन स्वर्गं कुर्यादिति प्रकरणकल्पितेन होमवाक्येन स्वर्गाय साङ्गाग्निहोत्रप्रयोगो विधीयत इत्येतादृशः प्रयोगविधिः । अङ्गजातमेवेत्थंभाव इति, इतिकर्तव्यता इति चोच्यते । अत्राग्निहोत्रहोमः प्रधानं, प्रणयनादिकं सर्वमङ्गम्।

नन्विदमनुपपन्नं, आशुतरविनाशिनां कर्मणां कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्तेरिति **चेत्**, मैवम्, विहितनिषिद्धकर्मणां तत्तद्वाक्यैस्तत्तत्फलसाधनत्वेऽवगते आशुतरविनाशिनां कर्मणां कालान्तरभाविफलसाधनत्वोपपत्त्यर्थमन्तरा पुण्यपापरूपमपूर्वं कल्प्यते । ततश्च

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यागादेरपूर्वद्वारा स्वर्गसाधनत्वं, न साक्षात्। तदेव फलापूर्वम्। तत्करणत्वं च प्राच्योदीच्याङ्गविशिष्टस्य प्रधानस्य भवति, न प्रधानमात्रस्य। प्रधानमात्रादेव फलापूर्वजनने फलस्यापि तत एव सिद्धेरङ्गानामानर्थक्यापत्तेः।

ननु सर्वाङ्गविशिष्टस्य प्रधानस्यापूर्वजनकत्वमयुक्तम्, तच्चाशुतरविनाशिनः प्रधानस्याङ्गसाहित्याभावान्न संभवतीति चेत्, न, प्रधानकर्मणः स्वरूपेणाङ्गसाहित्याभावेऽपि उत्पत्त्यपूर्वद्वारा साहित्यसंभवात्। प्रधानस्य सर्वाङ्गसाहित्यसिद्ध्यर्थं प्रधानकर्म-परमापूर्वयोर्मध्ये प्रधानमात्रजन्यमुत्पत्तिनामकं किंचिदपूर्वमस्तीत्यङ्गीकारात्। एवमङ्गानामपि परस्परसहितानामेव प्रधानोपकारकत्वात्तेषां स्वरूपेण साहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं बोध्यम्। अङ्गानां प्रधानोपकारकत्वं नाम प्रधानस्य फलापूर्वजननसामर्थ्योन्मुखीकरणमेव।

दर्शपूर्णमासयोस्तु विशेषः **'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतो भवति'** इत्याग्नेययागो विहितः, **'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छत्'** इत्यग्नीषोमीययागो विहितः, **'उपांशुयाजमन्तरा यजति'** इत्युपांशुयागः **'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशुपौर्णमास्यां यजन्'** इति वाक्यात्पौर्णमास्यां विहितः। एतानि पौर्णमास्यां प्रधानानि। एषामाग्नेयाग्नीषोमीयोपांशुयागानां तत्तद्वाक्यावगतपौर्णमासीकालसम्बन्धं निमित्तीकृत्य **'य एवं विद्वान्पौर्णमासीं यजते'** इति विद्वद्वाक्ये पौर्णमासीपदेनैकवचनान्तेन समुदायरूपेणानुवादः। तेन वेदे यत्र यत्र पौर्णमासीशब्दस्तत्र तत्राग्नेयादिसमुदायोपस्थितिः।

ननु **'यदाग्नेयम्'** इति वाक्ये यागवाचकपदस्याश्रवणात्कथं यागविधायकत्वमिति चेत्, मैवम्, अग्निर्देवता अस्य पुरोडाशस्येत्यर्थे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विहितदेवतातद्धितान्त 'आग्नेय' शब्दः । तस्य पुरोडाशपदसमानाधिकरण्याद् द्रव्यदेवतासम्बन्धोऽवगतः । स यागमन्तरा न सम्भवति, द्रव्यदेवतासम्बन्धस्य यागादन्यत्र क्रियायामसम्भवात् यागक्रियायामेव सम्बन्धो वाच्यः । देवतोद्देशेन द्रव्यत्यागस्य यागरूपत्वाङ्गीकारात् । अतः श्रुतद्रव्यदेवतासम्बन्धानुमितो यागो यजेतेति कल्पितपदेन विधीयते- अग्निदैवत्यपुरोडाशद्रव्यकामावास्यादिकालकर्तव्ययागेनेष्टं भावयेदिति, एवं यत्र यत्र द्रव्यदेवतासम्बन्धमात्रं श्रूयते **'सौर्यं चरुं निर्वपेत्'** इत्यादौ, तत्र सूर्यदेवताचरुद्रव्यसम्बन्धानुमितो यागो विधीयत इति न कश्चिद्दोषः ।

ननूपांशुयागवाक्ये यजेः श्रवणेऽपि विधिप्रत्ययलिङादेरभावात्कथं विधायकत्वमिति चेत्, **मैवम्**, 'यजति' इत्यस्य 'यजेत' इति विपरिणामेन विधायकत्वसम्भवात् । एवं **'व्रीहीन् प्रोक्षति'**, **'समिधो यजति** इत्यादावपि विपरिणामो बोध्यः ।

केचित्तु-'यजति' इत्यस्य पञ्चमलकारत्वाङ्गीकाराद्विधायकत्वसम्भव इत्याहुः । तथा **'ऐन्द्रं दध्यमावास्यायां ऐन्द्रं पयोऽमावास्यायाम्'** इति वाक्यविहितौ सान्नाय्ययागौ **'यदाग्नेयम्'**-इति वाक्यविहिताग्नेयश्चामावस्यायां प्रधानानि ।

एतेषां त्रयाणां **'य एवं विद्वानमावास्यां यजते'** इति वाक्ये अमावास्यामिति नाम्ना द्वितीयैकवचनान्तेन समुदायरूपेणानुवादः । तेन वेदे यत्र 'दर्श'शब्दः 'अमावास्या' शब्दो वा श्रुतस्तत्र यागसमुदायोपस्थितिः । त्रिकस्य त्रिकस्यामावास्यापौर्णमासीशब्दाभ्यां समुदायरूपेण विद्वद्वाक्येऽनुवादस्य प्रयोजनं तु **'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'** इत्यादौ द्विवचनोपपत्तिः, अन्यथा षण्णामाग्नेयादियागानां बहुत्वात् 'दर्शपूर्णमासैः' इति बहुवचनं स्यात् । मानान्तरेण प्राप्तार्थस्य पुनः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रवणमनुवादः । तथा फलवदाग्नेयादिसन्निधावाम्नातानि प्रयाजाज्य-भागानुयाजादीनि षण्णां यागानामङ्गभूतानि ।

एवं स्थिते **'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'** इत्यस्यायमर्थः-दर्शपूर्णमासाभ्यां समुदायाभ्यां परस्परसहिताभ्यां स्वर्गापूर्वं कुर्यादिति । तत्र कथं कालद्वयवर्तिनोः समुदाययोः परस्परसाहित्यमित्याकाङ्क्षायां स्वरूपेण साहित्याभावेऽपि त्रिकात्रिकादेकैकमपूर्वं जायते, तद्द्वारा द्वयोः समुदाययोः साहित्यमुच्यते । एकैकस्य त्रिकस्यापि त्रिकापूर्वजनकत्वं कथमित्या-काङ्क्षायां प्रयाजानुयाजादिपूर्वोत्तराङ्गकलापविशिष्टस्यैकैकस्य त्रिकस्य समुदायापूर्वजनकत्वमुच्यते । एकैकत्रिकस्य सर्वाङ्गसाहित्यं स्वरूपेण न सम्भवतीति त्रिभिर्यागैस्त्रीण्युत्पत्त्यपूर्वाणि जायन्ते, तद्द्वारा सर्वाङ्गसाहित्यम् । अङ्गानामपि प्रयाजादीनां स्वरूपेण प्रधानसाहित्याभावात्तत्तदुत्पत्त्यपूर्वद्वारा साहित्यं वाच्यम् । तथा च प्रधानजन्योत्पत्त्यपूर्वाणां प्रयाजादिजन्योत्पत्त्यपूर्वैः साहित्यं यदस्ति तदेव प्रधानानामङ्गविशिष्टस्वरूपं साङ्गत्वम् । एवं च पौर्णमास्यामाग्नेयादिजन्यैस्त्रिभिरपूर्वैः प्रयाजादिजन्योत्पत्त्यपूर्वसचिवैः समुदायापूर्वमेकं जन्यते तथा दर्शेऽपि आग्नेयैन्द्रद्वयजन्यस्त्रिभिरपूर्वैरङ्गोत्पत्त्य-पूर्वसचिवैरेकं त्रिकापूर्वं जन्यते, ताभ्यां त्रिकापूर्वाभ्यां आग्नेयाद्युत्पत्त्यपूर्व-त्रितयजन्याभ्यां फलजनकीभूतं महापूर्वं फलापूर्वनामकं जन्यते, ततश्च फलमिति । तथा च सर्वाङ्गोपकृताभ्यां दर्शपूर्णमासाभ्यामपूर्वद्वारा स्वर्गं कुर्यादिति फलापूर्वनिष्पत्तये साङ्गप्रधानकर्तव्यताबोधको विधिः प्रयोग-विधिरिति सिद्धम् ।

पुनरपि विधिस्त्रिविधः-अपूर्वविधिः, नियमविधिः, परिसंख्या-विधिश्चेति ।

तत्र यो विधिरत्यन्ताप्राप्तमर्थं प्रापयति सः अपूर्वविधिः-यथा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

दर्शपूर्णमासप्रकरणे **'व्रीहीन् प्रोक्षति'** इति । एतद्विध्यभावे दर्शपूर्णमासीयव्रीहिषु प्रोक्षणं कथमपि न प्राप्नोति । एतद्विधिसत्त्वे तु तत्सम्बन्धिव्रीहिषु प्रोक्षणं प्राप्नोत्येवेत्यन्ताप्राप्तप्रोक्षणप्रापकत्वादयमपूर्वविधिः ।

यश्च पक्षे प्राप्तमर्थं नियमयति स नियमविधिः-यथा तत्रैव **'व्रीहिनवहन्ति'** इति । एतद्विध्यभावे दर्शपौर्णमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूलवैतुष्यकार्यायाऽवहननवत् कदाचिन्नखविदलनमपि प्राप्नुयादिति, तस्मिन्पक्षेऽवहननस्य प्राप्तेरभावात् कार्यान्यथोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् । सति त्वस्मिन्विधौ अवहननैव वैतुष्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्तत इति नियमविधिरयम् ।

न च वैतुष्यस्य नखविदलनेनापि सम्भवादवहननियमो व्यर्थः, प्रयोजनाभावादिति **वाच्यम्** । अवघातेनैव वैतुष्यकरणे किञ्चिददृष्टं जन्यत इति नियमादृष्टाङ्गीकारात्, नियमेन दृष्टकार्यालाभेऽप्यदृष्टस्योत्पत्तेः । तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते, तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यत इति कल्पनान्नियमापूर्वस्य न वैयर्थ्यम् । एवं सोमक्रयादिनियमेऽपि बोध्यम् ।

द्वयोः समुच्चित्य प्राप्तावितरनिवृत्तिफलको विधिः परिसंख्याविधिः-यथा चयनप्रकरणे **'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते'** इत्यश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः । एतद्विध्यभावे हि रशनाग्रहणप्रकाशको मन्त्रो रशनाऽऽदानप्रकाशनसामर्थ्यरूपाल्लिङ्गादश्वरशनाऽऽदान इव गर्दभरशनाऽऽदानेऽपि प्राप्नुयात् । सत्यस्मिन्विधौ अनेन मन्त्रेणाश्वरशनामेवाददीत, न तु गर्दभरशनाम्, सा तु तूष्णीमेव ग्राह्येति

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गर्दभरशनायां मन्त्रनिवृत्तिर्भवतीति द्वयोः समुच्चित्य प्राप्तावितरनिवृत्ति-फलकत्वादयं परिसंख्याविधिः । एवं **'पञ्च पञ्चनखा भक्ष्याः'** इत्यादावपि बोध्यम् ।

पूर्वं दर्शपूर्णमासाङ्गत्वं प्रयाजादीनामुक्तम् । तत्राङ्गत्वबोधक-प्रमाणानि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्या-भेदेन षट् ।

तत्र **'दध्ना जुहुयात्'** इत्यत्राऽग्निहोत्रवाक्यप्राप्तं होमं जुहुयादि-त्यनेनोद्दिश्य तत्करणत्वेन तृतीयाश्रुत्या दधि विधीयत इति श्रुत्या दध्नो-ऽङ्गत्वम् ।

लिङ्गं नाम सामर्थ्यम् । तच्च द्विविधम्-अर्थगतं शब्दगतं चेति । आद्यं यथा **'स्रुवेणावद्यति'** इत्यवदानसामान्यशेषत्वावगमेऽपि स्रुवस्य सामर्थ्यरूपाल्लिङ्गादाज्यसांनाय्यादिद्रवद्रव्यस्यावदानविशेषाङ्गत्वम्, स्रुवेण पुरोडाशाद्यवदानस्य कर्तुमशक्यत्वात् ।

शब्दगतं तु लिङ्गमर्थप्रकाशनसामर्थ्यम् यथा **'अग्नये त्वा जुष्टं निर्वपामि'** इतिमन्त्रस्य निर्वापप्रकाशनसामर्थ्यरूपाल्लिङ्गान्निर्वापाङ्गत्वम् । यस्य मन्त्रस्य यत्प्रकाशनसामर्थ्यं तस्य तदङ्गत्वम् । यथा **'बर्हिर्देवसदनं-दामि'** इति मन्त्रस्य बर्हिर्लवनप्रकाशनसामर्थ्यमिति शब्दसामर्थ्य-रूपाल्लिङ्गाद् दर्भलवनाङ्गत्वम् ।

पदान्तरसमभिव्याहारो वाक्यम्-यथा **'इषे त्वेति छिनत्ति'** इति । यत्र छेदनाङ्गत्वेन **'इषे त्वा'** इति मन्त्रो वाक्येन विधीयते । यद्वा **'अग्नये त्वा जुष्टम्'** इत्यत्रैव अग्नये त्वा जुष्टमित्यादीनां पदानां 'निर्वपामि' इत्यनेनैकवाक्यतापन्नत्वान्निर्वापाङ्गत्वम् ।

प्रकरणं नाम परस्पराकाङ्क्षा । यथा **'दर्शपूर्णमासाभ्यां स्वर्ग-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामो यजेत' इति । अत्र 'दर्शपूर्णमासाभ्यां स्वर्गापूर्वं कुर्यात्' इत्युक्ते भवत्याकाङ्क्षा-कथमाभ्यां स्वर्गापूर्वं कर्तव्यमिति । तथा फलवदाग्ने-यादिसंनिधौ '**समिधो यजति**', '**तनूनपातं यजति**', '**आज्यभागौ यजति**' इत्यादिभिः प्रयाजादयः फलरहिताः श्रुताः, तेषां स्ववाक्येषु फलाश्रवणाद्भवति प्रयोजनाकाङ्क्षा-किमेतेषां प्रयोजनमिति । ततश्च प्रयाजादीनां प्रयोजनाकाङ्क्षायां दर्शपूर्णमासयोः कथंभावाकाङ्क्षायां परस्पराकाङ्क्षालक्षणेन प्रकरणेन प्रयाजादीनां सर्वेषां दर्शपौर्णमासाङ्गत्वं निश्चीयते ।

स्थानं नाम संनिधिः, यथा सांनाय्यपात्रसंनिधौ '**शुन्धध्वम्**' इति मन्त्रस्य पाठात् संनिधानात्सांनाय्यपात्रप्रोक्षणाङ्गत्वम् ।

समाख्या यौगिकी संज्ञा, यथा अध्वर्युकाण्डप्रतिपादिते कर्मजाते आध्वर्यवसमाख्यावशादध्वर्योः कर्तृत्वेनाङ्गत्वम्, तथा '**ऐन्द्राग्नमेका-दशकपालं निर्वपेत्प्रजाकामः**' इत्यादिषु काम्येष्टिसमाख्यातेष्वैन्द्रा-ग्नादियागेषु काम्येष्टियाज्यानुवाक्याकाण्डसमाख्यावशात् '**उभा वामिन्द्राग्नी**' इत्यादीनां याज्यानुवाक्यत्वेन विनियोगः । विनियोगो नामाङ्गत्वेनान्वयः ।

श्रुत्यादीनामेकत्र समावेशे पूर्वपूर्वस्य प्राबल्यमुत्तरोत्तरस्य दौर्बल्यम् । यथा '**कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपतिष्ठते**' इत्यग्निहोत्रप्रकरणे श्रूयते । तत्र मन्त्रस्येन्द्रप्रकाशनसामर्थ्यरूपाल्लिङ्गा-दिन्द्रोस्थानाङ्गत्वे प्राप्ते 'ऐन्द्र्या' इति तृतीयाश्रुत्या 'गार्हपत्यम्' इति द्वितीयाश्रुत्या च गार्हपत्योपस्थानाङ्गत्वेन विधानाल्लैङ्गिक इन्द्रोपस्थाने विनियोगो बाध्यते । श्रुतिर्हि स्वतो विनियोजिका । लिङ्गं त्विन्द्र-प्रकाशनसामर्थ्यमालोच्य **ऐन्द्र्येन्द्रमुपतिष्ठते** इति श्रुतिकल्पनाद्वारा

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विनियोजकमिति वाच्यम्, तच्चात्र न संभवति ।

तथा **'स्योनं ते सदनं कृणोमि' 'तस्मिन्सीद'** इत्यत्र तस्मिन्निति तच्छब्दस्य पूर्ववाक्यार्थसापेक्षतया एकवाक्यत्वभानाद्वाक्यप्रमाणेन द्वयोरेकमन्त्रत्वं भाति, लिङ्गेन तु भिन्नमन्त्रत्वं भाति । आद्यस्य सदन-प्रकाशनसामर्थ्यात् **'तस्मिन्सीद'** इत्यस्य सादनप्रकाशकत्वात् । तत्र वाक्यापेक्षया लिङ्गस्य प्राबल्याद्वाक्यं बाधित्वा लिङ्गेन **'स्योनं ते'** इत्यस्य सदनाङ्गत्वं **'तस्मिन्सीद'** इत्यस्य सादनाङ्गत्वमिति निर्णयः ।

'स्योनं ते' इत्यस्य **'तस्मिन्सीद'** इत्यनेनैकवाक्यत्वबलाद्यथा-कथंचित्सादनसामर्थ्यरूपं लिङ्गं कल्पयित्वा 'अनेन विशिष्टमन्त्रेण सादनं कुर्यात्' इति श्रुतिः कल्पनीया । सदनप्रकाशनरूपप्रत्यक्षलिङ्गेन कल्पितया 'स्योनं त इत्यनेन सदनं कुर्यात्' इति श्रुत्या **'स्योनं ते'** इत्यस्य शीघ्रं सदने विनियोगे सति तेनैव मन्त्रस्य नैराकाङ्क्ष्याद्वाक्यप्रमाणाल्लिङ्गं कल्पयित्वा श्रुतिकल्पना प्रतिबध्यते विलम्बितत्वादिति लिङ्गेन वाक्यस्य बाधः ।

एवं वाक्येन प्रकरणस्य, प्रकरणात्क्रमस्य, क्रमात्समाख्यायाश्च बाधो वेदितव्यः । तथा श्रुत्या वाक्यादेरपि बाधः । तदेवमङ्गताबोधक-प्रमाणानि श्रुत्यादीनि निरूपितानि ।

तच्चाङ्गत्वं शेषत्वम् । पारार्थ्यमिति यावत् । परोद्देशेन प्रवृत्तकृति-व्याप्यत्वं पारार्थ्यम् । प्रयाजादीनां दर्शपूर्णमासोद्देशेन प्रवृत्तपुरुषकृति-व्याप्यत्वाल्लक्षणसङ्गतिः । दर्शादेः प्रयाजाद्युद्देशेन प्रवृत्तकृतिविषयत्वा-भावान्नातिव्याप्तिः । केवलप्रयाजानुद्दिश्य कस्यचिदपि पुरुषस्याप्रवृत्तेः ।

तान्यङ्गानि द्विविधानि-संनिपत्योपकारकाणि, आरादुपकारकाणि

Ganesh Vàrni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चेति ।

यान्यङ्गानि साक्षात्परम्परया वा प्रधानयागशरीरं निष्पाद्य तद्द्वारा तदुत्पत्त्यपूर्वोपयोगीनि तानि संनिपत्योपकारकाणि, यथा व्रीह्यादिद्रव्याणि तत्संयुक्तावहननप्रोक्षणादीनि, अग्न्यादिदेवतातत्संयुक्तयाज्यानुवाक्या-वचनादीनि च । अत्र प्रोक्षणादेर्व्रीहिगतातिशयद्वारा अवहननादेस्तुष-विमोकादिरूपादृष्टद्वारा, व्रीह्यादीनां पिष्टद्वारा पुरोडाशनिष्पादकत्वं तद्द्वारा यागशरीरतदुत्पत्त्यपूर्वहेतुत्वं च । याज्यानुवाक्यादेर्देवतासंस्कारद्वारा देवतायाश्च साक्षाद्यागशरीरनिर्वर्तकत्वं तद्द्वारा तदुत्पत्त्यपूर्वोपयोगित्वं च । यागस्य देवतोद्देशेन द्रव्यत्यागरूपत्वात् **'द्रव्यदेवते हि यागस्वरूपम्'** इति सिद्धान्ताच्च । एतानि सामवायकानीत्युच्यन्ते ।

आत्मसमवेतापूर्वजनकान्यारादुपकारकाणि-यथा प्रयाजाज्य-भागानूयाजादीनि । एतानि द्रव्यगतं देवगतागतं वा संस्कारं न जनयन्ति, किंत्वात्मगतमदृष्टं जनयन्तीत्यारादुपकारकाणि ।

तत्र सामान्यतः कर्म द्विविधम्-अर्थकर्म, गुणकर्म चेति ।

तत्र आत्मगतापूर्वजनकं कर्माऽर्थकर्म-यथाऽग्निहोत्रदर्शपूर्णमास-प्रयाजादिकम् ।

गुणकर्म संस्कारजनकम् । तच्च द्विविधम्-उपयुक्तसंस्कारकम्, उपयोक्ष्यमाणसंस्कारकं च ।

तत्र उपयुक्तसंस्कारकं प्रतिपत्तिकर्म । 'उपयुक्तस्य आकीर्णकरस्य द्रव्यस्य विहितदेशे प्रक्षेपः प्रतिपत्ति'रिति लक्षणात् । यथा इडाभक्षण-कृष्णविषाणाप्रासन-चतुरवत्तहोमादिकम् ।

नन्विडाभक्षणस्य प्रधानयागोपयुक्ताकीर्णकरपुरोडाशद्रव्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रक्षेपात्मकत्वात्प्रतिपत्तित्वं युक्तम्, होमस्य तु यागोपयुक्तद्रव्य-संस्कारकत्वाभावात्कथं प्रतिपत्तित्वम्, होमस्य यागसमानकालीनत्वेन होमसंस्कार्यस्य चतुरवत्तादेरुपयुक्तत्वाभावादिति **चेत्** ।

अत्राहुः-उपयुक्तसंस्कारमात्रं प्रतिपत्तिः, न तु प्रधानयागोप-युक्तत्वम् । तथा सति पशोर्विशसनानन्तरं वपाहृदयाद्युद्धरणकालक-र्तव्यलोहितशकृन्निरसनस्य प्रतिपत्तित्वाभावप्रसङ्गात्, यागोपयुक्तद्रव्य-प्रक्षेपरूपत्वाभावात् । तथा कृष्णविषाणाप्रासनस्यापि प्रतिपत्तित्वं न स्यात्, यागाङ्गभूतकण्डूयनोपयुक्तत्वेऽपि यागोपयुक्तत्वाभावात् । अतो यत्र क्वचनोपयोगमात्रं विवक्षितम्, यत्र क्वचिदुपयोगस्त्वत्राप्यस्ति, वपा-हृदयाद्युद्धरणेनोपयुक्तस्य पशोः संबन्धिनः शकृल्लोहितस्याऽऽकीर्णकरस्य प्रतिपत्त्यपेक्षत्वात् । एवं यथाकथंचिदुपयोगो होमस्थलेऽप्यस्ति ।

तथा हि, प्रतिपत्तिस्त्रिधा-प्रधानोत्तरकाला, प्रधानसमकाला, प्रधानपूर्वकाला चेति ।

तत्राद्या इडाभक्षणादिका ।

द्वितीया होमादिका । तथा हि-दर्शपूर्णमासप्रकरणे श्रूयते **'सकृदुपस्तृणाति' 'द्विर्हविषोऽवद्यति,' 'सकृदभिधारयति', 'चतुर-वत्तं जुहोति'** इति । तत्र चतुरवत्तवाक्ये होमानुवादेन चतुरवत्तद्रव्यं तत्साधनत्वेन न विधीयते, होमस्याप्राप्तत्वेनानुवादासंभवात् ।

न च 'यदाग्नेय' वाक्याद्धोमप्राप्तिः तद्वाक्यस्य यागविधायक-त्वात् । **न च** यागहोमयोरभेद इति **वाच्यम्**, देवतोद्देशेन द्रव्यत्यागस्य याग-शब्दार्थत्वात् प्रक्षेपस्य होमशब्दार्थत्वात् । तत्राग्नेयचोदनया यागस्य प्राप्तत्वेऽपि प्रक्षेपस्य शक्त्याऽप्राप्तत्वेनानुवादासंभवात्, किंतूपस्तरण-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्विरवदानाऽभिधारणवाक्यैः प्राप्तं चतुरवत्तमुद्दिश्य तत्संस्कारत्वेन प्रक्षेपो जुहोतीत्यनेन विधीयते । स च संस्कारः प्रतिपत्तिरूप एव । **'अग्नये जुष्टमभिधारयामि'** इत्यादिनिर्देशैर्यागाङ्गभूताग्न्यादिदेवतार्थतया यथाकथंचिदुपयुक्तस्य पुरोडाशस्य प्रतिपत्त्यपेक्षया तदवयवद्रव्यवदानकर्मक-प्रक्षेपस्य प्रतिपत्तिकर्मत्वौचित्यात् ।

स च संस्कारः प्रधानसमकालः । होमो हि **'वषट्कृते जुहोति'** इति विधानाद्वषट्कारोत्तरक्षणे अध्वर्युणा कर्तव्यः । यागोऽपि तस्मिन्नेव क्षणे यागस्मरणार्थेन वषट्कारेण स्मारितः सन् यजमानेनानुष्ठेय इति तयोर्यौगपद्यसंभवात् । तदिदं सर्वप्रदानाधिकरणवार्तिके स्थितम् ।

प्रधानपूर्वकाला प्रतिपत्तिर्यथा-**'शकृत्संप्रविध्यति' 'लोहितं निरस्यति'** इति शकृत्संप्रवेधनलोहितनिरसने । इदमपि 'पशावनालम्भाल्लोहितशकृतोरकर्मत्वम्' इत्यधिकरणे स्थितम् ।

उपयोक्ष्यमाणसंस्कारोऽप्यनेकविधः-साक्षाद्विनियुक्तसंस्कारः साक्षाद्विनियुक्तस्य यदुपकारकं तत्संस्कारः, विनियोक्ष्यमाणसंस्काराश्चेति ।

तत्र आद्यो यथा-**'व्रीहीनवहन्ति'** इत्यादिः । **'व्रीहिभिर्यजेत'** इति वाक्यविनियुक्तव्रीहीणामवहननसंस्कारः ।

द्वितीयो यथा-**'वत्समालभेत'** इति । दोहाङ्गत्वेन साक्षाद्विनियुक्तस्य गोद्रव्यस्योपकारको यो वत्सः तत्संस्कारकमिदमालम्भनम् ।

तृतीयो यथा-**'तप्ते पयसि दध्यानयति'** इति । अत्र **'सा वैश्वदेव्यामिक्षा'** इति वाक्येन तच्छब्देन निर्दिश्य वैश्वदेवयागाङ्गत्वेन विनियोक्ष्यमाणं यत्पयस्तत्संस्कारकत्वाद्विनियोक्ष्यमाणसंस्कारकं दध्यानयनम् । पशुपुरोडाशयागस्तूपयुक्तोपयोक्ष्यमाणदेवतासंस्कारार्थः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्यागांशे अदृष्टार्थश्च । अत्र तत्संस्कार्याग्नीषोमदेवताया वपायागे उपयुक्तार्थत्वात् हृदयाद्यङ्गयागेषु उपयोक्ष्यमाणत्वाच्च । स्विष्टकृद्यागो द्रव्यांशे देवतांशे चोपयुक्तसंस्कारार्थः, त्यागांशे अदृष्टार्थश्च । सूक्तवाकसाधनं प्रहरणमपि तथैव । उत्तमप्रयाजो यक्ष्यमाणदेवतासंस्कारत्वात्तदंशे उपयोक्ष्यमाणसंस्कारः, इतरांशे अदृष्टार्थः । हृदयादिहविर्यागात्पूर्वं क्रियमाणो वसाहोमोऽपि वशांशे प्रतिपत्तिः, इतरांशे अदृष्टार्थ इत्याद्यूह्यम् ।

केचित्तु-उपयोक्ष्यमाणसंस्कारभिन्नसंस्कारकर्मत्वं प्रतिपत्तिकर्मत्वम् । चतुरवत्तद्रव्यस्य होमेन भस्मीभूतस्य होमान्तरमुपयोक्ष्यमाणत्वाभावात् तद्भिन्नत्वं होमेऽस्तीति लक्षणसंगतिरित्याहुः ।

अत्रायं विशेषः-अर्थकर्मणि द्रव्यापेक्षया कर्मणः प्राधान्यम् । कर्मणि द्रव्यस्य गुणत्वम् । यथाऽग्निहोत्रादौ दध्यादेर्गुणत्वम् । गुणकर्मणि द्रव्यस्य प्राधान्यं, द्रव्ये च कर्मणो गुणत्वम् । **'व्रीहीन् प्रोक्षति, अवहन्ति'** इत्यादौ द्वितीयया व्रीहीणां क्रियासाध्यत्वप्रतीतेः क्रियापेक्षया द्रव्यस्य प्राधान्यं प्रोक्षणादिक्रियायास्तदपेक्षया गुणत्वमिति ।

पुनरपि गुणकर्म चतुर्विधम्-उत्पत्ति-आप्ति-विकृति-संस्कृतिभेदात् ।

तत्रोत्पत्तिसंस्कारो यथा-**'अग्नीनादधीत'** इति । मन्त्रविशेष सम्भारेषु निधापिता अप्याहवनीयादय उत्पद्यन्त इत्याहवनीयाद्युत्पत्ति हेतुभूतसंस्कारत्वादाधानस्य उत्पत्तिसंस्कारत्वम् ।

आप्तिसंस्कारो यथा-**'स्वाध्यायोऽध्येतव्यः'** इति । अध्ययनेन स्वाध्याय आप्यत इत्याप्तिसंस्कारोऽयम् ।

विकृतिर्यथा-**'व्रीहीनवहन्ति'** इति व्रीहिगतवैतुष्यरूपविकृति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जनकत्वादवहननं विकृतिसंस्कारकम् ।

संस्कृतिर्यथा-**'व्रीहीन् प्रोक्षति'** इति । [अत्र प्रोक्षणस्य व्रीहि-गतातिशयरूपसंस्कृतिजनकत्वात्संस्कृतिरूपगुणकर्मत्वम् ।] अत्राधान-मध्ययनं च स्वतन्त्रं गुणकर्म, न तु क्रत्वङ्गम् । प्रोक्षणादिकं सर्वं क्रत्वङ्गं गुणकर्मेति ध्येयम् ।

अर्थकर्म त्रिविधम्-नित्य-नैमित्तिक-काम्यभेदात् ।

तत्र **'यावज्जीवमग्निहोत्रं जुहोति', 'सायं जुहोति', 'प्रातर्जुहोति** इति जीवता पुरुषेण सायंप्रातःकालयोर्नियमेन कर्तव्यतया-ऽवगतमग्निहोत्रादिकं नित्यम् ।

'अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत्' इति दर्शपूर्ण-मासातिपत्तिनिमित्तकपथिकदिष्ट्यादिकं नैमित्तिकम् ।

नित्यनैमित्तिकयोरकरणे प्रत्यवाय एव । कृते फलं नास्तीति केचित् ।

अन्ये तु-दुरितनिवृत्तिः फलमस्ति, **'नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्'** इत्यादिवाक्यैः प्रत्यवायनिवृत्तेः फलत्वेन श्रूयमाणत्वात् ।

न चैवं तयोरपि काम्यत्वापत्तिः फलवत्त्वादिति **वाच्यम्,** फल-कामनापूर्वकानुष्ठानाभावात् । तत्तद्विधिवाक्ये फलकाममुद्दिश्य तदर्थ-फलसाधनत्वेन विधानाभावाच्च काम्यत्वानुपपत्तेः ।

काम्यमपि कर्म त्रिविधम्-केवलमैहिकफलकम्, आमुष्मि-कफलकम्, ऐहिकामुष्मिकफलकं चेति ।

तत्राद्यं यथा-कारीर्यादि । तत्तत्समयवर्तिशुष्यत्सस्यसंजीवन-हेतुवृष्टिकामेन क्रियते, न कालान्तरभाविवृष्टिकामेन जन्मान्तरीयवृष्टि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कामेन वा ।

केवलामुष्मिकफलकं यथा-स्वर्गाद्यर्थं दर्शपूर्णमासादिकम् । स्वर्गस्य इहलोकभोग्यत्वाभावात् ।

ऐहिकामुष्मिकसाधारणफलकं यथा-'**वायव्यं श्वेतमालभेत भूतिकामः**' इति भूत्यादिफलकमित्यन्यत्र विस्तरः ।

ननु दर्शपूर्णमासादिकर्मणां व्रीह्यादिद्रव्याणां च प्रत्यक्षत्वेन लौकिकत्वात्कथं वेदस्यालौकिकार्थबोधकत्वमिति चेत्-न, कर्मणां प्रत्यक्षत्वेऽपि तेषां स्वर्गादिफलसाधनत्वमप्रत्यक्षमिति 'तत्फलसाधनतया तत् कर्म कर्तव्यम्' इत्येवं फलसाधनतया कर्मकर्तव्यताबोधकस्य वेदस्यालौकिकार्थबोधकत्वात् । एवं व्रीह्यादीनां यागादिक्रियासाधनत्वं न प्रत्यक्षवेद्यमिति तद्बोधकस्यापि वेदवाक्यस्यालौकिकार्थबोधकत्वमिति न दोषः ।

इदानीं विधिवाक्यस्य विधायकत्वप्रकारः कथ्यते । तत्र '**स्वर्गकामो यजेत**' इत्यत्र यजिधातोरुपरितने तप्रत्यये धर्मद्वयमस्ति-आख्यातत्वं, लिङ्त्वं चेति । तत्राख्यातत्वं सर्वलकारसाधारणम्, तदवच्छेदेन लिङ्प्रत्ययः पुरुषप्रवृत्तिरूपामर्थभावनां प्रतिपादयति ।

सा चार्थभावना किं, केन, कथमिति अंशत्रयविशिष्टा । तथा हि-यजेतेत्यत्र प्रथमं प्रत्ययेन 'भावयेत्' इति प्रतीयते । सुबन्ताभिहितानां सर्वेषां कारकाणां तिङन्तार्थक्रियान्वयनियमे सति तिङन्तार्थस्य प्राधान्यात्। तत्र च प्रकृत्यर्थापेक्षया प्रत्ययार्थस्य प्राधान्यात्प्रथमं प्रत्ययार्थभावनाया उपस्थितिर्युक्ता । ततः करोति-समानार्थकभावयतेः सकर्मकत्वात् 'किं भावयेत्' इति कर्माकाङ्क्षायां भिन्नपदोपात्तोऽपि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वर्गो भाव्यत्वेनान्वेति । भाव्यत्वेन कर्मत्वेनेत्यर्थः । साध्यत्वेनेति यावत् । न तु समानपदोपात्तोऽपि धात्वर्थो भाव्यत्वेनान्वेति । दुःखात्मकस्य यागस्येप्सिततमत्वरूपकर्मत्वायोग्यत्वात् । स्वर्गस्य त्वानन्दात्मत्वेनेप्सिततमतया कर्मत्वेनान्वययोग्यत्वात् । ततश्च 'स्वर्गं भावयेत्' इति बोधो भवति । ततः 'केन' इति करणाकाङ्क्षायां समानपदोपात्तो यागः करणत्वेनान्वेति-'यागेन स्वर्गं कुर्यात्' इति । ततः 'कथं यागेन स्वर्गं कुर्यात्' इति कथंभावाकाङ्क्षायाम्-अग्न्यन्वाधानावहननादिजन्यादृष्टोपकारेण प्रयाजादिजनितादृष्टोपकारेण च सहितेन यागेन स्वर्गं कुर्यादिति अग्न्यन्वाधानप्रयाजादिकमङ्गजातमितिकर्तव्यतयान्वेति । कथंभावाकाङ्क्षापूरकत्वमितिकर्तव्यतात्वम् । यथा 'ओदनकामः पचेत्' इत्यत्र लिङा भावना प्रतीयते । 'किं भावयेत्' इत्याकाङ्क्षायां ओदनो भाव्यत्वेनान्वेति, 'केन' इत्याकाङ्क्षायां पाकेनेति लभ्यते, 'कथम्' इत्याकाङ्क्षायां तृणफूत्कारसहितेनेति । ततश्च तृणफूत्कारद्युपकृतेन पाकेन (तेजःसंयोगेन) ओदनं भावयेदिति वाक्यार्थः संपद्यते तद्वद्वेदेऽपि बोध्यम् ।

सैषा शाब्दी भावनापि अंशत्रयविशिष्टा । तत्र पुरुषप्रवृत्तिरूपार्थभावना भाव्यत्वेनान्वेति । अध्ययनावगतलिङादिकं करणत्वेनान्वेति । अर्थवादप्रतिपाद्यप्राशस्त्यज्ञानमितिकर्तव्यतात्वेनान्वेति । तत्र 'साङ्गवेदाध्येतारोऽधीतव्याकरणनिगमनिरुक्तादिवशाद् व्युत्पत्तिमन्तः पुरुषा अध्ययनगृहीतस्वाध्यायगतलिङादिभिः प्राशस्त्यज्ञानसचिवैर्यागाद्यर्थं स्वकर्तव्यत्वेन बुद्ध्वा यागादीननुतिष्ठेयुः' इति शाब्दभावनाबोधः । अनुतिष्ठेयुः अनुष्ठानं कुर्युरित्यर्थ । अनुष्ठानं प्रवृत्तिः । तेन पुरुषप्रवृत्तेः शाब्दभावनाभाव्यत्वमक्षतम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इयं च शब्दभावना ज्योतिष्टोमादिप्रातिस्विकवाक्येषु स्वरूपे प्रतीयमाना कर्तव्यत्वेन न प्रतीयते । अर्थभावनाया एव तेषु कर्तव्यत्वावगमात्, किंतु **'स्वाध्यायोऽध्येतव्यः'** इति वाक्य एव कर्तव्यत्वेन प्रतीयते । **न चात्रार्थभावनाया एव विधेयत्वमिति वाच्यम्** । **'स्वाध्यायोऽध्येतव्यः'** इति वाक्यस्यार्थभावनाया एव सकलविधिवाक्यस्थशब्दभावनारूपत्वात् ।

तथाहि-अधिपूर्वकात् 'इङ् अध्ययने' इति धातोः कर्मणि तव्यप्रत्ययो विहितः । कर्म च स्वाध्यायः प्रधानम् । तत्संस्कारकमध्ययनं गुणकर्म । व्रीहिसंस्कारकप्रोक्षणादिवत् । अध्ययनजनितग्रहणसंस्कारविशिष्टस्वाध्यायस्य प्रयोजनाकाङ्क्षायां स्वाध्यायगततत्तल्लिङादिविशिष्टवाक्यसामर्थ्यलभ्यं यदनुष्ठानौपयिकं यागादिरूपार्थज्ञानं तदेव दृष्टत्वात्, तत्तत्कर्मानुष्ठानद्वारा स्वर्गादिरूपालौकिकश्रेयःसाधनत्वाच्च प्रयोजनम् । कर्मावबोधं विना कर्मानुष्ठानायोगात् । न त्वदृष्टं प्रयोजनम्, दृष्टफले संभवत्यदृष्टफलकल्पनाऽयोगात् । तथा च स्वाध्यायविधिनैव स्वाध्यायगतविधिवाक्यगतलिङादिप्रतिपादिता सर्वाः शाब्दभावना अंशत्रयविशिष्टाः कर्तव्यत्वेन विधीयन्ते । साङ्गवेदाध्ययनेन व्युत्पन्नाः पुरुषाः अध्ययनगृहीतस्वाध्यायगतलिङादिभिरर्थवादावगतप्राशस्त्यरूपाङ्गसचिवैः फलवद्यागादिकर्तव्यतां बुद्ध्वा यागादीननुतिष्ठेयुरिति । अनुतिष्ठेयुः प्रवृत्तिं कुर्युरित्यर्थः । तत्र पुरुषप्रवृत्तेर्भाव्यत्वेनान्वयात्, अध्ययनावगतलिङादेः करणत्वेनान्वयात् प्राशस्त्यज्ञानस्येतिकर्तव्यतात्वेनान्वयात्, शब्दभावनाया अपि अंशत्रयवैशिष्ट्यमर्थभावनाया इवेष्टम् ।

तत्र समीहितस्वर्गादिभाव्यकत्वभानमपि विधिवशादेव । प्रवर्तनापरो विधिः यागादेः पुरुषार्थासाधनत्वे तत्र पुरुषं प्रवर्तयितुं न

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शक्नोतीति स्वभाव्यपुरुषप्रवृत्तिविषयस्य यागादेः पुरुषाभिलषित-स्वर्गादिसाधनत्वमापादयति । अन्यथा स्वस्य प्रवर्तनापरत्वमेव न स्यात् । प्रवृत्तिहेतुव्यापारस्यैव प्रवर्तनात्वात् । लङादिस्थले तु प्रवर्तनात्मकविधेर-भावादार्थभावनायाः पुरुषार्थभाव्यत्वनियमो नास्ति ।

भावनात्वं नाम भवितुः प्रयोजकव्यापारत्वम् । तत्रार्थभावनायां भवितुर्जायमानस्य स्वर्गादेः प्रयोजकव्यापारत्वाल्लक्षणसङ्गतिः । शाब्द-भावनायामपि पुरुषप्रवृत्तिरूपस्य भवितुः प्रयोजकव्यापारत्वाल्लक्षण-सङ्गतिः ।

ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र यागेन स्वर्गं भावयेदित्यर्थवर्णने ज्योतिष्टोमपदस्य कथमन्वय इति **चेत्, न,** भावना-करणत्वेनाभिमतयागनामत्वेनान्वयात् 'ज्योतिष्टोमनामकेन यागेन' इति ।

ननु कथं तन्नामत्वमिति **चेत्,** ज्योतिराख्यास्त्रिवृदादिस्तोमा अस्मिन्सन्तीति व्युत्पत्त्या । यागस्य त्रिवृदादिस्तोमसंबन्धः केनावगम्यत इति चेत्, **'त्रिवृत् पञ्चदश सप्तदश स्तोमाः'** इति वाक्यान्तरेण एतच्छब्दार्थस्य तत्संबन्धावगमात् । एवं शास्त्रोक्तैस्तत्प्रख्यादिभिर्हेतुभिस्तत्र तत्र नामत्वं बोध्यम् ।

शास्त्रे हि तत्प्रख्य-तद्व्यपदेश-यौगिक-वाक्यभेदैश्चतुर्भिर्नामत्वं प्रतिपादितम् ।

तथाहि-'अग्निहोत्रं जुहोति' इत्यत्र अग्निहोत्रशब्देन अग्नि-देवतारूपो गुणो न विधीयते, **'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति'** इति वाक्यविहितेन मन्त्रेण देवतायाः प्राप्तत्वात् । किंतु अग्निप्रख्यापकं [अग्निप्रापकं] यच्छास्त्रान्तरं **'अग्निर्ज्योतिर्ज्योति-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

रग्निः' इत्यादिकं, तेन प्राप्तमग्निसंबन्धं निमित्तीकृत्य अग्नये होत्रं होमोऽस्मिन्निति बहुव्रीहिणा अग्निहोत्रपदस्य होमनामधेयत्वम् । **न च** होमस्य प्रत्ययवाच्यार्थभावनायां करणत्वात् तन्नामत्वे 'अग्निहोत्रेण' इति तृतीया स्यात्, 'ज्योतिष्टोमेन' इतिवदिति **वाच्यम्,** द्वितीयाया एव लक्षणया करणार्थकत्वात्, 'नासाधितं करणम्' इति न्यायेन असाधितस्य करणत्वायोगात् अर्थात्प्राप्तहोमगतसाध्यत्वानुवादकत्वेन वा द्वितीयोपपत्तेरिति तत्प्रख्यन्यायादत्र नामधेयत्वम् ।

तथा **'श्येनेनाभिचरन् यजेत'** इत्यत्र श्येनपदं यागनामधेयं, न तु यागाङ्गत्वेन श्येनपक्षिरूपगुणविधिः । **'यथा ह वै श्येनो निपत्यादत्ते एवमेवायं द्विषन्तं भ्रातृत्वं निपत्यादत्ते यमभिचरति श्येनेन'** इत्युपमानोपमेयव्यपदेशानुपपत्तिप्रसङ्गात् । 'श्येनपक्षी यथा पक्ष्यन्तरं निपत्यादत्ते एवमयमपि श्येननामकः कर्मविशेषो भ्रातृत्वं शत्रुं निपत्यादत्ते' इति व्यपदेशः कर्मनामत्वपक्ष एव युज्यते । यागाङ्गतया श्येनपक्षिविधौ तु स्वस्य स्वेनैवोपमानोपमेयभावः स्यात्, स चायुक्तः । तस्माच्छ्येनतुल्यताव्यपदेशाच्छ्येनपदं कर्मनाधेयम्, ततश्च 'अभिचरन् शत्रुवधकामः श्येननामकेन यागेन अभिचारं भावयेत्' इति वाक्यार्थः ।

नन्वेवमप्यभिचारस्यापि वेदोक्तत्वादभिचारिके कर्मण्यास्तिकानामपि प्रवृत्तिः स्यादिति **चेत्, न,** वेदोक्तोऽप्यभिचारो वेदविहितो न भवति, फलत्वात् । 'फलं न विधेयं किंतु फलमुद्दिश्य तत्साधनत्वेन कर्मैव विधेयम्' इति सिद्धान्तात् । अतोऽभिचारस्याविहितत्वेन प्रत्यवायजनकत्वम् ।

एवं **'उद्भिदा यजेत पशुकामः'** इत्यत्र पशुरूपफलाय विधित्सितस्य यागस्य उद्भित्पदं नामधेयम्, न तु यथाकथंचित्प्राप्तयागमुद्दिश्य तदङ्गतयोद्भि-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

द्रूपगुणविधिः । दध्यादिवदुद्भिन्नामकस्य गुणस्याप्रसिद्धत्वात् । यागे तु 'उद्भिद्यते फलमनेन' इति योगसम्भवाद्यागनामत्वम् ।

ननु 'उद्भिद्यते भूमिरनेन' इति योगवशेन खनित्रादावप्युद्भिदः प्रयोगसम्भवात् खनित्रादिगुणविधिः किं न स्यादिति **चेत्**, न, एतादृश-स्थले गुणविधिः क्वापि वक्तुं न शक्यते । विरुद्धत्रिकद्वयसमावेशाख्य-दोषप्रसङ्गात् ।

तथा हि-'**उद्भिदा यजेत पशुकामः**' इत्यत्र मानान्तरेणाप्राप्तस्य यागस्यानुवादासंभवात्, पशुकर्मकभावनायां करणत्वेन यागो विधेयः-'यागेन पशून् भावयेत्' इति । ततश्च यागस्य विधेयत्वम् । फलं प्रति च शेषतया प्रतीयमानत्वाद् गुणत्वम् । शेषतया अङ्गतयेत्यर्थः । फलसिद्ध्यर्थं पुंसाऽनुष्ठीयमानत्वादुपादेयत्वमिति विधेयत्व-गुणत्वोपादेयत्वात्मकमेकं त्रिकं यागेऽस्ति । तथा यागोद्देशेनोद्भिद्गुणविधौ विधित्सितगुणापेक्षया प्राधान्यम्-उद्देश्यत्वम्-अनुवाद्यत्वं चेति द्वितीयं त्रिकम् । तदेतत् त्रिकद्वयं परस्परविरुद्धमेकस्मिन्यागे प्रसज्येत, अतो न गुणविधिः ।

न च 'सोमेन यजेत' इत्यत्र विरुद्धत्रिकं विनैव सोमशब्दस्य सोमवति यागे लक्षणामङ्गीकृत्य 'सोमवता यागेनेष्टं भावयेत्' इति सोमविशिष्टयागविधानाद्यथा सोमरूपगुणविधिः, तद्वदुद्भित्पदस्यापि मत्वर्थलक्षणयोद्भिद्विशिष्टयागविधानादत्रोद्भिद्गुणविशिष्टयागविधिः स्यादिति **वाच्यम्** । सोमादौ गत्यन्तराभावात् मत्वर्थलक्षणया विशिष्ट-विध्यङ्गीकारात् । उद्भिदादौ नामत्वेन गतिसंभवाद्विशिष्टविध्यङ्गी-कारायोगात् । तस्माद्योगवशादुद्भिदादीनां नामत्वम् ।

तथा '**चित्रया यजेत पशुकामः**', इत्यत्र चित्रापदं (वाक्य-भेदभयात्) प्राजापत्ययागनामधेयम् । '**दधि मधु घृतमापो धानास्त-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ण्डुलास्ततसंसृष्टं प्राजापत्यम्' इत्यत्र 'तत्संसृष्टं प्राजापत्यम्' इति सामानाधिकरण्याद्यो दध्यादिद्रव्यषट्कस्य प्रजापतिदेवतासंबन्धः श्रुतस्तेनानुमितो यागो विधीयते। विहितस्य यागस्य फलाकाङ्क्षायां 'चित्रया यजेत' इति वाक्यं फलसंबन्धविधायकम्। तत्र फलार्थत्वेन पुनर्विधिरिति तस्य प्राजापत्ययागस्य दध्यादिविचित्रद्रव्यकत्वाच्चित्रापदं कर्मनामधेयम्। न तु **'अग्नीषोमीयं पशुमालभेत'** इति वाक्याप्राप्तं पशुयागं 'यजेत' इत्यनूद्य चित्रत्वस्त्रीत्वगुणद्वयविधानम्। मानान्तरप्राप्तं कर्मोद्दिश्य तत्रानेकगुणविधाने वाक्यभेदात्। तदुक्तम्-

'प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः' इति।

मानान्तराप्राप्ते कर्मणि त्वनेकदेवताष्टाकपालपुरोडाशामावस्यापौर्णमास्याद्यनेकगुणविशिष्टो द्रव्यदेवतासंबन्धेनानुमितो यागो विधीयत इति सिद्धान्तः। तदुक्तम्-

'अप्राप्ये तु विधीयन्ते बहवोऽप्येकयत्नतः' इति।

अथ यथा **'पशुना यजेत'** इत्यत्र मानान्तरप्राप्तयागमुद्दिश्य तदङ्गतया 'पशुना' इत्येकपदोपात्तानां पशुद्रव्यतद्गतलिङ्गसंख्यानां त्रयाणां वाक्यभेदं विनैव विधिरङ्गीकृतः, तद्वदत्राप्येकपदोपात्तचित्रत्व-स्त्रीत्वविशेषितपशुद्रव्यकारकस्य विधानान्न वाक्यभेदः। अत एव तत्र विधेयस्य पशोरुपादेयत्वात्तद्गतमेकत्वं यज्ञाङ्गतया विवक्षितमित्येकेनैव पशुना यष्टव्यम्, **'ग्रहं संमार्ष्टि'** इत्यत्र उद्देश्यगतत्वादेकत्वमविवक्षितमिति सिद्धान्तप्रवादः। कथं, 'ग्रहं संमार्ष्टि' इत्यत्र 'ग्रहम्' इति द्वितीयया ग्रहस्येप्सिततमत्वेनोद्देश्यत्वात्, प्रयोजनत्वाच्च प्राधान्यं गम्यते। संमार्गस्तु ग्रहं प्रति गुणभूतः। 'प्रतिप्रधानं गुण आवर्तनीयः' इति न्यायात् 'यावन्तो ग्रहास्तेषां सर्वेषां संमार्गः' इति निश्चये सति, 'कति ग्रहाः संमार्जनीयाः'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इति बुभुत्साया अभावादुद्देश्यगतमेकत्वं श्रूयमाणमप्यविवक्षितम् । यद्युच्येत नेदमुद्देश्यगतं किंतु स्वयं विधेयम्-'ग्रहं संमृज्यात्', 'यं संमृज्यात्तं चैकम्' इति । तथा सति विधेयभेदाद्वाक्यभेदः स्यात् । तथा-बुभुत्साया अभावात् विधानाऽयोगाच्चोद्देश्यगता संख्या न विवक्षिता ।

उद्देश्यगतमपि विशेषणं किंचिद्विवक्षितं यस्य विशेषणस्य विवक्षां विना उद्देश्यप्रतीतिर्न पर्यवस्यति । यथा-तत्रैव ग्रहत्वं विवक्षितम् । तद्विवक्षां विना उद्देश्यस्वरूपस्य ज्ञातुमशक्यत्वात् । तेन ग्रहजातीय-साधनकसोमयागापूर्वार्थत्वाच्चामसेषु न संमार्ग इति स्थितम् ।

'पशुना यजेत' इत्यत्र यागं प्रति पशुर्विधेयत्वाद् गुणभूतः । प्रतिगुणं प्रधानावृत्तिर्नास्तीति कियद्भिः पशुभिः यागः कर्तव्य इत्या-काङ्क्षायां एकवचनेन प्रतीयमानं विधेयगतमेकत्वं विवक्षितं बुभुत्सि-तत्वात् ।

किंच लिङ्गसंख्याविशेषितस्य पशुद्रव्यरूपकारकस्य एकपदोपा-त्तस्य विधेयत्वाद्विधेयपशुद्वारा तद्गतलिङ्गसंख्यादेरपि क्रियाङ्गत्वादेकत्वं विवक्षितम् । अथवा तृतीयया विभक्त्याऽभिहितयोर्लिङ्गसंख्ययो-र्विभक्त्यभिहिततया करणकारकशक्त्याऽऽत्मसात्कृतयोः प्रातिपदिकार्थ-पशुद्रव्येण संबन्धमनादृत्य तद्वदेव साक्षात्क्रियाङ्गत्वेन विधाने सति पश्चादरुणैकहायनीन्यायेन परस्परमन्वयः । यागाङ्गत्वेन विहितो यः पशुः स एकः पुमांश्चेति ।

यथा **'अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति'** इत्यत्र कारकाणां क्रियान्वयनियमात् करणविभक्तिभिररुण्यपिङ्गाक्षीत्वादीनां चतुर्णां परस्परमनन्वितानामेव सोमक्रयणाङ्गत्वेनान्वये सति आरुण्यादे-र्गुणस्यामूर्तस्य स्वतः क्रियासाधनत्वायोगात् क्रियासाधनैकहायानीगो-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिच्छेदकत्वेन पश्चात् परस्परं पार्ष्णिकान्वयः-या एकहायनी गौः सा पिङ्गाक्षी अरुणेति तद्वत्।

तदेवमुद्देश्यगतविशेषणमविवक्षितम्, उपादेयगतं विवक्षितमिति स्थितम्। एवं च चित्रापदेन चित्रत्वस्त्रीत्वोभयविशेषितपशुकारकस्य यजेतेतिपदानूदितेऽग्नीषोमीयपशुयागे विधातुं शक्यत्वात् कथं नामत्वमिति चेत्, न।

तथा सति प्रकृतस्य प्राजापत्ययागस्य फलसंबन्धाकाङ्क्षस्य हानम्, अप्रकृतस्याऽग्नीषोमीययागस्य कल्पना च स्यात्। तद्द्वयमयुक्तम्, तस्माच्चित्रापदं कर्मनामधेयम्। एवं तत्प्रख्यादिभिरन्यतमेन सर्वत्र कर्मनामत्वमूह्यम्। इत्थं विधिवाक्यस्य प्रामाण्यं विचारितम्।

अथार्थवादो विचार्यते। अर्थवादानां तु स्वार्थपरत्वे प्रयोजनाभावादध्ययनविधिवशेन फलवदर्थज्ञानार्थत्वस्यावश्यकत्वाद्विधेयगतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यतया प्रामाण्यम्। स च चतुर्विधः-निन्दा-प्रशंसा-परकृति-पुराकल्पभेदात्।

तत्र निन्दार्थवादो यथा-'**असत्रं वा एतद्यदच्छन्दोगम्**', '**अश्रुजं हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सराद् गृहे रुदन्ति**' इत्यादिः।

प्रशंसा यथा-'**शोभतेऽस्य मुखं य एवं वेद,**' '**वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति**' इत्येवमादिः।

परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादकोऽर्थवादः परकृतिः-यथा '**अग्निर्वा अकामयत**' इत्यादिः।

परप्रवक्तृकार्थादिप्रतिपादकः पुराकल्पः, यथा-'**तमशपद्धिया**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

धिया त्वा बध्यासुः' इत्यादिः ।

तत्र निन्दार्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यपरत्वम् । 'अश्रुजम्' इत्यादिरजतनिन्दाद्वारा च विधेयभूतरजतदाननिषेधप्राशस्त्यपरत्वे विरोधाभावात् । इतरेषां त्रयाणां साक्षात्प्राशस्त्यपरत्वमेव । 'वायुर्वै' इत्यर्थवादस्य वायुः क्षिप्रगामित्वादतीव प्रशस्ता देवता, अतस्तद्दैवत्यं कर्म प्रशस्तमिति विधेयदेवतागतप्राशस्त्यप्रतिपादनद्वारा विध्येकवाक्यत्वम् ।

'अग्निर्वा अकामयत' इत्यस्य अग्निदैवत्यो यागः पूर्वकाले अग्निना कृतत्वात्प्रशस्तः, आस्तिक्यादिदानीमप्यन्यैर्यजमानैरवश्यं कर्तव्य इति विधेयकर्मगतप्राशस्त्यद्वारा विध्येकवाक्यत्वम् । एवमन्यत्राप्यूह्यम् ।

क्वचित्कार्यान्तरमप्यस्ति, यथा—'अक्ताः शर्करा उपदधाति' इति विधौ 'अक्ताः' इति पदेन द्रवद्रव्यसामान्यं प्रतीयते । तच्च द्रव्यं किमिति संदेहे 'तेजो वै घृतम्' इत्यर्थवादात् घृतमिति निश्चीयत इति, 'तेजो वै घृतम्' इत्यर्थवादस्य संदिग्धार्थनिर्णायकत्वेन प्रामाण्यम् । इत्यर्थवादविचारः ।

अथ मन्त्रविचारः । मन्त्राणामप्यध्ययनविधिना कृत्स्नस्वाध्यायस्य फलवदर्थज्ञानार्थत्वमेव, न त्वदृष्टार्थत्वम् । दृष्टे संभवत्यदृष्टकल्पनाऽयोगात् । प्रयोगकाले कर्मज्ञानं विना कर्मानुष्ठानायोगात् कर्मोपयिकमर्थज्ञानं मन्त्रैः क्रियते ।

न चोपदेष्टृवचनादिनाप्यर्थस्मरणसंभवादनुष्ठानोपपत्तिरिति वाच्यम् । मन्त्रैरेवार्थं स्मृत्वानुष्ठाने सति फलं संभवति नान्यथेति नियमाङ्गीकारात्, नियमेनादृष्टस्याङ्गीकारात्, तदभावे तज्जन्यादृष्टलोपे तन्मूलकं फलं न सिद्ध्यतीति कल्पनात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नन्वेवं मन्त्राणां स्वप्रकाश्येऽर्थे विनियोग इति फलितम्। विनियोगो नाम शेषत्वेनान्वयः। शेषत्वं नामाङ्गत्वम्। ततश्च **'इमामगृभ्णन्रशनाम्'** इति मन्त्रस्य रशनाग्रहणसामर्थ्यमस्तीति रशनाग्रहणप्रकाशनसामर्थ्य-रूपाल्लिङ्गादेव रशनाग्रहणाङ्गत्वोपपत्तेः **'इमामगृभ्णन्रशना मृतस्येत्य-श्वाभिधानीमादत्ते'** इति वचनं किमर्थमिति **चेत्, न,** परिसंख्यार्थत्वात्। चयनप्रकरणेऽश्वरशनाग्रहणं गर्दभरशनाग्रहणं चेति द्वयमस्ति। तत्र लिङ्गादश्वरशानायां मन्त्रप्राप्तावुच्यमानायां लिङ्गाविशेषाद् गर्दभरशनायामपि मन्त्रः प्राप्तः। अतोऽश्वरशनायामेव मन्त्रः कार्यो न गर्दभरशनायामिति मन्त्र निवृत्तिरूपपरिसंख्यार्थोऽयं विधिः।

सा च परिसंख्या त्रिदोषा-स्वार्थत्यागः, परार्थस्वीकारः प्राप्तबाधश्चेति भेदात्। **'अश्वाभिधानीमादत्ते'** इति वाक्यस्य अनेन मन्त्रेणाश्वरशनाऽऽदानं कुर्यादिति स्वार्थः, स च त्यक्तः। गर्दभरशनातो मन्त्रनिवृत्तिः परार्थः, स च स्वीकृतः। गर्दभरशनायामपि लिङ्गात्प्राप्तस्य मन्त्रस्य अनेन बाधश्च-इति त्रिदोषा परिसंख्या गत्यभावादङ्गीकृता। गत्यन्तरे सति सा न युक्ता।

एवमष्टदोषदुष्टविकल्पोऽप्यगतिकोऽङ्गीकृतः। यथा-यदाग्ने-योऽष्टाकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः। तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायामनियमेन यस्यकस्यचिद् द्रव्यस्य प्राप्तौ **'व्रीहिभिर्यजेत'** इति वाक्याद् व्रीहयो नियम्यन्ते, एवं **'यवैर्यजेत'** इति वाक्याद्यवा अपि नियम्यन्ते, तयोरेकार्थत्वाद्विकल्पः।

एवं **'अतिरात्रे षोडषिनं गृह्णाति'** इत्यतिरात्रे षोडशिग्रहो विहितः। तथा **'नाऽतिरात्रे षोडशिनं गृह्णाति'** इति प्रतिषेधाद् ग्रहणाभावो विहितः। तयोर्ग्रहणाग्रहणयोः परस्परविरुद्धयोरेकस्मिन्प्रयोगेऽनुष्ठातुमशक्यत्वा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्क्वचित्प्रयोगे ग्रहणानुष्ठानम्, प्रयोगान्तरे तदभावानुष्ठानमिति तत्रापि विकल्पः ।

स चाष्टदोषदुष्टः । तथा हि—पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः १ । अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः २ । ततो द्वितीयप्रयोगे यवानुष्ठाने पूर्वं त्यक्तं यत्प्रामाण्यं तत्स्वीकारः ३ । स्वीकृतं यदप्रमाण्यं तत्परित्यागश्चेति ४ यवशास्त्रे चत्वारो दोषाः । एवं पूर्वं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत्प्रामाण्यं तत्परित्यागः ५ । अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः ६ । पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः ७ । स्वीकृताप्रामाण्यपरित्यागश्चेति ८ व्रीहिशास्त्रे चत्वारो दोषाः इत्यष्टदोषदुष्टो विकल्पः ।

स च विकल्पः क्वचिदेकार्थत्वात्, एककार्यकारित्वादित्यर्थः । यथा व्रीहियवयोरेकैकस्य पुरोडाशनिष्पादनक्षमत्वाद्विकल्पः ।

क्वचिद्वचनबलात्, यथा-'**बृहत् पृष्ठं भवति**' इति बृहत्सामसाध्यं पृष्ठनामकं स्तोत्रं विहितम्, '**रथन्तरं पृष्ठं भवति**' इति रथन्तरसामसाध्यं पृष्ठस्तोत्रान्तरं विधीयते ।

स्तोत्रं च प्रयाजादिवदपूर्वार्थत्वादर्थकर्म । साम तु संस्कारकर्मत्वाद् गुणकर्म । स्तोत्रसाधनीभूतस्तोत्रीयाक्षराभिव्यक्तिरूपसंस्कारद्वारा साम्नां स्तोत्रसाधनत्वाङ्गीकारात् । प्रगीतमन्त्रसाध्यमिन्द्रादिगुणिनिष्ठगुणाभिधानं स्तोत्रम्, प्रगीतमन्त्रसाध्यं सामाभिव्यक्तऋगक्षरसाध्यमित्यर्थः । अप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रम् । गानक्रियाविशेषः साम । स्तोत्रसाधनीभूता ऋचः स्तोत्रीयाः । तदेतत्त्रिवृत्पञ्चशत्वादिसंख्याविशेषः स्तोम इत्येषां भेदः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा च बृहद्रथन्तरपृष्ठयोर्भिन्नापूर्वार्थत्वेन एकार्थत्वाभावेऽपि **'बृहदा पृष्ठं कार्यं, रथन्तरं वा पृष्ठं कार्यम्'** इति वचनबलादेव विकल्पः।

क्वचिद्व्यवस्थित विकल्पः । द्वितीयप्रयाजादिकर्मणि नाराशंसतनूनपान्मन्त्रयोरेकार्थत्वाद्विकल्पः । स च **'राजन्यवसिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषाम्'** इति वाक्याद् व्यवस्थित इति व्यवस्थितविकल्पः ।

तदेवं चोदनापरपर्यायाणां विधिवाक्यानामंशत्रयविशिष्टभावना-विधायकत्वात्प्रामाण्यम्, उद्भिदादीनां नामतया, अर्थवादानां विधेय प्राशस्त्यपरतया, मन्त्राणामनुष्ठेयार्थस्मारकतया प्रामाण्यमिति कृत्स्नस्य वेदस्यालौकिके धर्माधर्माख्येऽर्थप्रामाण्यं स्थितम् । इति वेदप्रामाण्य-विचारः ।

मन्वादिप्रणीतानां स्मृतीनामपि वेदमूलकत्वादस्याष्टकादौ धर्मे प्रामाण्यम् । **'औदुम्बरी सर्वा वेष्टयितव्या'** इति स्मृतिरप्रमाणम्, **'औदुम्बरीं स्पृष्ट्वोद्गायेत्'** इति प्रत्यक्षश्रुतिविरुद्धत्वात् । सर्ववेष्टने सति श्रुत्युक्तस्पर्शनस्य कर्तुमशक्यत्वात् । **'वैसर्जनहोमीयं वासोऽध्व-र्युर्गृह्णाति'** इत्यादिस्मृतिरप्रमाणम्, श्रुत्यर्थाविरुद्धत्वेऽपि लोभमूलक-त्वात्।

तथा शिष्टाचारोऽपि स्मृतिद्वारा श्रुतिमूलकत्वात्प्रमाणम् । मातुलसुतापरिणयनादिशिष्टाचारस्त्वप्रमाणम् ।

'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां तद्वत्त्यक्त्वा चान्द्रायणं चरेत्'

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यादिस्मृत्या निषिध्यत्वेन स्मृतिविरुद्धत्वात् । तदेवं श्रुति-स्मृत्याचाराणां धर्माधर्मयोः प्रामाण्यमुक्तम् ।

स च धर्मः परस्परं भिन्नः । भेदकप्रमाणानि तु शब्दान्तरादीनि ।

तथा हि—याग-दान-होमानां यजति-ददाति-जुहोतीत्यपर्याय-शब्दप्रतिपाद्यत्वाच्छब्दान्तराद्भेदः । स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं दानम् ।

'समिधते यजति' इत्यादीनां पञ्चानां वाक्यानां मध्ये एकस्य कर्मविधायकत्वम्, अन्येषां तस्मिन्कर्मणि गुणविधायकत्वम्, इत्यत्र नियामकाभावात्सर्वेषां कर्मविधायकत्वे स्थिते विहितस्य कर्मणः पुनर्विधानं व्यर्थमिति पुनर्विधानसामर्थ्यात् पूर्ववाक्यविहितकर्मापेक्षयोत्तरोत्तरवाक्यविहितस्य कर्मणो भेदः सिद्ध्यतीत्येतादृशस्थलेष्वविशेषपुनःश्रुतिरूपात् 'यजति' पदाभ्यासात् कर्मभेदः ।

'तिस्र आहुतीर्जुहोति' इत्यत्र जुहोतिपदाभ्यासाभावेऽपि जुहोतीत्यर्थे होमे त्रित्वसंख्यान्वयात्परस्परं भिन्नास्त्रयो होमा इति संख्ययाऽत्र कर्मभेदः ।

तथा कुण्डपायिनामयने श्रूयते-**'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'** इति । अत्र पूर्वं कर्म किंचिदपि संनिहितं न भवति अपूर्वकर्म-संनिधानरूपात्प्रकरणान्तरात्प्रसिद्धाग्निहोत्रधर्मकं तन्नामकं कर्मान्तरं विधीयते । न त्वग्निहोत्रशब्देन प्रसिद्धाग्निहोत्रमनूद्य गुणविधिः । प्राप्ते कर्मणि आनन्तर्यमासरूपानेकगुणविधौ वाक्यभेदापत्तेरिति प्रकरणान्तरादत्र कर्मभेदः । प्रसिद्धाग्निहोत्रं नैयमिकाग्निहोत्रम् नित्याग्निहोत्रमिति यावत् । तदेवं शब्दान्तराभ्यास-संख्या-संज्ञा-गुण-प्रकरणान्तरैः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कर्मभेदो दर्शितः । इति कर्मभेदनिरूपणम् ।

तत्र वेदादिप्रमेयोऽर्थस्त्रिविधः-क्रत्वर्थः, पुरुषार्थ, उभयार्थश्चेति । तत्र प्रयाजादिकं केवलं क्रत्वर्थः, फलं तत्करणं च पुरुषार्थः-यथा ज्योतिष्टोमादिः, स्वर्गश्च । दध्यादि तूभयरूपं-'**दध्ना जुहुयात्**' इति फलासंयुक्तवाक्येन क्रत्वर्थत्वात् '**दध्नेन्द्रियकामस्य जुहुयात्**' इत्यनेन फलाय विधानात्पुरुषार्थत्वात् । तदुक्तं-'**एकस्य तूभयरूपत्वे संयोग-पृथक्त्वम्**' इति । संयोगो वाक्यं तस्य पृथक्त्वं भेदः । स चैकस्य उभयार्थत्वे नियामक इत्यर्थः ।

क्रत्वर्थे प्रयाजादौ क्रतुः प्रयोजकः । पुरुषार्थे फलं प्रयोजकम् । प्रयोजकत्वं नामानुष्ठापकत्वमित्यर्थः ।

विधिर्यदर्थं यदनुष्ठापयति स तत्र प्रयोजकः । दर्शादिविधिः स्वर्गार्थं दर्शादिकमनुष्ठापयतीति स्वर्गादिर्दर्शादौ प्रयोजकः । प्रयाजादि-विधिः प्रयाजान्दर्शाद्यर्थं अनुष्ठापयतीति दर्शादिः प्रयाजानां प्रयोजकः । दध्यानयनविधिः दध्यानयनमामिक्षार्थमनुष्ठापयति, न वाजिनार्थम् । आमिक्षार्थं दध्यानयनानुष्ठाने सति वाजिनस्य स्वतःसिद्धत्वात् । अत आमिक्षैव दध्यानयने प्रयोजिका, न वाजिनम् ।' '**पुरोडाशकपालेन तुषानुपवपति**' इति तुषोपवापाङ्गत्वेन पुरोडाशकपालं विधीयते, तथापि तुषोपवापः कपालस्य प्रयोजको न भवति, पुरोडाशार्थमुपात्तेनैव कपालेन तुषोपवापसिद्धेः, किंतु पुरोडाश एव कपालस्य प्रयोजक इत्याद्यूह्यम् । इति प्रमेयादिनिरूपणम् ।

ननु विधिना साङ्गं प्रधानं कर्तव्यतया चोद्यते । तत्राङ्गानां प्रधानानां च कर्मणां बहुत्वात्क्रमेणानुष्ठानं वाच्यम् । तत्क्रमनियामकं प्रमाणं किमिति चेत्, न, श्रुत्यादीनामेव क्रमनियामकत्वात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथा हि–'**अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति**' इत्यत्र क्त्वाश्रुत्या गृहपतिदीक्षानन्तरं ब्रह्मदीक्षेति श्रौतक्रमः ।

'**अग्निहोत्रं जुहोति, यवागूं पचति**' इत्यत्र यवागूपाकस्य होमार्थत्वेन पाकात्पूर्वं होमस्य कर्तुमशक्यत्वात् पाठक्रमं त्यक्त्वा-ऽर्थक्रमः स्वीकर्तव्यः । अर्थः प्रयोजनं होमादिरूपं तदर्थं क्रमः अर्थक्रमः । तेन पूर्वं पाकः पश्चाद्धोमः ।

'**समिधो यजति**', '**तनूनपातं यजति**' इत्यादौ विधिवाक्य-पाठक्रमादेव समिदादियागानुष्ठानक्रमः ।

तथा ज्योतिष्टोमे औपवसथ्यमहरारभ्य क्रमेणानुष्ठेयानां अग्नीषो-मीय-सवनीयानुबन्ध्यानां पशूनां त्रयाणां साद्यस्काख्ये सोमयागे '**सहपशूनालभेत**' इत्येकदाऽनुष्ठानलक्षणं साहित्यं बोधितम्, तदपि सवनीयस्य स्थाने विहितम् । तत्र प्राकृतक्रमं परित्यज्य सवनीयस्य स्थाने साहित्यविधानादादौ सवनीयपशोरुपाकरणम् ततोऽग्नीषोमीयस्य, ततोऽनुबन्ध्यायाः इति स्थानात्क्रमः । सुत्यादिवसात्पूर्वमहरौपवसथ्यम् ।

तथा दर्शे सांनाय्यधर्माणां शाखाच्छेदादीनां पूर्वम्, आग्नेयधर्माणां निर्वापादीनां च अनन्तरं प्रवृत्तावपि मुख्ययोराग्नेयसांनाय्ययागयोर्मध्ये आग्नेययागस्य पूर्वमनुष्ठानान्मुख्ययागक्रमेणादावाग्नेयपुरोडाशस्य प्रयाज-शेषाभिधारणम् ततः पयसोऽभिधारणम्, इति मुख्ययागक्रमादभि-धारणक्रमः ।

तथा '**सप्तदश प्राजापत्यान् पशूनालभते**' इत्यत्र सप्तदश-पशुद्रव्यकप्रजापतिदेवताकाः सप्तदश यागाः कर्तव्यत्वेन बोधिताः, तत्रोपाकरणाख्य आद्यः पदार्थो यतः कुतश्चिदारभ्य यत्र क्वचित्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समामनीयः । नियोजनादिकं तु येन क्रमेण उपाकरणं प्रवृत्तं तेनेव क्रमेण कर्तव्यम् । कथम् ? प्रकृतावग्नीषोमीयपशोरेकत्वेन उपाकरणमादौ कृत्वा द्वितीयक्षण एव नियोजनम्, तृतीयक्षण एव प्रोक्षणम् व्यवधानप्रयोजकाभावात् । अत्र तु सप्तदशपशूनां सहानुष्ठेयत्ववचनात्प्रथमतो यत्र क्वचित्पशौ कृतमुपाकरणं स्वाश्रयकर्तव्यनियोजनाय षोडशभिः क्षणैर्व्यवधानं सहते, न त्वधिकम् । तत्रोपाकरणक्रमेण नियोजनं प्रथमपशावकृत्वा पश्वन्तरे नियोजनं कृत्वाऽनन्तरं प्रथमपशौ नियोजनकारणे षोडशक्षणाधिकक्षणव्यवधानं शास्त्राननुमतमापद्येत । तन्निरासायोपाकरणं येन क्रमेण प्रवृत्तं तेनैव नियोजनादिकं कार्यमिति प्रवृत्तिक्रमः ।

इत्येवं श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिक्रमैरेव कर्मानुष्ठानम् । अन्यथानुष्ठाने वैगुण्यमित्यलम् ॥

॥ इति श्रीकृष्णयज्वकृता मीमांसापरिभाषा समाप्ता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वेदान्तसारः

अध्याय-१

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च । अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः । तत्रानुबन्धो नामाधिकारिविषयसम्बन्धप्रयोजनानि । अधिकारी तु विधिवदधीतवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनापुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ।

काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि । निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि । नित्यान्यकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि । नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि । प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि ।

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनमुपासनानां तु चित्तै-काग्र्यं, **"तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन"** इत्यादिश्रुतेः **"तपसा कल्मषं हन्ति"** इत्यादिस्मृतेश्च । नित्यनैमित्तिकयो-रुपासनानां त्ववान्तरफलं पितृलोकसत्यलोकप्राप्तिः **"कर्मणा पितृ-लोकः विद्यया देवलोक"** इत्यादिश्रुतेः । साधनानि नित्यानित्य-वस्तुविवेकेहामुत्रार्थफलभोगविरागशमादिषट्कसम्पत्तिमुमुक्षुत्वानि ।

नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु ततोऽन्य-दखिलमनित्यमिति विवेचनम् । ऐहिकानां स्रक्चंदनवनितादिविषय-भोगानां कर्मजन्यतयानित्यत्ववदामुष्मिकाणामप्यमृतादिविषय-भोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः । शमादयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः । शमस्तावच्छ्रवणा-दिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः । दमो बाह्येन्द्रियाणां तद्व्यतिरिक्त-विषयेभ्यो निवर्तनम् । निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमण-मुपरतिरथवा विहितानां कर्मणां विधिना परित्यागः । तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता । निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा । मुमुक्षुत्वं मोक्षेच्छा ।

एवम्भूतः प्रमाताधिकारी **"शान्तो दान्त"** इत्यादिश्रुतेः । उक्तं च—

"प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्विताया नुगताय सर्वदा प्रदेयमेतत् सततं मुमुक्षवे" ॥

इति । (उपदेशसाहस्री १६.७२)

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां तात्पर्यात्। सम्बन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाण्यस्य च बोध्यबोधकभावः। प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च **"तरति शोकमात्मवित्"** इत्यादिश्रुतेः **"ब्रह्मविद् ब्रह्मैव भवति"** इत्यादिश्रुतेश्च।

अयमधिकारी जननमरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति **'समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं'** इत्यादिश्रुतेः। स गुरुः परमकृपया अध्यारोपापवादन्यायेनैनमुपदिशति, **"तस्मै स विद्वानुपसन्नाय प्राह"** इत्यादिश्रुतेः।

अध्याय-२

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः। वस्तु सच्चिदानन्दानन्ताद्वयं ब्रह्म। अज्ञानादिसकलजडसमूहोऽवस्तु। अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् **'देवात्मशक्तिं स्वगुणैर्निगूढाम्'** इत्यादिश्रुतेश्च। इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते। तथा च यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः, **'अजामेकाम्'** इत्यादिश्रुतेः। इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानाभासकत्वात् **'य सर्वज्ञः सर्ववित्'** इति श्रुतेः। ईश्वरस्येयं समष्टिरखिलकारणत्वात् कारणशरीर-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मानन्दप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति चोच्यते ।

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यवपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथा ज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः **'इन्द्रो मायाभिः पुरुरूप ईयत'** इत्यादिश्रुतेः । अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः । इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना । एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एकाज्ञानावभासकत्वात् । अस्य प्राज्ञत्वमस्पष्टोपाधितयाऽनतिप्रकाशकत्वात् । अस्यापीयमहङ्कारादिकारणत्वात् कारणशरीरमानन्दप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमिति चोच्यते ।

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानन्दमनुभवत **'आनन्दभुक् चेतोमुखः प्राज्ञः'** इति श्रुतेः, 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इत्युत्थितस्य परामर्शोपपत्तेश्च ।

अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाऽभेदः । एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वा अभेद **'एष सर्वेश्वर'** इत्यादिश्रुतेः ।

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वाऽऽधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते **'शिवमद्वैतं चतुर्थं मन्यन्ते'** इत्यादिश्रुतेः ।

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ।

अस्य अज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम् । आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्यमण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम् । तदुक्तम्–

''घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद् भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा'' ॥

इति । (हस्तामलकः–१०)

अनयैवावरणशक्त्यावच्छिन्नस्यात्मनः कर्तृत्वभोक्तृत्वसुखदुःखमोहात्मकतुच्छसंसारभावनापि सम्भाव्यते यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना ।

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपञ्चमुद्भावयति, तादृशं सामर्थ्यम् । तदुक्तम्–

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत् । इति

शक्तिद्वयमदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति । यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति ।

तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाश आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते **'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत'** इत्यादिश्रुतेः । तेषु जाड्याधिक्यदर्शनात्तमःप्रधान्यं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्कारणस्य । तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यन्ते । एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते । सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि । अवयवास्तु ज्ञानेन्द्रियपञ्चकं, बुद्धिमनसी, कर्मेन्द्रियपञ्चकं, वायुपञ्चकञ्चेति । ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि । एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते ।

बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः । मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः । अनयोरेव चित्ताहङ्कारयोरन्तर्भावः । एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् । इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति । अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते । मनस्तु ज्ञानेन्द्रियैः सहितः सन्मनोमयकोशो भवति ।

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि । एतानि पुनराकाशादीनां रजोंऽशेभ्यो व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । वायवः प्राणापानव्यानोदानसमानाः । प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती । अपानो नामावाग्गमनवान्पाय्वादिस्थानवर्ती । व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती । उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः । समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः । केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये वायवः सन्तीति वदन्ति । तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुत्करः । देवदत्तो जृम्भणकरः । धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्तर्भावात् प्राणादयः

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पञ्चैवेति केचित्। एतत्प्राणादिपञ्चकमाकाशादिगतरजोंऽशेभ्यो मिलितेभ्यः उत्पद्यन्ते। इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति। अस्य क्रियात्मकत्वेन रजोंऽशकार्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्राणमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति। एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते। अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति।

एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा, हिरण्यगर्भः, प्राणश्चेत्युच्यते सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च। अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं, जाग्रद्वासनामयत्वात्स्वप्नोऽत एव स्थूलप्रपञ्चलयस्थानमिति चोच्यते।

एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नोऽत एव स्थूलशरीरलयस्थानमिति चोच्यते।

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः **'प्रविविक्तभुक् तैजस'** इत्यादिश्रुतेः। अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाऽभेदः। एवं सूक्ष्मशरीरोत्पत्तिः।

स्थूलभूतानि तु पञ्चीकृतानि। पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमिकान् पञ्चभागान् प्रत्येकं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु संयोजनम् । तदुक्तम्-

'द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्च ते ॥' इति ।

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च 'वैशेष्यात्तद्वादस्तद्वादः' इति न्यायेनाकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावाग्नौ शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामानामुपर्युपरिविद्यमानानामतल-सुतल-रसातल-तलातल-महातल-पातालनामकानामधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्वर्तिचतुर्विधस्थूलशरीराणां तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति ।

चतुर्विधशरीराणि तु जरायुजाण्डजोद्भिज्जस्वेदजाख्यानि । जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि । अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि । उद्भिज्जानि भूमिमुद्भिद्य जातानि कक्षवृक्षादीनि । वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि । अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति । एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च । अस्यैषा समष्टिः स्थूलशरीरम् अन्नविकारत्वादन्नमयकोशः स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते ।

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानम-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परित्यज्य स्थूलशरीरादिप्रविष्टत्वात् ।

अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते ।

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धान्, अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दान्, चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतो । **'जागरितस्थानो बहिःप्रज्ञः'** इत्यादिश्रुतेः ।

अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः । एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः । एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान् प्रपञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वाऽवान्तरजलाशयानां समष्टिरेको महान् जलाशयः । एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तरजलाशयगतप्रतिबिम्बाकाशवच्चैकमेव । आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायःपिण्डवदविविक्तं सदनुपहितं चैतन्यं 'सर्वं खल्विदं ब्रह्म' इति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ।

अध्याय ३

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अतिप्राकृतस्तु **'आत्मा वै जायते पुत्रः'** इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकस्तु **'स वा एष पुरुषोऽन्नरसमय'** इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति। अपरश्चार्वाकः **'ते ह प्राणाः प्रजापतिं पितरमेत्य ब्रूयुः'** इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकः **'अन्योऽन्तर आत्मा प्राणमय'** इत्यादिश्रुतेः प्राणाभाव इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावान् इत्याद्यनुभवाच्च प्राणा आत्मेति वदति। अन्यस्तु चार्वाकः **'अन्योऽन्तर आत्मा मनोमय'** इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति। बौद्धस्तु **'अन्योऽन्तर आत्मा विज्ञानमय'** इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्राभाकरतार्किकौ तु **'अन्योऽन्तर आत्माऽनन्दमय'** इत्यादि श्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहं ज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः। भाट्टस्तु **'प्रज्ञानघन एवानन्दमय'** इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति। अपरो बौद्ध- **'असदेवेदमग्र आसीत्'** इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति। एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतैरतिप्राकृतादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु, पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव। किञ्च **प्रत्यग-**

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादि-प्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्य्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव । अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्तु इति वेदान्तविद्वदनुभवः । एवमध्यारोपः ।

अध्याय ४

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद् वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् । तदुक्तम्-

सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ॥ इति ।

तथाहि—एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति । एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपाऽपञ्चीकृतभूतमात्रं भवति । एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्रमेण तत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति । एतदज्ञानमज्ञानोपहितं चैतन्यञ्चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ।

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति । तथाहि—अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति । अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति । एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ।

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसीति वाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति । सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति । तदुक्तम्—

'सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥' इति ॥

सामानाधिकरण्यसम्बन्धस्तावद्यथा 'सोऽयं देवदत्तः' इत्यस्मिन् वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन् पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः । विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशेषणविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दायंशब्दयोस्तदर्थयोर्वाविरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः । तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्व-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते।

अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते। तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्लपट्यादिभेदव्यावर्तकतयाऽन्योन्यविशेषणविशेष्यभावसंसर्गस्यान्तरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात् तद्वाक्यार्थः सङ्गच्छते। अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य च वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते। तदुक्तम्-

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः॥

(पञ्चदशी, ७, ७५)

अत्र 'गङ्गायां घोषः प्रतिवसति' इति वाक्यवज्जहल्लक्षणापि न सङ्गच्छते। तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद् भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते।

न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षणा न संगच्छत इति **वाच्यम्**। तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात् ।

अत्र 'शोणो धावति' इति वाक्यवदजहल्लक्षणापि न सम्भवति । तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तत्परित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति । अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवादजहल्लक्षणा न सम्भवत्येव । **न च** तत्पदं त्वंपदं वा स्वार्थविरुद्धांशपरित्यागेनांशान्तरसहितं त्वंपदार्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति **वाच्यम्** । एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया असम्भवात् पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ।

तस्माद्यथा 'सोऽयं देवदत्त' इति वाक्यं तदर्थो वा तत्कालतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा 'तत्त्वमसि' इति वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ।

अथाधुना 'अहं ब्रह्मास्मि' इत्यनुभववाक्यार्थो वर्ण्यते । एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति । सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते । तदा पटकारणतन्तुदाहे पटदाहवदखिलकार्य-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति । तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखण्डचित्तवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत् प्रत्यगभिन्नपरब्रह्ममात्रं भवति । एवं च सति **'मनसैवानुद्रष्टव्यं'** **'यन्मनसा न मनुते'** इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् । तदुक्तम्-

फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥ इति ।

'स्वयं प्रकाशमानत्वान्नाभास उपयुज्यत' इति च ।

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति । तथाहि-अयं इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरस्सरं स्वगतचिदाभासेन जडघटमपि भासयति । तदुक्तम्-

बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ इति

यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरस्सरं स्वप्रभया तदपि भासयतीति ।

अध्याय-५

एवं स्वभूतस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमननिदिध्यासन समाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते । श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीये वस्तुनि तात्पर्यावधारणम् । लिङ्गानि तूपक्रमोप-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि । तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरण-प्रतिपाद्यस्याद्वितीयवस्तुनः **'एकमेवाद्वितीयम्'** इत्यादौ **'ऐतदात्म्यमिदं सर्वम्'** इत्यन्ते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनो मध्ये **तत्त्वमसी**ति नवकृत्वः प्रतिपादनम् । प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तरा-विषयीकरणम् ।

फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र **'आचार्यवान् पुरुषो वेद तस्य तावदेव वारं यावन्न विमोक्ष्येऽथ सम्पत्स्ये'** इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते ।

प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्रैव **'उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञानं विज्ञातम्'** इत्यद्वितीयवस्तुप्रशंसनम् ।

प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र **'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'** इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ।

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरत-मनुचिन्तनम् ।

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

निदिध्यासनम् ।

समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति । तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । तदा मृण्मयगजादिभानेऽपि मृद्भानवद् द्वैतभानेऽप्यद्वैतं वस्तु भासते । तदुक्तम्—

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओम् ॥

इति । (उपदेशसाहस्री, १०.१)

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकारकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम् । तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ।

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः। तत्र अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि । रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः । इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः । अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा । तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् । समाधिस्तूक्तः सविकल्पक एव ।

अस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

श्चत्वारो विघ्नाः सम्भवन्ति । लयस्तावदखण्डवस्त्वनवलम्बनेन चित्त-वृत्तेर्निद्रा । अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः । लयविक्षेपाभावेऽपि चित्तवृत्तेर्रागादिवासनया स्तब्धीभावादखण्डवस्त्व-नवलम्बनं कषायः । अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः समाध्यारम्भसमये सविकल्पका-नन्दास्वादनं वा । अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते । तदुक्तम्-

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयाच्छमप्राप्तं न चालयेत् ॥

नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् । इति ।
'यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।' इति च ।

अध्याय ६

अथ जीवन्मुक्तलक्षणमुच्यते । जीवन्मुक्तो नाम स्वस्वरूपाखण्ड-ब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञान-तत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।

'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादिश्रुतेः ।

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरे-णान्ध्यमान्द्यापदत्वादिभाजनेनेन्द्रियग्रामेणाशनापिपासाशोकमोहादि-भाजनेनान्तःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ज्ञानाविरुद्धाब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति। यथेन्द्रजालमिति ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। **'सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव'** इत्यादिश्रुतेः। उक्तं च—

सुषुप्तवज्जाग्रति यो न पश्यति, द्वयं च पश्यन्नपि चाद्वयत्वतः।
तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः॥ इति।

अस्य ज्ञानात्पूर्वं विद्यमानानामेवाहाराविहारादीनामनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा। तदुक्तम्—

'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥' इति
'ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः' इति च।

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्तन्ते। तदुक्तम्—

'उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः॥ इति।

किं बहुनाऽयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः संस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते। **'न तस्य प्राणा उत्क्रामन्ति' 'अत्रैव समवलीयन्ते', 'विमुक्तश्च विमुच्यते'** इत्यादिश्रुतेः।

इति श्रीमत्परमहंसपरिव्राजकाचार्यसदानन्दविरचितो
वेदान्तसारः समाप्तः।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तर्कसंग्रहः

निधाय हृदि विश्वेशं, विधाय गुरुवंदनम्
बालानां सुखबोधाय, क्रियते तर्कसंग्रहः ॥

द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावाः सप्तपदार्थाः ।

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव ।

रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-संस्काराश्चतुर्विंशतिर्गुणाः ।

उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चकर्माणि ।

परमपरं चेति द्विविधं सामान्यम् ।

नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।

समवायस्त्वेक एव ।

अभावश्चतुर्विधः-प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

तत्र गन्धवती पृथिवी । सा द्विविधा - नित्याऽनित्या च । नित्या परमाणुरुपा । अनित्या कार्यरूपा । पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषाणादिः ।

शीतस्पर्शवत्य आपः । ता द्विविधाः-नित्याः अनित्याश्च । नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः । पुनस्त्रिविधाः-शरीरेन्द्रियविषय-भेदात् । शरीरं वरूणलोके प्रसिद्धम् । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।

उष्णस्पर्शवत्तेजः । तच्च द्विविधम्-नित्यमनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णतारायग्रवर्ति । विषयश्चतुर्विधो भौमदिव्योदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरूदर्यम् । आकरजं सुवर्णादि ।

रूपरहितः स्पर्शवान्वायुः । स द्विविधः नित्योऽनित्यश्च । नित्यः परमाणुरुपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः-शरीरेन्द्रिय-विषय-भेदात् । शरीरं वायुलोके प्रसिद्धं । इन्द्रियं स्पर्शग्राहकं त्वक् सर्व-शरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसंचारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात् 'प्राणापानादि' संज्ञां लभते ।

शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यं च ।

अतीतादिव्यवहारहेतुः कालः । स चैकौ विभुर्नित्यश्च ।

प्राच्यादिव्यवहारहेतुर्दिक् । सा चेका नित्या विभ्वी च ।

ज्ञानाधिकरणमात्मा । स द्विविधः-जीवात्मा परमात्मा चेति । तत्रेश्वरः, सर्वज्ञः परमात्मा एक एव । जीवस्तु प्रतिशरीरं भिन्नो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विभुर्नित्यश्च।

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

चक्षुर्मात्रग्राह्यो गुणो रूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात्सप्तविधम्। पृथिवीजलतेजोवृत्ति। तत्र पृथिव्यां सप्तविधम्। अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।

रसनाग्राह्यो गुणो रसः। स च मधुराम्ल-लवण-कटु-कषाय-तिक्तभेदात् षड्विधः। पृथिवीजलवृत्तिः। तत्र पृथिव्यां षड्विधः। जले मधुर एव।

घ्राणग्राह्यो गुणो गन्धः। स द्विविधः। सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।

त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः, शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।

रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च। अन्यत्रापाकजं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।

एकत्वादिव्यवहारहेतुः संख्या। सा नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यन्ता। एकत्वं नित्यमनित्यं च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्। द्वित्वादिकं तु सर्वत्रानित्यमेव।

मानव्यवहारासाधारणं कारणं परिमाणम्। नवद्रव्यवृत्ति। तच्चतुर्विधम्-अणु महद्दीर्घं ह्रस्वं चेति।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम्। सर्वद्रव्यवृत्ति।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।

संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः ।

परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टय-मनोवृत्तिनी । ते च द्विविधे । दिक्कृते कालकृते चेति । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।

आद्यपतनासमवायिकारणं गुरुत्वं, पृथिवीजलवृत्ति ।

आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । पृथिव्यप्तेजोवृत्ति । तद् द्विविधं-सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।

चूर्णादिपिण्डीभावहेतुगुर्णः स्नेहः । जलमात्रवृत्तिः ।

श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।

सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च ।

संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।

तद्भिन्नं ज्ञानमनुभवः । स द्विविधो- यथार्थोऽयथार्थश्च ।

तद्वति तत्प्रकारकोऽनुभवो यथार्थः । सैव प्रमेत्युच्यते ।

तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः ।

यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् ।

असाधारणं कारणं करणम् ।

कार्यनियतपूर्ववृत्ति कारणम् ।

कार्यं प्रागभावप्रतियोगि ।

कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् ।

यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य । पटश्च स्वगतरूपादेः ।

कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणम-समवायिकारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।

तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवेमादिकं पटस्य ।

तदेतत् त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।

तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) इन्द्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षम् । तद् द्विविधम्-निर्विकल्पकं सविकल्पकं चेति ।

तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् ।

सप्रकारकं ज्ञानं सविकल्पकम् । यथा डित्थोऽयं, ब्राह्मणोऽयं, श्यामोऽयमिति ।

प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसंनिकर्षः षड्विधः-संयोगः, संयुक्त-समवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायो, विशेषणविशेष्यभावश्चेति ।

चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

घटरूपप्रत्यक्षजनने संयुक्तसमवायः संनिकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः संनिकर्षः ।

चक्षुः संयुक्ते घटे रुपं समवेतं, तत्र रूपत्वस्य समवायात् ।

श्रोत्रेण शब्दसाक्षात्कारे समवायः संनिकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वाच्छब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् । शब्दत्वसाक्षात्कारे समवेतसमवायः संनिकर्षः । श्रोतसमवेते शब्दे शब्दत्वस्य समवायात् ।

अभावप्रत्यक्षे विशेषणविशेष्यभावः संनिकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एवं संनिकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं, तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् ।

अनुमानपरिच्छेदः ।

अनुमितिकरणमनुमानम् ।

परामर्शजन्यं ज्ञानमनुमितिः ।

व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा 'वह्निव्याप्यधूमवानयं पर्वत' इति ज्ञानं परामर्शः । तज्जन्यं 'पर्वतो वह्निमानि'ति ज्ञानमनुमितिः ।

यत्र यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।

अनमानं द्विविधं-स्वार्थं परार्थं च ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वार्थ स्वानुमितिहेतुः । तथाहि-स्वयमेव भूयोदर्शनेन यत्र यत्र धूमस्तत्र तत्राग्निरित महानसादौ व्याप्ति गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन् व्याप्ति स्मरति-'यत्र यत्र धूमस्तत्राग्नि' रिति । तदनन्तरं 'वह्निव्याप्य-धूमवानयं पर्वत' इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् 'पर्वतो वह्निमानि'ति ज्ञानमनुमितिरुत्पद्यते । तदेतत्स्वार्थानुमानम् ।

यत्तु स्वयं धूमादग्निमनुमाय परं प्रतिबोधयितुं पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानम् । यथा पर्वतो वह्निमान् । धूमवत्त्वात् । यो यो धूमवान्स स वह्निमान् यथा महानसम् । तथा चायम् । तस्मात्तथेति । अनेन प्रतिपादितालिङ्गात्परोऽप्यग्निं प्रतिपद्यते ।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । पर्वतो वह्निमानिति प्रतिज्ञा । धूमवत्त्वादिति हेतुः । यो यो धूमवान् स स वह्निमान् यथा महानसमित्युदाहरणम् । तथा चायमित्युपनयः । तस्मात्तथेति निगमनम् ।

स्वार्थानुमितिपरार्थनुमित्योर्लिङ्गपरामर्श एव करणम् । तस्मा-ल्लिङ्गपरामर्शोऽनुमानम् ।

लिङ्गं त्रिविधम्-अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति । अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः । यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा ह्रद इति व्यतिरेकव्याप्तिः ।

अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेय-त्वात्पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति सर्वस्यापि

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रमेयत्वादभिधेयत्वाच्च ।

व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद् गन्धवत् यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति । पृथिवीमात्रस्य पक्षत्वात् ।

संदिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः ।

निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् ।

निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव ह्रदः ।

सव्यभिचार-विरुद्ध-सत्प्रतिपक्षाऽसिद्ध-बाधिताः पञ्च हेत्वाभासाः ।

सव्यभिचारोऽनैकान्तिकः । स त्रिविधः-साधारणाऽसाधारणाऽनुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा पर्वतो वह्निमान् प्रमेयत्वादिति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।

सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । यथा शब्दो नित्यः शब्दत्वादिति । शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्तिः ।

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा सर्वमनित्यं प्रमेयत्वादिति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।

साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वादिति । कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ।

साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः । यथा शब्दो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नित्यः श्रावणत्वाच्छब्दत्ववत् । शब्दोऽनित्यः कार्यत्वाद् घटवत् ।

असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ।

आश्रयासिद्धो यथा गगनारविन्दं सुरभि, अरविन्दत्वात् सरोजारविन्दवत् । अत्र गगनारविन्दमाश्रयः स च नास्त्येव ।

स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्, रूपवत् । अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात् ।

सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम् । पर्वतो धूमवान् वह्निमत्त्वादित्यत्रार्द्रेन्धनसंयोग उपाधिः ।

यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।

यस्य साध्याभावः प्रमाणान्तरेण निश्चितः स बाधितः । यथा वह्निरनुष्णो द्रव्यत्वादिति । अत्रानुष्णत्वं साध्यं तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वम् ॥

उपमानपरिच्छेदः ।

उपमितिकरणमुपमानम् । संज्ञासंज्ञिसंबन्धज्ञानमुपमितिः, तत्करणं सादृश्य-ज्ञानम् । तथाहि-कश्चिद् गवयपदार्थमजानन्कुतश्चिदारण्यकपुरूषाद् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन्गोसदृशं पिण्डं पश्यति तदनन्तरमसौ गवयपदवाच्य इत्युपमितिरुत्पद्यते ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

शब्दपरिच्छेदः ।

आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः । यथा गामनयेति । शक्तं पदम् । अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः ।

आकाङ्क्षा योग्यता संनिधिश्च वाक्यार्थज्ञाने हेतुः । पदस्य पदान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं संनिधिः । तथा च आकाङ्क्षादि-रहितं वाक्यमप्रमाणम् । यथा गौरश्च पुरुषो हस्तीति न प्रमाणमाकाङ्क्षा-विरहात् । वह्निना सिञ्चेदिति न प्रमाणं योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सांनिध्याभावात् ।

वाक्यं द्विविधम्-वैदिकं लौकिकं च । वैदिकमीश्वरोक्त-त्वात्सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् ।

वाक्यार्थज्ञानं शाब्दज्ञानम् । तत्करणं शब्दः ।

अयथार्थानुभवस्त्रिविधः संशय-विपर्यय-तर्कभेदात् । एकस्मि-न्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति ।

मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ रजतम् इति ।

व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।

स्मृतिरपि द्विविधा-यथार्था अयथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।

सर्वेषामनुकूलवेदनीयं सुखम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रतिकूलवेदनीयं दुःखम् ।

इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।

विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः ।

बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।

संस्कारस्त्रिविधः-वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः कटादिपृथिवीवृत्तिः ॥ इति गुणाः ।

चलनात्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्, अधोदेशसंयोगहेतुरपक्षेपणं, शरीरस्य संनिकृष्टसंयोगहेतुराकुञ्चनं, विप्रकृष्टसंयोगहेतुः प्रसारणम्, अन्यत्सर्वं गमनम् ।

नित्यमेकमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । परं सत्ता । अपरं द्रव्यत्वादि ।

नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।

नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्य एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति ।

अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य ।

सादिरनन्तः प्रध्वंसः उत्पत्त्यनन्तरं कार्यस्य ।

त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो नेति ।

सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात्सप्तैव पदार्था इति सिद्धम् ।

कणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।
अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः ॥

इति श्री महामहोपाध्यायान्नंभट्टविरिचितस्तर्कसंग्रहः समाप्तः ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कारिकावली

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥१॥

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥२॥

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका ।
सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ॥
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली ।
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥३॥

नूतनजलधररूचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरूहस्य बीजाय ॥४॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभाव पदार्थाः सप्त कीर्तिताः ॥५॥

क्षित्यप्तेजोमरूद्व्योमकालदिग्देहिनो मनः ।
द्रव्याणि, अथ गुणा रूपं रसो गन्धस्ततः परम् ॥६॥

स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चापरत्वकम् ॥७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरूत्वकम् ।
द्रवत्वं स्नेहसंस्कारवद्दृष्टं शब्द एव च ॥८॥

उत्क्षेपणं ततोऽपेक्षपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥९॥

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ।
तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥१०॥

सामन्यं द्विविधं प्रोक्तं परं चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥११॥

परभिन्ना तु या जातिः सैवाऽपरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥१२॥

व्याकत्वात्परापि स्याद् व्याप्यत्वादपराऽपि च ।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः ॥१३॥

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥१४॥

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१५॥

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ।
सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१६॥

द्रव्यादयः पञ्च भावा अनेके समवायिनः ।
सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥१७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१८॥

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्तितम् ॥१९॥

समवायिकारणत्वं ज्ञेयमथाऽप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥२०॥

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् ।
तत्रासन्नं जनकं द्वितीयामाभ्यां परं तृतीयं स्यात् ॥२१॥

येन सह पूर्वभावः कारणमादाय वा यस्य ।
अन्यं प्रति पूर्वत्वे ज्ञाते यत्पूर्वभावविज्ञानम् ॥२२॥

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथाऽपि यद् भवेन्नियतावश्यकपूर्वभाविनः ॥२३॥

एते पञ्चाऽन्यथासिद्धा दण्डत्वादिकमादिमम् ।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२४॥

तृतीयं तु भवेद् व्योम कुलालजनकोऽपरः ।
पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२५॥

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाऽप्यसमवायिहेतुत्वम् ॥२६॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।
क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥२७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्षितिर्जलं तथा तेजः पवनो मन एव च ।
परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२८॥

कालखात्मदिशां सर्वगतत्वं परमं महत् ।
क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥२९॥

द्रव्यारम्भश्चतुर्षु स्यादथाऽऽकाशशरीरिणाम् ।
अव्याप्यवृत्ति क्षणिको विशेषगुण इष्यते ॥३०॥

रूप-द्रवत्व-प्रत्यक्षयोगिनः प्रथमास्त्रयः ।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥३१॥

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥३२॥

स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरूतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३३॥

स्पर्शादयोऽष्टौ वेगश्च गुरूत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३४॥

स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥३५॥

धर्माऽधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।
सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३६॥

सङ्ख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
परोऽपरत्वे सङ्ख्याद्याः पञ्च वेगश्च मानसे ॥३७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तत्र क्षितिर्गन्धहेतु र्नानारूपवती मता ।
षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३८॥

स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।
नित्याऽनित्या च सा द्वेधा नित्या स्याद् गुणलक्षणा ॥३९॥

अनित्या तु तदन्या स्यात् सैवाऽवयवयोगिनी ।
सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥४०॥

योनिजादिर्भवेद् देहं, इन्द्रियं घ्राणलक्षणम् ।
विषयो द्व्यणुकादिश्च ब्राह्मण्डान्त उदाहृतः ॥४१॥

वर्णः शुक्लो रस-स्पर्शौ जले मधुर शीतलौ ।
स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥४२॥

नित्यतादि प्रथमवत्, किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुहिमादिविषयो मतः ॥४३॥

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।
नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत् ॥४४॥

इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः ।
अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४५॥

तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।
पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥४६॥

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।
आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥४७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इन्द्रियन्तु भवेच्छोत्रमेकः सन्नप्युपाधितः ।
जन्यानां जनकः कालो जगतामाश्रयो मतः ॥४८॥

परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ।
दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥४९॥

उपादिभेदादेकोऽपि प्राच्यादि व्यपदेशभाक् ।
आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥५०॥

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥५१॥

मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ।
धर्माधर्माश्रयाध्यक्षो विशेषगुणयोगतः ॥५२॥

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।
अहङ्कारस्याऽऽश्रयोऽयं मनोमात्रस्य गोचरः ॥५३॥

विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ।
अनुभूतिः स्मृतिश्च स्यात्, अनुभूतिश्चतुर्विधा ॥५४॥

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५५॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः ।
तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥५६॥

उद्भूतरूपं नयनस्य गोचरो, द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये ।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिणामयुक्तम् ॥५७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क्रियां जातिं योग्यवृत्तिं समवायश्च तादृशम् ।
गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः ॥५८॥

उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्राऽपि कारणम् ॥५९॥

द्रव्याध्यक्षे, त्वचो योगो मनसा ज्ञानकारणम् ।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥६०॥

ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥६१॥

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥६२॥

द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्राऽपि समवेतानां शब्दस्य समवायतः ॥६३॥

तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥६४॥

विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥६५॥

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥६६॥

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसाम्यपेक्ष्यते ॥६७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥६८॥

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ।
व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ॥६९॥

अनुमायां, ज्ञायमानं लिङ्गं तु करणं न हि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥७०॥

व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।
व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥७१॥

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरूच्यते ॥७२॥

सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥७३॥

अनैकान्तो विरूद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥७४॥

आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥७५॥

यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।
यस्तूभयस्माद् व्यावृत्तः स चासाधारणो मतः ॥७६॥

तथैवानुपसंहारी केवलान्वयिपक्षकः ।
यः साध्यवत्ति नैवास्ति स विरूद्ध उदाहृतः ॥७७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

आश्रयासिद्धिराद्या स्यात्स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥७८॥

पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्वादत्रासिद्धिरथापरा ॥७९॥

व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।
विरूद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥८०॥

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥८१॥

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।
सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥८२॥

वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमाफलम् ॥८३॥

पदज्ञानं तु करणं, द्वार तत्र पदार्थधीः ।
शाब्दबोधः फलं, तत्र शक्तिधीः सहकारिणी ॥८४॥

लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः ।
आसत्तिर्योग्यताकाङ्क्षतात्पर्यज्ञानमिष्यते ॥८५॥

कारणं, संनिधानं तु पदस्यासत्तिरुच्यते ।
पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥८६॥

यत्पदेन विना यस्याननुभावकता भवेत् ।
आकाङ्क्षा, वक्तुरिच्छा तु तात्पर्य परिकीर्तितम् ॥८७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

साक्षात्कारे सुखादीनां करणं मन उच्यते ।
अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते ॥८८॥

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः ।
रुपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥८९॥

द्रव्यत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ।
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥९०॥

एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ।
संख्यादयो विभागान्ता उभयेषां गुणा मताः ॥९१॥

संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा ।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥९२॥

अतः शेषगुणाः सर्वे मता एकैकवृत्तयः ।
बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥९३॥

अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ।
संख्यादिपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥९४॥

गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।
संख्यादिपरत्वान्तो द्रवत्वं स्नेह एव च ॥९५॥

एते तु द्वीन्द्रियग्राह्याः अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्याः गुरुत्वादृष्टभावनाः ॥९६॥

अतीन्द्रिया, विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥९७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥९८॥

स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।
संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥९९॥

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।
भवेदसमवायित्वम्, अथ वैशेषिके गुणे ॥१००॥

आत्मनः स्यान्निमित्तत्वम्, उष्णस्पर्शगुरुत्वयोः ।
वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥१०१॥

द्विधैव कारणत्वं स्यात्, अथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥१०२॥

चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकम् ।
चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥१०३॥

जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकम् ।
रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥१०४॥

सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ।
घ्राणग्राह्यो भवेद् गन्धो घ्राणस्यैवोपकारकः ॥१०५॥

सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥१०६॥

अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः ।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥१०७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ।
तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥१०८॥

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ।
गणनाव्यवहारे तु हेतुः सङ्ख्याभिधीयते ॥१०९॥

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ।
द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः ॥११०॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥१११॥

अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ।
परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥११२॥

अणु दीर्घं महद्ह्रस्वमिति तद्भेद ईरितः ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥११३॥

सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते ।
अनित्यं द्व्यणुकादौ तु सङ्ख्याजन्यमुदाहृतम् ॥११४॥

परिमाणं घटादौ तु परिमाणजमुच्यते ।
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥११५॥

परिमाणं तूलकादौ, नाशस्त्वाश्रयनाशतः ।
सङ्ख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणम् ॥११६॥

अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ।
अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥११७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ।
कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥११८॥

तथोभयक्रियाजन्यो भवेत्संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥११९॥

मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः ॥१२०॥

तृतीयः स्यात्कर्मजोऽपि द्विधैव परिकीर्तितः ।
अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥१२१॥

शब्दाहेतुर्द्वितीयः स्याद् विभागोऽपि त्रिधा भवेत् ।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥१२२॥

विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥१२३॥

परत्वं चापरत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चापि मूर्त एव तु दैशिकम् ॥१२४॥

परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥१२५॥

तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पंदभूयस्त्वज्ञानतो भवेत् ॥१२६॥

परमत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात्संयोगः कालपिण्डयोः ॥१२७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।
बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरुपितः ॥१२८॥

अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।
अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥१२९॥

तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ।
तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥१३०॥

आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीतताम्रतिः ।
भवेन्निश्चयरूपा या, संशयोऽथ प्रदर्श्यते ॥१३१॥

किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥१३२॥

स संशयो मतिर्या स्यादेकत्राभावभावयोः ।
साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥१३३॥

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥१३४॥

प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥१३५॥

पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥१३६॥

शाब्दबोधे योग्यतायास्तात्पर्यस्याथ वा प्रमा ।
गुणः स्याद्, भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥१३७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत्प्रमा, न प्रमा नापि भ्रमः स्यान्निर्विकल्पकम् ॥१३८॥

प्रकारतादि शून्यं हि सम्बन्धानवगाहि तत् ।
प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥१३९॥

व्यभिचारस्याग्रहोऽपि सहचाग्रहस्तथा ।
हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छङ्कानिवर्तकः ॥१४०॥

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१४१॥

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥१४२॥

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम् ।
शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥१४३॥

अनुमागतार्थत्वादिति वैशेषिकं मतम् ।
तत्र सम्यग्, विना व्याप्तिबोधं शब्दादिबोधतः ॥१४४॥

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः ।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः ॥१४५॥

अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥१४६॥

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥१४७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सुखं तु जगतामेव काम्यं धर्मेण जायते ।
अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥१४८॥

निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्यदि ॥१४९॥

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् ।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥१५०॥

बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।
तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥१५१॥

द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणम् ।
प्रवृतिश्च निवृत्तिश्च तथा जीवनकारणम् ॥१५२॥

एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ॥१५३॥

उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टोपायत्वधीर्यदि ॥१५४॥

यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत् ।
शरीर प्राणसञ्चारे कारणं परिकीर्तितः ॥१५५॥

अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥१५६॥

तदेवासमवायि स्यात्पतनाख्ये तु कर्मणि ।
सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरम् ॥१५७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सांसिद्धिकं तु सलिलं द्वितीयं क्षितितेजसोः ।
परमाणौ जले नित्यमन्यत्रानित्यमिष्यते ॥१५८॥

नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु ।
द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥१५९॥

स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ॥१६०॥

संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने ।
मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ॥१६१॥

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि ।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्दनेऽपि कारणम् ॥१६२॥

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥१६३॥

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।
धर्माधर्मावदृष्टं स्याद् धर्मः स्वर्गादिसाधनम् ॥१६४॥

गङ्गास्नानादियागादि व्यापारः स तु कीर्तितः ।
कर्मनाशाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥१६५॥

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ।
प्रायश्चितादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥१६६॥

इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ।
शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ॥१६७॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ।
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥१६८॥

वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्तिता ।
कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते ॥१६९॥

उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥१७०॥

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥१७१॥

इति महामहोपाध्यायविद्यानिवासभट्टाचार्यसुत श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता कारिकावली सम्पूर्णा ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

परिशिष्टम्

नियमप्रकरणम्

अत्यन्ताभावस्याभावः प्रतियोगिस्वरूपः ।

अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते ।

अनुल्लिख्यमाना जातिः स्वरूपतो भासते ।

अन्तराभासमानविषयतयोरभेदः ।

अन्तराभासमानविषयतयोरवच्छेद्यावच्छेदकभावः ।

अन्योन्याभावस्याभावः प्रतियोगितावच्छेदकस्वरूपः ।

असति बाधके उद्देश्यतावच्छेदकव्यापकत्वं विधेये विधेयसंसर्गे वा भासते ।

आत्म-शरीर-इन्द्रिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःख-अपवर्गास्तु प्रमेयम् । (न्या.सू.)

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।

आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियमर्थेन ततः प्रत्यक्षं जायते ।

आश्रयनाशाऽजन्यगुणनाशस्य विरोधिगुणजन्यत्वनियमः ।

ईशस्तज्ज्ञानयत्नेच्छा कालोऽदृष्टं दिगेव च ।
प्राक् प्रतिबन्धकाभावौ कार्ये साधारणाः स्मृताः ॥

उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठति ।

उपस्थितं परित्यज्यानुपस्थितकल्पने मानाभावः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उल्लिख्यमाना जातिः किञ्चिद्धर्मपुरस्कारेण भासते ।

एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति ।

एकं दश शतं चैव सहस्रमयुतं तथा ।
लक्षं च नियुतं चैव कोटिर्बुदमेव च ॥

कालस्य रोगस्य चरमफलप्राप्तेश्च संस्कारनाशकत्वनियमः ।

गुरुत्वादृष्टभावना अतीन्द्रियाः ।

जन्यमात्रं कालोपाधिः ।

जन्यानां जनकः कालो जगतामाश्रयो मतः ।

जात्यखण्डोपाध्यतिरिक्तपदार्थानां किञ्चिद्धर्मपुरस्कारेण भासमानत्वनियमः ।

तदभावाऽप्रकारा धीस्तत्प्रकारा तु निश्चयः ।

दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः । (न्या.सू.)

धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम् । (वै.सू.)

ध्वंसं प्रति प्रतियोगिनः कारणत्वम् ।

निर्गुणा निष्क्रिया गुणाः ।

नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमः ।

नित्येषु कालिकायोगः ।

निपातातिरिक्तनामार्थयोः भेदान्वयबोधोऽव्युत्पन्नः ।

पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां सेयमान्विक्षिकी मता ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ॥

भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥

मतुबन्ताद् विहितो भावप्रत्ययः प्रकृतिं गमयति ।

य उत्पद्यते स प्रागभावप्रतियोगी ।

यतोऽभ्युदयनिश्रेयससिद्धिः स धर्मः । (वै.सू.)

यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयम् ।

यद्वैशिष्ट्यं यत्र भासते तदेव स्वपदार्थः ।

यद्धर्मावच्छिन्नवाचकपदोत्तरं नञादिपदं श्रूयते तेन तद्धर्मावच्छिन्न-प्रतियोगिताकाभावावगाहनं क्रियते ।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते ॥

ययोः सामानाधिकरण्यं तयोरेव कार्यकारणभावः ।

येन सम्बन्धेन यन्नास्तीत्युच्यते स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः ।

यो नश्यति स ध्वंसप्रतियोगी ।

योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमः ।

योग्यविभुविशेषगुणानां यौगपद्यनिषेधः ।

लौकिकसन्निकर्षाजन्य-दोषविशेषाजन्यतद्वत्ताबुद्धिं प्रति तदभाववत्तानिश्चयः तदभावव्याप्यवत्तानिश्चयश्च प्रतिबन्धकः ।

वायोर्नवैकादशतेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मनसस्तथैव च ॥

विभिन्नकालीनयोर्विषयतान्यसम्बन्धेन आधाराधेयभावविरहः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

विशिष्टबुद्धौ विशेषणज्ञानं कारणम् ।

विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानं कारणम् ।

विशेषणे यद् विशेषणं तदेव विशेषणतावच्छेदकम् ।

विशिष्टवाचकानां पदानां सति पृथग्विशेषणवाचकपदसमवधाने विशेष्य-मात्रपरत्वम् ।

वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति ।
तथैव सर्वे युगपत्पदार्थाः परस्परेणान्वयिनो भवन्ति ॥

वृन्दं खर्वो निखर्वश्च शंखः पद्मश्चः सागरः ।
अन्त्यं मध्यं परार्धं च दशवृद्ध्या यथाक्रमम् ॥

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ।
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ॥

सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनमन्याय्यम् ।

स्वप्रतियोगिना सह अत्यन्ताभावस्य विरोधः ।

स्वप्रतियोगितावच्छेदकेन सह अन्योन्याभावस्य विरोधः ।

स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकज्ञानानुकूलो व्यापारो विभजतेरर्थः ।

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥

हेतुघटकविशेषणानां व्यभिचारवारकत्वेन सार्थक्यं चेत् सार्थक्यम् नो चेत् वैयर्थ्यम् ।

स्ववन्निष्ठात्यन्ताभावाऽप्रतियोगिवत् व्याप्यवृत्तित्वम् ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्ववन्निष्ठात्यन्ताभावप्रतियोगित्वम् अव्याप्यवृत्तित्वम् ।

स्ववन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मवत्त्वम् अव्याप्यकत्वम् ।

स्ववन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् व्यापकत्वम् ।

ज्ञानानुकूलो व्यापारो निपूर्वकरूध्धातोरर्थः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0 In Public Domain. Digitized by Sarayu Trust/eGangotri

श्रीविजयमहोदयसूरिग्रंथमाला – २२

प्रवचनप्रकाशन

Ganesh Varni Digambar Jain Institute, Naria, Varanasi